Caṇḍamāruta Mahācārya Granthamālā - 3

चण्डमारुत-महाचार्य-विरचिते

वेदान्तविजये चतुर्थः

अद्वैतविद्याविजयः

ADVAITAVIDYĀVIJAYAḤ

of

Caṇḍamāruta-Mahācārya



Critically Edited by

Dr. K.K.C.S. Badhri Narayanan

Vyakarana Siromani, M.A., M. Phil, B.Ed, Ph.D


&

Dr. K.K.C. Lakshmi Narasimhan

Vyakarana Siromani, M.A., B.Ed, Ph.D

Commemoration Volume of 650th Janma-nakṣtra of

Varavara Muni (Maṇavāḷa Māmuni)



श्रीमते रामानुजाय नमः श्रीदाशरथिगुरवे नमः

श्रीश्रीनिवासमहागुरवे नमः

चोलसिंहपुरम्
कोयिल् कन्दाडै चण्डमारुतम्

रामानुजाचार्यः सम्पत्कुमाराचार्यः





अस्मत्परमाचार्यवर्याः अस्मदाचार्यवर्याः

Wrapper front inside

Back ground colour: C:0, M:25, Y:60, K:0

Caṇḍamāruta Mahācārya Granthamālā - 3

चण्डमारुत-महाचार्य-विरचिते

वेदान्तविजये चतुर्थः

अद्वैतविद्याविजयः

ADVAITAVIDYĀVIJAYAḤ

of

Caṇḍamāruta-Mahācārya

Critically Edited by

Dr. K.K.C.S. Badhri Narayanan

Vyakarana Siromani, M.A., M. Phil, B.Ed, Ph.D

&

Dr. K.K.C. Lakshmi Narasimhan

Vyakarana Siromani, M.A., B.Ed, Ph.D

Foreword & Mahācārya Vaibhavam
by
Tirunarayanapuram
Araiyar Srirama Sharma Svami

CAṆḌAMĀRUTA MAHĀCĀRYA _
GRANTHASAṂRAKṢAṆA SAṂSTHĀ


16/1, Sannidhi Street, Kuzhippanthandalam
Chengleput Dist., Tamil Nadu - 603105

First Edition 2020
500 Copies

Published by:
Dr. K.K.C. Lakshmi Narasimhan
CAṆḌAMĀRUTA MAHĀCĀRYA GRANTHASAṂRAKṢAṆA SAṂSTHĀ
16/1, Sannidhi Street, Kuzhippanthandalam
Chengleput Dist., Tamil Nadu - 603105

Printed by:
RNR Printers & Publishers,
19, Tandavarayan Street,
Triplicane, Chennai - 600 005
Ph: 044-2844 7071

DEVOTEDLY OFFERED
TO



AND

ALL OUR PŪRVĀCĀRYAS

ACKNOWLEDGEMENT

We, on behalf of Caṇḍamāruta Mahācārya Granthasaṁrakṣaṇa Saṁsthā, are happy to publish our third volume of the works of Caṇḍamarutam Mahācārya (renowned Caṇḍamārutam Doḍḍācārya), one of the stalwarts on Viśiṣṭādvaita School of Śrī Rāmānuja, on the special occasion of 650th birthday celebrations of our great Ācārya Śri Maṇvāḷa Māmuni (Varavara muni).

The Present publication of Advaitavidyāvijaya is the fourth part of Vedāntavijaya authored by Caṇḍamāruta Mahācārya. Gurūpasadanavijaya and Brahmavidyāvijya had been already published by us.

Śrī Ubhayavedāntācārya Tirunarayanapuram Araiyar Sriramasarma Svamin has given his kind helping hand by way of suggestions, corrections and citations. In addition, this Svāmin has given the plan of dividing three major parts to five chapters for better understanding. We are grateful to this Svamin. This way, we have tried out best to present this critical edition. Maximum original quotations are provided in the footnotes for the easy and convenient reading and understanding of the textual context. We are thankful to Vidvan Srihari, who had dedicated himself in the activities of Sampradāya and who, on behalf of Śrī. U.Ve. Tirunarayanapuram Araiyar Sriramasarma Svamin, has helped us to get the corrected copy of above work.

We are thankful to the authorities of Rashtriya Sanskrit Vidyapeetham, (Tirupati), Sri Venkateshwara Oriental Research Institute (Tirupati), Ananthacharya Indological Research Institute (Mumbai), Oriental Research Institute (Mysuru) and Lal Bahadur Visvavidyapeetham (Delhi), for permitting us to use the manuscripts in their custody. We are also thankful to all our friends who helped in this project in different ways, in addition to Sriman Rajan of M/s RNR Printers and Publishers, Triplicane, Chennai, for neatly printing this book.

Vijayollāsa (including Parikaravijaya), the fifth part of Vedāntavijaya is in progress. With the benevolent grace of our Lord Śrimannārāyaṇa, all the treatises are to be published with translation in near future.

K.K.C. LAKSHMI NARASIMHAN
General Editor & Publisher

विषयसूचिका
(CONTENTS)

अद्वैतविद्याविजये अध्यायविभागयोजना

अद्वैतविद्याविजयस्य सर्वेषु कोशेषु अध्यायान्तिमसङ्केतम् (Colophon) अनुसृत्य त्रयो भागाः दृश्यन्ते। एते प्रपञ्चमिथ्यात्वभङ्गः, जीवेश्वरैक्यभङ्गः, अखण्डार्थत्वभङ्गश्चेति। परन्तु अस्मिन् ग्रन्थे विषयानुसारं षड्भागाः वर्तन्त इति विद्वद्वरिष्ठानां **श्रीमतां तिरुनारायणपुरम् अरैयर् श्रीरामशर्मणाम्** अधोनिर्दिष्टोऽयमभिप्रायः अध्येतॄणां सुगमार्थस्वीकाराय भवत्येव।

अत्र २५ पृष्टे 'यच्चेदमुच्यत' इत्यारभ्य ३५ पृष्टे 'तादधीन्यनिबन्धनोऽयं व्यपदेशः' इतिपर्यन्तो भाग अहमर्थात्मत्वभङ्गः। तत अखण्डार्थत्वभङ्गः। तत उपक्रान्तस्य विशिष्टाद्वैतसिद्धिभागस्य श्रीमतो नारायणस्यैव विशिष्टाद्वैतधर्मिणः परदेवतात्वेन उपसंहारभाग इति अद्वैतविद्याविजये विशिष्टाद्वैतसंपुटिते षड्भागाः।

सकलोपनिषद्भाष्यविशिष्टाद्वैतरूपवान्।
नारायणः परं ब्रह्म त्वद्वैतविजये धृतः।।

प्रस्तावना

(श्रीमन्तः उभयवेदान्ताचार्याः तिरुनारायणपुरम् अरैयर् श्रीरामशर्मणः, मेलुकोटे)

श्रीमते रामानुजाय नमः।

श्रीमहाचार्यधुर्यस्य चण्डमारुतनामिनः।
श्रीरामानुजदासस्य चरणौ शरणं हि नः।।
चण्डमारुतवेदान्तविजयादि स्वसूक्तिभिः।
वेदान्तरक्षकायास्तु महाचार्याय मङ्गलम्।।
इति यन्मङ्गलं नित्यं सप्तर्षिघटिकाचले।
श्रीमद्योगनृसिंहस्य सन्निधौ घुष्यते द्विजैः।।

अस्य श्रीश्रुतप्रकाशिकातूलिकाकारप्रथममहाचार्यानुजपौत्रस्य, प्रथममहाचार्येणैव स्वीकृतपुत्रतां प्राप्तस्य, प्रचण्डवादिमण्डलप्रकाण्डगर्वखण्डनप्रकृष्टवाक्यवैखरीप्रकृष्टसज्जन-व्रजस्य, सत्संप्रदायगुरुपरम्पराप्राप्तसर्वार्थोऽहं श्रीयादवाचलश्रीशविज्ञप्तिकरः श्रीरामशर्मा शतदूषणीं वैदान्ताचार्यकृतिं चण्डमारुतव्याख्यया सहाधीतवान्, पाराशर्यविजयविज्ञानी, पञ्चविजयभागयुक्ते वेदान्तविजये सद्विद्याविजयस्य दशवारं शिष्येभ्यः पाठयिता, महाचार्य-ग्रन्थेष्वधुनाप्यध्ययनकुतूहली, यत्नवानेवास्मि।

मदीयपूर्वपुरुषसम्पादिततालपत्रपुस्तकेष्वद्वैतविद्याविजयमद्वैतकालानलञ्च क्वचित् पठित्वाऽमृतबिन्दुमात्रेण सम्यक् वेदान्ते वादाहवेषु वादहवेषु वा जीवतो मम भाग्यमिदम् यत् श्रीमहाचार्यवंश्याभ्याम्, अस्मत्तालपत्रपुस्तकेन सह नानातालपत्रपाठभेदान्निर्दिश्य, प्रमाणाकरप्रदर्शनाच्च विश्रुतवैदुष्याभ्यां भ्रातृभ्यां संविहितं नागराक्षरैः टङ्क्तमद्वैतविद्या-विजयं पुस्तकं दृष्ट्वा मम दिव्यः कोऽपि चतुर्थः पुत्रोऽजनि इति संभावयामि।

श्रीबदरीनारायणो ब्रह्मचारी विद्वान्, तस्य ज्येष्टभ्राता श्रीमान् लक्ष्मीनृसिंहश्च विद्वान्, ग्रन्थसंशोधनकलाकुशलौ इमौ द्वावपि मम महाचार्यवंश्यौ प्रणम्यौ भवतः। कुलिप्पान्तण्डलग्रामस्थौ (नृसिंहपुरी) सदाचारशीलौ ब्रह्मविद्याविजयादिप्रकाशकौ सर्वैश्च विशिष्टाद्वैतिभिः वन्दनीयौ। 'स जातो येन जातेन याति वंशस्समुन्नतिम्' इति पञ्चतन्त्र-सूक्तमनयोर्विषये यथार्थमेव ननु।

यादवाद्रिश्रीवेदान्तवादावलीसंरक्षितविशिष्टाद्वैतसाम्राज्येन न्यायभास्करादिना निर्जिततत्कालिककेवलाद्वैतिमल्लजालेनानन्तार्येण श्रीमहाचार्यपञ्चविजयग्रन्थेभ्य एव वियजोपपादकश्रीसूक्तयः समुल्लिखिताः श्रीभाष्यश्रुतप्रकाशिकातत्वटीकाद्यनुसारिण्यश्चैताः।

किञ्च श्रीचण्डमारुतमहाचार्यस्य साक्षाच्छिष्येषु वाल्मीकिरामायणव्याख्यातुः गोविन्दाचार्यस्य पुत्रः श्रीनिवासाचार्यः यतीन्द्रमतदीपिकां विशिष्टाद्वैतप्रकाशिकामरचयत्। श्रीमान् नृसिंहराजः शतदूषणीव्याख्यां सुलभार्थां तत्वमुक्ताकलापव्याख्याञ्चारचयत्। कर्णाटश्रीचम्पकक्षेत्रवेङ्कटेशश्रीगोपालकृष्णपूजकः चम्पकेशाचार्यः चम्पकेशीयन्नाम श्रुतप्रकाशिकारक्षकं ग्रन्थमारचयत्। महाचार्यस्य पितृव्यपुत्र एव सच्छिष्यः ज्ञानभूषण-सुदर्शनाचार्यः वेदान्तविजये भागचतुष्टयं गुरुमुखादेवाधीत्य वेदान्तविजयमङ्गलदीपिकाख्यं ग्रन्थमरचयत्। आन्ध्रदेशीयः महाकविः साहित्यालङ्कारे महाचार्यशिष्य एको ग्रन्थमरचयत्।

एवं नानाशिष्यशिक्षणेन ग्रन्थरचनेनोभयवेदान्तसम्प्रदायप्रवर्तकेन श्रीचण्डमारुत-महाचार्येण श्रीरामानुजदर्शने महानुपकारः कृत एव। सुगृहीतनामधेयोऽयं सर्वैरेव वेदान्तिभिः श्लाघ्य आसीत्।

श्रीरामानुज-निम्बार्क-मध्व-श्रीवल्लभाचार्यसम्प्रदायेषु चण्डमारुतमहाचार्यग्रन्थानां प्रचारः भारते सर्वत्रासीत्। मुम्बापुरीभाग्यमिदं यत् बडे मन्दिरवल्लभसम्प्रदायगोस्वामिपादैः रसिताः महाचार्यपरम्पराग्रन्थाः, केचन मुद्रिताश्च। श्रीयदुगिरियतिराजसम्पत्कुमार-रामानुजमुनीन्द्रैः महता यत्नेन सद्विद्याविजयः सम्पादितपूर्वः।

नूतनैः विशिष्टाद्वैतिभिः महाचार्यग्रन्थानां दूरीकरणेन सम्प्रदायभेदका दोषा एव प्रकाशिताः।

अतः वेदान्तदेशिककटाक्षविवृद्धबोधस्य कान्तोपयन्तृमुनेः करुणैकमात्रस्य प्रतिवादि-भयङ्कराचार्यस्य परम्परायां वेदान्तदेशिकात् वेङ्कटनाथार्यात् षष्ठस्य महाचार्यस्यैव पृष्ठपातिभिः विशिष्टाद्वैतिभिर्भाव्यम्।

एवमद्वैतविद्याविजयग्रन्थः विशिष्टाद्वैतसिद्धिपूर्वको नारायणपरत्वस्थापनपर्यवसितः श्रीशङ्करभगवत्पादशिष्यैरपि प्रामाणिकैर्भूत्वाङ्गीकर्तव्यः।

सकलोपनिषद्भाष्यविशिष्टाद्वैतरूपवान्।
नारायणः परं ब्रह्म त्वद्वैतविजये धृतः।।

षड्भागोयमुपक्रमोपसम्हाराभ्यां भागचतुष्टयेन लब्धचतुर्दिग्विजयः षडरचक्र प्रतिष्ठितश्रीभगवत्संकल्परूपश्रीसुदर्शनभगवत्समः।

येभ्यो वर्णश्चतुर्थश्चरमत उदभूदादिसर्गे प्रजानां
साहस्री चापि संख्या प्रकटमभिहिता सर्ववेदेषु येषाम्।
व्याप्ता विश्वम्भरायैरतिविततततनोर्विश्वमूर्ते विराजे
विष्णोस्तेभ्यो महद्भ्यस्सततमपि नमोऽस्त्वङ्घ्रिपङ्केरुहेभ्यः।।

इति श्रीशङ्करभागवत्पादवचनमेव हि चण्डमारुतप्रशान्ताद्वैतदीपिकादिकस्य अप्पय्यदीक्षितस्यापि जनस्य शरणम्। चण्डमारुताचार्याप्पय्यदीक्षितयोः संक्षिप्तं हि चरितं कर्णाटयदुशैलपश्चिमश्रीमिरिला-सालग्रामक्षेत्रानन्तार्यस्य कृतौ प्रपन्नामृते द्रष्टव्यम्। एवं नानादिव्यदेशेषु विजयनगरमहाराजादिस्थापितशिलाताम्रपट्टादिशासनेषु महाचार्यवैभवं द्रष्टव्यम्।

इति विज्ञापकः
रामानुजदासानुदासः
विद्वत्कविरत्नं भारतराष्ट्रपतिप्राशास्तिभाजनं
तिरुनारायणपुरं अरैयर्
श्रीरामशर्मा
(दिनाङ्कः ८.८.२०२०)

महाचार्यवैभवम्

वाधूलश्रीनिवासार्यतनयं विनयाधिकम्।

प्रज्ञानिधिं प्रपद्येऽहं श्रीनिवासमहागुरुम्।।

भगवद्रामानुजमुनेः पूर्वाश्रमसम्बन्धिनः प्रियभागिनेयस्य वाधूलान्वयजस्य दाशरथेः वंशे कृतावतारोऽयं श्रीनिवासमहागुरुरिति प्रख्यातो महाचार्यः। '**स्वामी दोड्डयाचार्य-वैभवप्रकाशिका**' इति ग्रन्थानुसारेण रामानुजदासेत्यपरनामधेयस्य महाचार्यस्य चरित्रमत्र संगृह्यते।

मुदलियाण्डानिति प्रसिद्धो दाशरथिमिश्रभगवद्रामानुजार्यस्य प्रथमभागिनेयः। ज्येष्ठभगिन्याः पुत्रः, वाधूलकुलधौरेयः। तत्पुत्रः कन्दाडैयाण्डानिति प्रसिद्धो रामानुजगुरुः, यस्य प्रीत्यर्थं श्रीमन्महाभूतपुरे स्वजन्मस्थले स्वाचार्यविग्रहं भगवद्रामानुजोनुजग्राह। तस्मात् द्वादशतमः पुत्रपौत्रपरम्परायामेषः चण्डमारुताचार्यः। महाचार्यवंशावलिः-

१. मुदलियाण्डान् (श्रीदाशरथिगुरुः)	२. कन्दाडैयाण्डान्
३. कन्दाडै तोलप्पर्	४. ईयान् रामानुजाचार्यः
५. श्रीगोपुरनायनार्	६. देवप्पेरुमाल् तोलप्पर्
७. पोरेट्टु नायनार्	८. अरशरप्पै
९. कन्दाडै नायनार्	१०. तोलरप्पै (देवराजगुरुः)
११. पेरियप्पन् (श्रीनिवासाचार्यः)	१२. **चण्डमारुतं दोड्डयाचार्यः**

घटिकाचलस्य (चोलसिंहपुरम्) समीपे 'एरुम्बि' इति ग्रामे श्रीमद्वरवरमुनेरष्ट-दिग्गजेति प्रसिद्धाचार्याष्टस्वेकः देवराजमुनिः (एरुम्बियप्पा) समभवत्। अत्रैवास्य महाचार्यस्य जननमभूत्। महाचार्यस्य पितामहः तोलरप्पै। तस्य पेरियप्पन् (श्रीनिवासशर्मन्), शिरियप्पन् (देवराजशर्मन्) इति द्वौ पुत्रावास्ताम्। श्रीदेवराजाचार्यस्य कनिष्टपुत्रः दोड्डयाचार्यः (महाचार्यः)।

महाचार्याणां नामधेयानि - रामानुजार्यः, दीक्षानाम श्रीनिवासदासः, व्यवहारनाम श्रीनिवासमहागुरुः,दोड्डयाचार्यः, चण्डमारुताचार्यः इत्यादि।

विरुदावलिः-श्रीमद्वेदमार्गप्रतिष्ठापनाचार्यः, उभयवेदान्ताचार्यः, वेदान्तविजयाचार्यः, विशिष्टाद्वैतविजयध्वजः, प्रज्ञानिधिः, गड्डं दोड्डयाचार्यः महाचार्य इत्यादि।

गोत्रसूत्रादिः-भार्गववीतहव्यसावेदसत्र्यार्षेयप्रवरान्वितं वाधूलगोत्रम्, कृष्णयजुर्वेद-तैत्तिरीयशाखाया आपस्तम्बसूत्रम्, श्रीरामानुजशर्मनामाऽसौ। इदं नाम पराशर्यविजय-चण्डमारुतादिषु स्पष्टम्। वाधूलो महर्षिः शुल्बसूत्रकर्त्ता प्रसिद्धः। स च ब्रह्मोपेतक्षत्रिय-वंश्यः। वीतहव्यस्य चरितं मत्स्यपुराणे स्पष्टम्। इतः पूर्वं शतसंवत्सरेष्वस्माभिरधुना श्रूयमाणं प्रवरादिकं न्यायालये व्यवहारार्थं प्रवृत्तं वाधूलमौनमूकेति प्रवरेण वाधूलगोत्रमिति।

सर्वसिद्धित्रयोदश्यां लग्ने वेदप्रदाह्वये।
जातं कुम्भोत्तराषाढे महाचार्यमहं भजे।।

इत्यनेन श्लोकेन कलियुगे गाथोद्भवसंख्याके गते वर्तमाने वा संवत्सरे शुभकृन्नाम्नि शालिवाहनशकानुगे कुम्भमासे कृष्णपक्षे सर्वसिद्धौ त्रयोदश्यां मीनलग्ने गुरुवासरे उत्तराषाढासु वेदप्रदाख्ये मुहूर्ते अवतारः, जन्म (१.२.१५४३) दिन इति ज्ञायते।

सकललक्षणैस्समुद्भूतस्यास्य महाचार्येतिनामकरणं स्वपित्रा देवराजाचार्येण कृतम्। वंशवृद्ध्यर्थमयं महाचार्यः स्वपितृव्येन पेरियप्पङ्गार्महोदयेन पुत्रत्वेन स्वीकृतः। तत्तदुचितकालेऽन्नप्राशनचौलोपनयनाक्षराभ्यासवेदाध्ययनशास्त्राभ्यासादिकं सर्वं सम्यगुप-पादितम्। महाचार्यलक्षणपूर्णत्वादक्षराभ्यासमारभ्योभयवेदान्तरहस्यानुष्ठानपर्यन्तं स्वीकर्त्ता पिता वाधूलश्रीनिवासार्य एवाचार्यः। कालक्रमेण विवाहितः महाचार्यः स्वीकृतपितुः पेरियप्पङ्गार्स्वामिसन्निधावेवोभयवेदान्तग्रन्थकालक्षेपमकरोत्।

सर्वशास्त्रपारंगतः महाचार्यः घटिकाचलनृसिंहेऽतिशयितभक्तो नृसिंहमन्त्रसिद्धश्च व्यराजत। महाचार्यस्य महिमानं श्रुत्वा कृष्णदेवरायवंशस्थ अच्युतराय एतच्छिष्यो बभूव। भगवन्नृसिंहाज्ञया घटिकाचलशृङ्गस्थं जीर्णं देवालयं पुनरुद्धृत्य, तदनन्तरं **एरुम्भि** ग्रामस्य प्राच्यां स्थितमरण्यप्रदेशं नगररूपतया परिणमय्य च, तस्य चोलसिंहपुरमिति नाम चकार। अनन्तरं तत्रैव देवालयं निर्माय, भगवतोऽमृतफलनाथस्योत्सवमूर्तिं भक्तोचितं प्रतिष्ठापयामास। एकदा महाचार्यः श्रीपदपुरीं (तिरुपति) गत्वा तत्र भगवद्रामानुजाचार्यैः प्रतिष्ठापितगोविन्दराजं -

पद्माभूमिकराब्जलालितपदं काञ्चीपरीताम्बरं
पद्मालङ्कृतनाभिमध्यमुरसि भ्राजिष्णुपञ्चायुधम्।
बाहुद्वन्द्वविराजिचक्रजलजं पद्मोपमास्येक्षणं
गोप्तारं जगतामहीन्द्रशयनं गोविन्दराजं भजे।।

इत्यादिभिः मङ्गलाशासनपूर्वकं संसेव्य, श्रीवेङ्कटाद्रिं गत्वा, भगवतः श्रीनिवासस्य संसेवनकाले अर्चकमुखेन '**अत्रैव स्थित्वोभयवेदान्तप्रवचनं कुरु**' इति भगवतः श्रीनिवासस्याज्ञानुसारं विंशतिवर्षाणि भगवद्रामानुजसंप्रदायप्रवर्तनं कुर्वन् विललास।

श्रीभगवद्रामानुजाचार्याणामनुग्रहः

प्रथमोऽनुग्रहः - श्रीभगवद्रामानुजाचार्यः एरुम्भी अय्यनप्पनैय्यङ्कार्महाशयस्य स्वप्ने आविर्भूय '**श्रीमन्नारायणालये तिरुमलैयप्पन् हस्ते स्थितं दीर्घश्यामलश्रीभाष्य-कोशं महाचार्यस्य हस्ते समर्पय**' इत्युक्त्वा महाचार्यमेवमनुजग्राह -

वाधूलश्रीनिवासार्य तनयं विनयाधिकम्।
प्रज्ञानिधिं प्रपद्येऽहं श्रीनिवासमहागुरुम्।।

द्वितीयोऽनुग्रहः - तिरुक्कण्णपुरवासिनः श्रीभाष्यं तिरुमलै अय्यङ्गार्महाशयस्य स्वप्ने प्रादुर्भूय, महाचार्यवैभवमुपदिश्य '**श्रीकोशमेतं महाचार्यसन्निधौ समर्पये**' त्युक्त्वैवमनुजग्राह -

श्रुतप्रकाशिकोक्तेन तृतीयेनैव हेतुना।
व्याख्यास्यत्यखिलान्वेदमौलिभागान्महागुरुः इति।

तृतीयोऽनुग्रहः - एकदा भगवद्रामानुजाचार्यः स्वयं महाचार्यस्य स्वप्ने प्रसन्नस्सन्

त्वादीयानपराधोघान् त्वत्संबन्धिकृतानपि।
क्षमाम्यहं दाशरथेः संबन्धात् मा व्यथां कृथाः।।

इत्यनुगृह्य '**भो रामानुजदास**' इति संबोधनमकरोत्। ततः प्रभृति महाचार्यस्य ' '**रामानुजदास**' इति नामान्तरं संजातम्। ततः महाचार्यः चोलसिंहपुरमागत्य संप्रदाय-प्रवर्तनं कुर्वन्नासीत्। एकदा महाचार्यस्य स्वप्ने राजकुमारवत् प्रतीतः भगवान् काञ्ची वरदराजः '**निद्राणं स्वपितरं प्रबोधय**' इत्यवदत् राज्ञः कृते स्वाचार्यस्य गाढनिद्रातः प्रबोधनमनुचितमिति मत्वा महाचार्यः तूष्णीमभवत्। ततः भगवान् महाचार्यं कशया अताडयत्। प्रबुद्धो महाचार्यः '**काञ्ची वरदराज एव राजकुमारवत् दृष्टिपथं गत**' इति निश्चित्य काञ्चीवरदराजं मङ्गलाशासनपूर्वकं प्रणम्य चोलसिंहपुरमाजगाम। तत्र नृसिंहाश्रमिनाम्नाऽद्वैतिविरचितस्य '**अद्वैतदीपिका**' इति ग्रन्थस्य समाधानरूपेण वेदान्त-देशिककृत '**शतदूषणी**' इति ग्रन्थस्य '**चण्डमारुतम्**' इति व्याख्यानं निर्ममे। ततः प्रभृति महाचार्यः 'चण्डमारुतं दोड्डयाचार्य' इति विख्यातः। एकदा गरुडारूढः काञ्चीवरदराजः

महाचार्यस्य पुरत आविर्भूयाष्टौ दिनानि तक्कान् तटाकतीरे उषित्वा, महाचार्याय सुदर्शनमन्त्रमुपदिश्य संप्रदायप्रवर्तनमादिशत्। तदा महाचार्य एवं प्रार्थयामास-

नारायणादिगणनाधिगताप्यनाम
सत्वेप्यतृप्त इव नाम यदाजयस्त्वम् ।
आहूय पूर्वमभिरक्ष्य च मत्कुलाग्र्यान्
हस्त्यद्रिनाथ मयि तद्धि नवी चकर्थ।।'

एकदा महाचार्यः श्रीनिवासं संसेव्य तत्रैव कञ्चित्कालमवसत्। तस्मिन् समये दक्षिणचित्रकूटक्षेत्रे भगवतो गोविन्दराजस्य पूजोत्सवादिकं शैवपाषण्डिभिः प्रतिरुद्धमिति ज्ञात्वा, महाचार्यः भगवन्तं श्रीनिवासं प्रार्थयामास। भगवान् श्रीनिवोसोऽपि स्वकीयं चक्रायुधं प्रसाद्य '**वादिनो जित्वा गोविन्दराजं प्रतिष्ठापय**' इत्यनुजग्राह। महाचार्योऽपि भगवदनुग्रहेण प्रतिवादिनम् **अप्पय्यदीक्षितं** वादे विजित्य, श्रीमन्नारायणपारम्यं स्थापयित्वा शिवशब्दस्यापि नारायणपरत्वमुपपाद्य नारायणशब्दस्य देवतान्तरपरत्वं न संभवतीति स्थापयामास। तत्र महाचार्यः गोविन्दराजस्यानेकविधकैंकर्याणि ध्वजस्तम्भनिर्माण-नित्योत्सवब्रह्मोत्सवादीनि कृष्णभूपालद्वारा कारयामास।

महाचार्यः प्रतिवैशाखोत्सवसेवार्थं काञ्चीपुरं गच्छन्नासीत्। काञ्च्यां देवराज-स्वामिवार्षिकमहोत्सवे तृतीयदिवसे प्रत्यूषे गरुडारूढो वरदराजः सर्वानानन्दयतीत्यद्यापि प्रसिद्धो विषयः। एकदा महाचार्यः शरीरास्वास्थ्यात्तत्र गन्तुं न शशाक। तस्मिन् दिने प्रत्यूषे भक्तोचितस्य (तक्कान्) तटाकतीरे भगवन्तं वरदराजं प्रार्थयामास। सद्यैव काञ्च्यां गोपुरद्वारे '**छत्रेण छादनं कुरु**' इत्यर्चकानादिश्य तत्क्षणे वात्सल्यपूर्णः आरूढपक्षीश्वरः प्रसन्नवदनः वरदराजः महाचार्याय दर्शनं प्रददौ। अतीव संतुष्टो महाचार्यः **काञ्चीदेवराजं** एवमस्तौत्।

देवराजपञ्चकम्

प्रत्यूषे वरदः प्रसन्नवदनः प्राप्ताभिमुख्यान् जनान्
आबद्धाञ्जलिमस्तकानविरलानाबालमानन्दयन्।
मन्दोड्डायितचामरोभयमणिश्वेतातपत्रश्शनैः
अन्तर्गोपुरमाविरास भगवानारूढपक्षीश्वरः।। १
मुक्तातपत्रयुगलोभयचामरान्तः
विद्योतमानविनतातनयाधिरूढम्।
भक्ताभयप्रदकरांबुजमम्बुजाक्षं

नित्यं नमामि वरदं रमणीयवेषम् ।। २
यद्वेदमौलिगणवेद्यमवेद्यमन्यैः
यद्ब्रह्मरुद्रसुरनायकमौलिवन्द्यम् ।
तत्पद्मनाभपदपद्मयुगं मनुष्यैः
सेव्यं भवद्भिरिति दर्शयतीव तार्क्ष्यः।। ३
केचित्तत्वविशोधने पशुपतौ पारम्यमाहुः परे
व्याजह्रुः कमलासने नयविदोऽप्यन्ये हरौ सादरम्।
इत्येवं चलचेतसां तनुभृतां पादारविन्दं हरेः
तत्संदर्शयतीव संप्रति नृणां तार्क्ष्यः श्रुतीनां निधिः।। ४
प्रत्यग्गोपुरसम्मुखे दिनमुखे पक्षीन्द्रसंवाहितं
नृत्यच्चामरकोरकं निरुपमच्छत्रद्वयीभासुरम।
सानन्दं द्विजमण्डलं विदधतं सन्नाहचिह्नारवैः
कान्तं पुण्यकृतो भजन्ति वरदं काञ्च्यां तृतीयोत्सवे।। ५

महाचार्याणां ग्रन्थाः - विशिष्टाद्वैतसिद्धान्तप्रवर्तकाचार्यस्य श्रीरामानुजाचार्यस्य सिद्धान्तं पुनः प्रतिष्ठापयितुं विरचिताः ग्रन्थाः - वेदान्तविजयः, पाराशर्यविजय इति विजयग्रन्थौ, शतदूषण्याः प्रथमव्याख्या चण्डमारुतम्, ब्रह्मसूत्रभाष्योपन्यासः, उपनिषन्मङ्गलदीपिका, दशोपनिषद्व्याख्या, सर्वार्थसिद्धिव्याख्या तात्पर्यप्रकाशिका, श्रीरहस्यमीमांसा, श्रीघटिकाचलयोगलक्ष्मीनृसिंहसुप्रभातम्, श्रीकूरनाथस्तुतिः, देवराजपञ्चकम्, श्रीमुष्णदेवस्तुतिः, गोविन्दराजस्तुतिः, वेंकटेशषट्श्लोकी, वेदान्तदेशिकविंशतिः, वेदान्तदेशिकवैभवप्रकाशिका च। एवमस्माभिरनुपलब्धा अज्ञाताश्च काश्चन कृतयः स्युः। चण्डमारुतग्रन्थे रामानुजस्तुतिः, वेदान्ताचार्यस्तुतिः, स्वाचार्यस्तुतिः, देवराजस्तुतिः, वेङ्कटेशस्तुतिश्च लभ्यते। पाराशर्यविजये व्यासस्तुतिः, वेदान्तयुक्तिसंग्रहकारिकाश्चान्यत्रान्यत्र लभ्यन्ते। क्वचित् हनूमत् स्तुतिः, एकं ग्रामदानशासनमस्य कृतिरस्ति। मुक्तकश्लोकाः तत्र तत्र लभ्यन्ते।

महाचार्याणां विद्यापरम्परा - अस्य सर्वविद्यापरम्परा तु एरुम्बिल् कन्दाडै बालधन्विवंश्यश्रीदिग्विजय एम्बावर्यस्य सविधे सम्यक् स्थिता यः खलु श्रुतप्रकाशिकायाः बृहतीं गुरुभावप्रकाशिकां व्याख्यां प्रणीय, स्वस्वभावप्रकाशिकाकारान् श्रुतप्रकाशिकामार्गदूषणान्निवारयन् प्राचीनमार्गं संरक्षितवान्। तत्परम्परायामेव मेल्नाडू

कन्दाडै कृष्णकुमारय्यनार्यस्य वंश्यो वेङ्कटाचार्य आसीत्। एवमेते श्रीयदुगिरिनायिका-प्रवाळमालांशावतारः श्रीनिवासमहाचार्यः श्रीपेरुम्पूदुरु यम्बार्मठस्थापकस्य मधुरमङ्गल-श्रीशैललक्ष्मणमुनेः सर्वविद्यागुरुरासीत्। यच्छिष्यप्रशिष्यपरम्परायां तिरुनारायणपुरं अरैयर् श्रीरामशर्मा महोदयादय उभयवेदान्ताध्यायिनः।

महाचार्याणां सहाध्यायिनः - अप्पावय्यङ्गार्, अप्पूविल् अण्णप्पङ्गार्, अण्णाविल् अप्पय्यङ्गार्, तिरुनारायणपुरम् यतिराजजीयर्, तिरुक्कण्णपुरं तिरुमलै अय्यङ्गार्, श्रीनिवासदास इत्यादयः।

महाचार्याणां प्रशिष्याः - प्रधानतया पञ्चशिष्याः अस्माभिः ज्ञाताः। प्रथमः **नृसिंहराजाख्यः**, शतदूषणीतत्त्वमुक्ताकलापादीनां वेदान्तार्यग्रन्थानां व्याख्याता, एरुम्बियप्पा-वंशजः, श्रीवत्सगोत्रः। द्वितीयः - **ज्ञानभूषणसुदर्शनार्यः**, वेदान्तविजयमङ्गलदीपिकादि-कर्ता, वाधूलगोत्रः। तृतीयः - **कर्णाटकचम्पकेशाचार्यः**, यस्य चम्पकेशीयो वादग्रन्थः श्रुत-प्रकाशिकोपरि दुर्वादिक्षिप्तानां कण्टकानां उद्धाररूपः। तुरीयः - **श्रीनिवासाचार्यः**, स्वामि-पुष्करिणीगोविन्दराजस्य वाल्मीकिरामायणव्याख्यातुः पुत्रः भारद्वाजगोत्रो यस्य यतीन्द्रमत-दीपिकाग्रन्थः विशिष्टाद्वैतिसर्वजनप्रथपाठ्यः प्रसिद्धः। पञ्चमः - आन्ध्रप्रदेशे सर्व-साहित्यालङ्कारपण्डितः प्रसिद्धः कश्चन। मद्रास् ओरियण्टल् सीरिस् ग्रन्थपरिचयेन तस्य महाचार्यस्य शिष्यत्वञ्च ज्ञायते।

श्रीभाष्यभगवद्विषयादिगुरुम्परायां महाचार्यस्य शिष्यः - वाधूलाण्णाविलप्पन् पुत्रः अप्पङ्गाराख्यः उल्लिख्यमानोऽस्ति। महाराष्ट्रादिषु वल्लभसम्प्रदायप्रवर्तकाणां महाचार्यज्ञानवंशत्वं बडेमन्दिर् मुम्बई प्रभृतिस्थलेषु सुसंरक्षितैर्महाचार्यग्रन्थरत्नैः तैरधीतैश्च ज्ञाप्यते। यादवाद्रावाचार्यदायादानां वरदवल्लभाचार्यादीनां परम्परायां श्रीप्रवाळमालावतार-श्रीमहाचार्यपर्यन्तं विद्यापरम्परा संरक्षिता। सा च ग्रन्थाध्ययन-समाश्रयणादि वृत्तान्तमयी श्रीबालधन्वि जग्गुशिङ्गराचार्यलिखिता तालपत्रेषु लभ्यते।

महाचार्यः स्वजीवने साधितानि - चोळसिंहपुरेऽग्रहादिनिर्मणम्, घटिकाद्रि-संरक्षणम्, पञ्चग्रामनिर्वहणम्, रामरायराज्ञः मृतस्याश्वस्य नृसिंहमन्त्रजप्ततीर्थप्रोक्षणात् जीवितप्रदानम्, राज्ञा तु तुष्टेन दत्ते अश्वरेवन्तपुरप्रान्ते निवासः, सर्वविद्योपदेशः शिष्य-समूहप्रवर्तनम्, गृहार्चायां वेङ्कटेशनृसिंहहयग्रीवकृष्णयतिराजसंपत्कुमाराणां निरन्तर-माराधनम्। कुलशेखरसूरिसंस्तुते दक्षिणचित्रकूटक्षेत्रे शैवजनैरन्तर्धापितस्य गोविन्दराज-विष्णोः वरणभित्तिं लिङ्गस्फोटननृसिंहमन्त्रेणाभिमन्त्रिताभिरङ्गुल्यग्रक्षिप्ताभिः लघुशिला-

शर्कराभिर्विशीर्णां कृत्वा, वादागतमप्पयदीक्षितेन्द्रं वादे पराजित्य, मित्रीकृतेन तेन सुन्दराचलसुन्दरविष्णुगिरिसोपानपंक्तौ अष्टादशतमे सोपाने वसन्त्याः क्षुद्रदेवताया अग्रे नारायणपरत्वविषये सत्यप्रतिज्ञां नारायणपरं कारयित्वा, अद्वैतदीपिकाख्यप्रमाणग्रन्थादीन् चण्डमारुतग्रन्थेन शमयित्वा, श्रीमुष्णे आपत्सन्यासाश्रमं स्वीकृत्य शाण्डिल्ययोगेन श्रीवैकुण्ठं नित्यं परलोकं गतः। नापितकृतस्वश्मश्रुकेशानां सुवर्णीकरणप्रभावः, किम्पाक फलानां मधुरत्वम्, नाना जनेभ्य इष्टवरप्रदानम्, निम्बवृक्षस्य मोक्षः, वन्ध्यायाः सत्पुत्रवरप्रदानम्, चित्रकूटे गोपुरादिनिर्माणम्, श्रीमुष्णे निर्जलस्थले जलोत्सवोद्भावनम्, गिरिशिखरेषु हनूमद्वदुत्प्लवनम्, विजयनगरे पद्भ्यामेव तुङ्गभद्राह्रदसन्तरणम्, राज्ञे दिव्यकिरीटमुत्पाद्य प्रदानम्, महतः शिलास्तम्भस्यैकहस्तेनोत्तोलनम्, नानाप्रजानां नानाविध-व्याधिनिवारणम्, भगवद्वेङ्कटेशदत्तसुदर्शनधारणम्, स्वप्नेषु नृसिंहरामानुजानामनुग्रहप्राप्तिः, मासमण्डलपर्यन्तं निराहारतप इत्यादीनि माहात्म्यानि तत्र तत्राधुनापि जनैः परम्परया स्मर्यमाणानि सन्ति।

देशः - **अभिजनः** - यादवाद्रिः। **जन्मस्थलम्** - द्राविडोत्तरे तोण्डैमण्डले एरुम्बि नामकं अश्वरेवन्तपुरम्। **निवासः** - काञ्ची, श्रीरङ्गम्, तिरुपतिः, तिरुनारायणपुरम्, श्रीमुष्णम् तिरुचित्रकूटनगरम्, विजयनगरम् इत्यादिकम्। **परमपदस्थलम्** - श्रीमुष्णे नित्यतीर्थतीरे वृक्षाधः।

श्रीमुष्णे नित्यतीर्थाकरतटविलसन्मण्डपेऽब्धे प्लवंगे
कृष्णाष्टम्यां तुलायां वसति च तपने श्रीमहादेशिकार्यः ।
पश्यंस्तां सूरिसूक्तिं तदुचितनिगमाध्यापकेष्वादरोक्त्या
ध्यायन् स्वार्याङ्घ्रिपद्मं मधुरिपुनिलयं प्राप मध्याह्नकाले।।

इत्थं विशिष्टाद्वैतसिद्धान्तं स्थापयन् महाचार्यः श्रीमुष्णक्षेत्रं जगाम। तत्र प्लवंगनामसंवत्सरे तुलाकृष्णाष्टम्यां पुनर्वसुनक्षत्रे स्थिरवासरे (३-१०-१६०७) नित्यतीर्थपुष्करिणीतीरे द्रमिडोपनिषदमनुसन्धानः आचार्यसूक्तिमाचार्यञ्च ध्यायन्नेव शाण्डिल्ययोगेन परमं पदमवाप।।

अद्वैतविद्याविजये उपयुक्तग्रन्थानां संकेतसूची
(Abbreviations)

ग्रन्थनाम	संकेतः
अथर्वशिखोपनिषत्	अथर्वशिखा.उप
अमरकोशः	अमर
आत्मप्रबोधोपनिषत्	आ.प्र.उ.
ऋग्वेदसंहिता	ऋग्वेद
कठोपनिषत्	कठ.उ
केनोपनिषत्	केन.उ
कैवल्योपनिषत्	कै.उ
छान्दोग्योपनिषत्	छा.उ
ताण्ड्यमहाब्राह्मणम्	ता.ब्रा
तैत्तिरीयब्राह्मणम्	तै.ब्रा
तैत्तिरीयसंहिता	तै.सं
तैत्तिरीयारण्यकम्	तै.आरण्य
तैत्तिरीयोपनिषत्	तै.उ
नारदपुराणम्	ना.पु
नारायणाथर्वोपनिषत्	ना.अ.शि.उ
नृसिंहपूर्वतापनीयोपनिषत्	नृ.पू.ता.उ
नृसिंहोत्तरतापनीयोपनिषत्	नृ.उ.ता.उ
पाणिनिसूत्रम्	पाणिनि.सू
पाद्मपुराणम्	पाद्म.पु
पुरुषसूक्तम्	पु.सू
प्रश्नोपनिषत्	प्र.उप
बृहदारण्यकोपनिषत्	बृ.उ
ब्रह्मबिन्दूपनिषत्	ब्र.बिन्दु.उ
ब्रह्मसूत्रम्	ब्र.सू
भगवद्गीता	भ.गी

ग्रन्थनाम	संकेतः
भागवतमहापुराणम्	भा.पु
मनुस्मृतिः	मनु.स्मृ
मन्त्रोपनिषत्	मन्त्र.उ.
महानारायणोपनिषत्	म.ना.उ
महाभारते आनुनासिकपर्व	महा.आनु
महाभारते वनपर्व	महा.वन
महाभारते भीष्मपर्व	महा.भीष्म
महाभारते शान्तिपर्व	महा.शान्ति
महाभारते सभापर्व	महा.सभा
महापनिषत्	महो.उ
माण्डूक्योपनिषत्	मा.उ.
मुण्डकोपनिषत्	मु.उ
मैत्रायणीयोपनिषत्	मै.उ
वराहपुराणम्	वराह.पु
विशिष्टाद्वैतकोशः	वि.कोश
विष्णुपुराणम्	विष्णु.पु
विष्णुधर्मपुराणम्	वि.ध.पु
विष्णुस्मृतिः	विष्णु.स्मृ
विष्णुसहस्रनामस्तोत्रम्	वि.स.स्तो
वैजयन्तीकोशः	वैज.कोशः
श्वेताश्वतरोपनिषत्	श्वे.उप
सुबालोपनिषत्	सु.उ
श्रुतप्रकाशिका	श्रु.प्र

अद्वैतविद्याविजये उपयुक्तमुख्यग्रन्थाः

(Select Bibliography)

अमरकोशः	Kendriya Sanskrit Vidyapeetha, Tirupati,1981
ईशावास्योपनिषत्	Academy of Sanskrit Research, Melukote, 1991
उपनिषत्संग्रहः	Motilal Banarsidass, Chennai, 1970, 2006
केनोपनिषत्	Academy of Sanskrit Research, Melukote, 1986
केनोपनिषत्पुरुषसूक्तश्रीसुक्तभाष्यम्	UbhayaVedanta Grantamala,Madras,1972
छान्दोग्योपनिषत् (१-२)	Academy of Sanskrit Research, Melukote, 2009
तैत्तरीयोपनिषत्	Academy of Sanskrit Research, Melukote, 2005.
तैत्तिरीयब्राह्मणम्	The Baptist mission press, Calcutta,1862
तैत्तिरीयारण्यकम्	The Baptist mission press, Calcutta,1872
नारदपुराणम्	Samskriti samsthan, Bareli, 1971
पाणिनिसूत्रम्	Chowkhamba Vidyabhavan, Varanasi.
पाद्मपुराणम्	Anandasrama Press, Pune
पाराशर्यविजयः	Srirangam Srimad Andavan Ashramam, Chennai,2015
ब्रह्मविद्याविजयः	Candamaruta Mahacharya Grantasamraksana Samstha, 2017.
ब्रह्मसूत्रम्	Academy of Sanskrit Research, Melukote, 1989
बृहदारण्यकोपनिषत्	Academy of Sanskrit Research, Melukote, 1995
भगवद्गीता	Gita Press, Gorakhpur, 2000
भागवतमहापुराणम्	Nag Publishers, Delhi, 2004-2007
मनुस्मृतिः	Academy of Sanskrit Research, Melukote, 2006
महाभारतम्	Gita Press, Gorakhpur.
माण्डूक्योपनिषत्	Academy of Sanskrit Research, Melukote
मुण्डकोपनिषत्	Academy of Sanskrit Research, Melukote, 2005
वराहपुराणम्	Lachhmandas, Delhi, 1984.
वाल्मीकिरामायणम्	Gita Press, Gorakhpur, Fourth Edition
विशिष्टाद्वैतकोशः	Academy of SR, Melukote.
विष्णुपुराणम्	Gita Press, Gorakhpur, 1990.
विष्णुस्मृतिः	Chowkhamba Vidyabhavan, Varanasi, 1962
वैजयन्तीकोशः	Chowkhamba Bharati Academy,2008.
शतपथब्राह्मणम्	Satya Press, Calcutta
श्वेताश्वतरोपनिषत्	Academy of Sanskrit Research, Melukote,
हरिवंशपुराणम्	Nag Publishers, Delhi, 1998
Concordance to the Principal Upanishads and Bhagavadgita	G.A. Jacob, Motilal Banarasidass, Delhi, 1999

अद्वैतविद्याविजयग्रन्थमातृकाकोशविवरणम्

(Manuscripts consulted in this Critical Edition)

प्रधानकोशः राष्ट्रीयसंस्कृतविश्वविद्यालयः, तिरुपति (R.S.V., Tirupathi) तालपत्रसंख्या - १५६४, ग्रन्थलिपिः, संपूर्णः।

(क) अनन्ताचार्यभारतीयशोधसंस्था, मुंबापुरी (A.I.R.I., Mumbai) तालपत्रसंख्या - 01A - ग्रन्थलिपिः, संपूर्णः।

(ख) अनन्ताचार्यभारतीयशोधसंस्था, मुंबापुरी (A.I.R.I., Mumbai) तालपत्रसंख्या - २६- ग्रन्थलिपिः, संपूर्णः।

(ग) डा०.श्री.उ.वे. तिरुनारायणपुरम् अरैयर् श्रीरामशर्मस्वामिनः तालपत्रकोशः, ग्रन्थलिपिः, असंपूर्णः।

(घ) अनन्ताचार्यभारतीयशोधसंस्था, मुंबापुरी (A.I.R.I. Mumbai) देवनागरीलिपिः, कागजपत्रम्, संपूर्णः। अस्य मातृकाकोशः तालपत्रसंख्या - १००, मैसूरु पुस्तकालयतः तिरुवेङ्कटाचार्यैः न्यासीकृतः इति निर्दिष्टः।

(ङ) राजकीयप्राच्यकोशागारः, मैसूरु (O.R.I., Mysore) तालपत्रसंख्या - ५०४१, तेलुगुलिपिः, संपूर्णः।

(च) लालबहादुर्शास्त्री विश्वविद्यापीठम्, कागजपत्रम्, देवनागरीलिपिः, संपूर्णः।

(छ) श्रीवेङ्कटेश्वरप्राच्यशोधसंस्था, तिरुपति (S.V.O.R.I, Tirupathi) तालपत्रसंख्या - १९३३, तेलुगुलिपिः, संपूर्णः।

(ज) श्रीवेङ्कटेश्वरप्राच्यशोधसंस्था, तिरुपति (S.V.O.R.I., Tirupathi) तालपत्रसंख्या - २१४८, तेलुगुलिपिः असंपूर्णः।

वाधूलश्रीनिवासार्यतनयं विनयाधिकम्। प्रज्ञानिधिं प्रपद्येऽहं श्रीनिवासमहागुरुम्।।
चण्डमारुतवेदान्तविजयादिस्वसूक्तिभिः। वेदान्तरक्षकायास्तु महाचार्याय मङ्गलम्।।

चण्डमारुत-महाचार्यविरचिते वेदान्तविजये चतुर्थः

अद्वैतविद्याविजयः

१. उपोद्घातः[१]

द्वैतोपनिषदा सार्धं श्रुतयोऽद्वैतगोचराः।
घटकश्रुतिसंयुक्ताः सद्विद्यामनुरुन्धते।।

द्वैतश्रुतिभिः चिदचिदीश्वरभेदप्रतिपादनेन विशेषणविशेष्यभेदः प्रतिपाद्यते। घटकश्रुतिभिः विशेषणविशेष्यवैशिष्ट्यम्। अद्वैतश्रुतिभिस्तु [२]"**ऐतदात्म्यमिदं सर्वम्**' इति कृत्स्नस्यापि भगवदात्मकत्वप्रतिपादनेन सिद्धं विशिष्टाद्वैतं प्रतिपाद्यते।

तथा हि द्वैतश्रुतयस्तावत् प्रश्नोपनिषदि पञ्चमे खण्डे - [३]"**यः पुनरेतं त्रिमात्रेण ओमित्येतेनैवाक्षरेण परमपुरुषमभिध्यायीत, स तेजसि सूर्ये संपन्नो यथा पादोदरस्त्वचा विनिर्मुच्यते। एवं ह वै स पाप्मना विनिर्मुक्तस्स सामभिरुन्नीयते ब्रह्मलोकम्। स एतस्माज्जीवघनात् परात्परं पुरिशयं पुरुषमीक्षत**' इति जीव एवाचितः परः, तस्मात् **परः** - [४]परमपुरुषः सः '**सामभिरुन्नीयत**' इति च मोक्षे भेदः प्रतिपाद्यते। नेतॄणां नयनस्य साम्नां ब्रह्मलोकस्य च स्वरसतो भेदावगमात्। कठवल्ल्यां तृतीयखण्डे - [५]"**सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्**' इति ज्ञानेनेदानीं प्राप्यस्य पूर्वसिद्धप्राप्तुश्च भेदः स्फुटः। चतुर्थे खण्डे -

---

[१] अयं प्रस्तावनारूपो भागः 'विशिष्टाद्वैतसिद्धिः' इति विद्वद्वरिष्ठानां तिरुनारायणपुरवासिनां अरैयर् श्रीरामशर्मणामभिप्रायः।

[२] स यथा तत्र नादाह्यैतैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति तद्धास्य विजज्ञाविति विजज्ञाविति। (छा.उ.६.१६.३)

[३] प्र.उ.५.५

[४] क, च - परः पुरुषः

[५] विज्ञानसारथिर्यस्तु मनः प्रग्रहवान्नरः।

[1]'**यथोदके शुद्धे शुद्धमासिक्तं तादृगेव भवति।**
एवं मुनेर्विजानत आत्मा भवति गौतम'

इति भगवन्तं प्राप्तस्तत्साम्यमुपैतीत्यर्थः। पञ्चमे खण्डे -

[2]'**नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्।**
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम्' इति।

मुण्डकोपनिषदि द्वितीये खण्डे - [3]'**सूर्यद्वारेण ते विरजाः प्रयान्ति यत्रामृतस्स पुरुषो ह्यव्ययात्मा**' इति। पञ्चमे खण्डे -

[4]'**समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः।**
जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः।'

[5]'**यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम्।**
तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति' इति।

[6]'**तस्मादात्मस्थम् ह्यर्चयेद्भूतिकाम**' इति च। षष्ठे -

[7]'**यथा नद्यः स्यन्दमानास्समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय।**
तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्।।

[8]'**स यो ह वै तत्परं ब्रह्म वेद ब्रह्मैव भवति**' इति।

सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्।। (कठ.उ.१.३.९)

[1] **यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति।**
एवं मुनेर्विजानत आत्मा भवति गौतम।। (कठ.उ.२.१.१५)

[2] कठ.उ.२.२.१३

[3] तपः श्रद्धे ये ह्युपवसन्त्यरण्ये शान्ता विद्वांसो भैक्षचर्यां चरन्तः।
सूर्यद्वारेण ते विरजाः प्रयान्ति यत्रामृतस्स पुरुषो ह्यव्ययात्मा।। (मु.उ.१.२.११)

[4] मु.उ.३.१.२

[5] मु.उ.३.१.३

[6] यं यं लोकं मनसा संविभाति विशुद्धसत्त्वः कामयते यांश्च कामान्।
तं तं लोकं जयते तांश्च कामान् **तस्मादात्मज्ञं ह्यर्चयेद्भूतिकामः**।। (मु.उ.३.१.१०)

[7] मु.उ.३.२.८

[8] **स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति** नास्या ब्रह्मकुले भवति।
क्षरति शोकं तरति पाप्मानं गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति।। (मु.उ.३.२.९)

१. उपोद्घातः

अत्र 'एव' शब्द इवार्थः। [१]"**परमं साम्यमुपैति**' इति पूर्वानुसारात् वाक्यशेषानुसाराच्च। तत्र हि नदीसमुद्रदृष्टान्तः प्रतिपादितः। न हि तत्राभेदोऽस्ति, किन्तु नामरूपकृतभेदाभाव एव, [२]"**स्पर्धमानो विष्णुरेव भूत्वेमान् लोकानभिजयति**' [३]"**विष्णुक्रमान् क्रमते विष्णुरेव भूत्वा, इमान् लोकानभिजयति**' इत्यादिवत्। न हि तत्र पश्वालम्भनादिमात्रात् विष्णुतादात्म्यम् उपपद्यते। इववत् [४]"**वैवमेव**' इति नैघण्टुकाश्च पठन्ति, अन्यथा नैरर्थ्यक्यात्। वस्तुतस्तु अवधारणार्थ एवायमेवकारः, स्वारस्यात् परमसाम्यश्रुत्यनुग्रहाच्च। सौसादृश्यविवक्षया हि सेनान्यां राजैवायमिति [५]त्वरितं वक्तारो भवन्तीत्यत्र ह्यवधारणार्थ एवकारः सौसादृश्यं द्योतयति। ननु '**ब्रह्मैव भवति**' इत्यत्र ब्रह्म भवति, नत्वब्रह्म भवतीत्यवधारणार्थः। ततश्च काल्पनिकब्रह्मभेदनिवृत्तावधारणस्य तात्पर्यमिति चेत्तथा सति ब्रह्मभावः पुरुषार्थो न स्यात्।

ननु भेददशायां सिद्धोऽप्यनवच्छिन्नानन्दब्रह्मभावोऽप्रयोजनकल्पो भवति। काल्पनिकभेदनिवृत्तावेव सम्यक् प्रयोजनत्वलाभ इति भेदनिवृत्तेरपि तादर्थ्यात् ब्रह्मभाव एव पुरुषार्थ इति चेत्, तत्र केयमप्रयोजनकल्पता? किं लब्धेऽपि तत्प्रयोजने ततोऽप्युत्कृष्टप्रयोजनेच्छासहत्वम्, अथाप्रयोजनत्वबुद्धिः, उत प्रयोजनत्वबुद्ध्यभावः?

नाद्यः, भेदबुद्धेरेव तादृशप्रयोजनहेतुतया[६] तन्निवृत्तौ तदसिद्धेः। कथं भेदनिवृत्तये तत्त्वज्ञाने प्रवृत्तिः परमपुरुषार्थोत्सादकरत्वात्। स्वरूपमात्रात् स्वतस्सिद्धादानन्दात् वैषयिकसुखमत्यल्पमपि हि परमपुरुषार्थः।

न चोत्कृष्टसुखत्वेऽपि [१]अनित्यतया तस्यापुरुषार्थता, अनित्यताया अपुरुषार्थता-प्रयोजकत्वाभावात्। नित्यसुखविरोधे तु स्यादपि, न च सोऽस्ति नित्यत्वादेव।

---

[१] मु.उ.३.१.३

[२] देवासुरा एष लोकेष्वस्पर्धन्त स एतं विष्णुर्वामनपश्यत्तं स्वायै देवताया आलभत ततो वै स इमाँल्लोकानभ्यजयत् वैष्णवं वामनमालभेत **स्पर्धमानो विष्णुरेव भूत्वेमान् लोकानभिजयति** विषम आलभेत विषमा इव हीमे लोकाःसमृद्ध्या इन्द्राय मन्युमते मनस्वते ललामं प्राशृङ्गमा लभेत संग्रामे।। (तै.सं.२.१.३.१)

[३] **विष्णुक्रमान् क्रमते विष्णुरेव भूत्वा** यजमानः छन्दोभिः **इमाँल्लोकानपजय्य अभिजयति**। (तै.सं.१.७.५.४)

[४] साम्ये च वैवमेवेव। (वैज.कोशः.८.८.१५)

[५] क, ख, च, छ - त्वरिता

[६] ङ - प्रयोजने हेतुतया; घ - प्रयोजनेच्छाहेतुतया

न च दुःखमिश्रत्वादपुरुषार्थता, तथा सति दुःखाभावार्थं प्रवृत्तिरित्यापत्त्या दुःखाभावस्यैव पुरुषार्थत्वापत्तेः।

नेतरौ, स्वरूपात्मके स्वरूपानन्दानुभवे जाग्रति तयोरसंभवात्। उक्तञ्च त्वयैव स्वरूपानन्दानुभवेन स्वरूपस्यैव परमप्रेमास्पदत्वमिति। मन्त्रोपनिषदि प्रथमे खण्डे -

[२]'**पिबन्त्येनामविषमामविज्ञाताः कुमारकाः।**

एकस्तु पिबते देवः स्वच्छन्दोऽत्र वशानुगाम्' इति।

द्वितीये खण्डे - [३]'**ये विदुर्ब्राह्मणास्तथा। अत्रैव ते लयं यान्ति**' इति। अत्र [४]'**तस्मिन्नेव लयं यान्ति स्रवन्त्यः सागरे यथा**' इति पूर्ववाक्योक्तलयस्यैव प्रत्यभिज्ञानात् जीवब्रह्मणोर्भेदसिद्धिः।

दहरविद्यायां [५]'**परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत**' इति। सुबालोपनिषदि तृतीये खण्डे [६]'**ब्रह्मैव सन् ब्रह्माप्येति**' इति एवकार [७]इवार्थः पूर्ववत्।

स्वाभाविकब्रह्मभावे सत्येवेदानीं ब्रह्मप्राप्तिः प्रतिपाद्यत इति तु व्याख्यानमसंगतम्। ब्रह्मभावस्य स्वाभाविकत्वे साध्यत्वायोगात्।

---

[१] ख - अनित्यत्वात्

[२] मन्त्र.उ.६

[३] ब्रह्म ब्रह्मेत्यथायान्ति **ये विदुर्ब्राह्मणास्तथा।**
अत्रैव ते लयं यान्ति लीनाश्चाव्यक्तशालिनः इत्युपनिषत्।। (मन्त्र.उ.२०)

[४] यस्मिन् सर्वमिदं प्रोतं ब्रह्म स्थावरजङ्गमम्।
तस्मिन्नेव लयं यान्ति स्रवन्त्यः सागरे यथा।। (मन्त्र.उ.१७)

[५] अथ य एष संप्रसादोऽस्माच्छरीरात् समुत्थाय **परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते**, एष आत्मेति होवाच एतदमृतमभयमेतद्ब्रह्मेति। तस्य ह वा एतस्य ब्रह्मणो नाम सत्यमिति। (छा.उ.८.३.४.)

अशरीरो वायुः; अभ्रं विद्युत् स्तनयित्नुः अशरीराण्येतानि। तद्यथैतान्यमुष्मादाकाशात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते। एवमेवैष संप्रसादो अस्मात् शरीरात् समुत्थाय परञ्ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत स उत्तमः पुरुषः। (छा.उ.८.१२.२)

[६] न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते, **ब्रह्मैव सन् ब्रह्माप्येति**, य एवं वेद। (सु.उ.३)

[७] ख, छ - इवार्थकः

१. उपोद्घातः

ननु '**अप्येति**' इति लयो हि प्रतिपाद्यते। ततश्च मृद एव सतो घटद्रव्यस्य घटत्वावस्थाप्रहाणेन मृदि लयवत् ब्रह्मण एव सतो जीवस्य [१]जीवावस्थाप्रहाणेन ब्रह्मणि लयः प्रतिपाद्यत इति चेन्न, यद्यप्ययमर्थो **यादवमते** संभवति तथापि ब्रह्मैव सन्नित्यस्य प्रयोजनाभावान्नायमर्थो युक्तः। ततश्च ब्रह्मसादृश्यं ब्रह्मप्राप्तिश्चेत्युभयमिह साध्यत्वेन प्रतिपाद्यते।

श्वेताश्वतरे प्रथमे खण्डे - [२]'**पृथगात्मानं प्रेरितारञ्च मत्वा जुष्टस्ततः तेनामृतत्वमेति**' इति [३]'**ज्ञाज्ञौ द्वावजावीशनीशौ**' इति। [४]'**क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एक**' इति। [५]'**भोक्ता भोग्यं प्रेरितारञ्च मत्वा सर्वं प्रोक्तं त्रिविधं** [६]**ब्रह्मम् एतत्**' इति च। चतुर्थे -

[७]'**द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।**
तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्योऽभिचाकशीति।।'
[८]'**समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः।**
जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक' इति।

[९]'**अस्मान्मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया संनिरुद्ध**' इति च। पञ्चमे - [१०]'**क्षरं त्वविद्या ह्यमृतं तु विद्या विद्याविद्ये ईशते यस्तु सोऽन्य**' इति। षष्ठे **-**

---

[१] घ, ङ - जीवत्वावस्थाप्रहाणेन

[२] सर्वाजीवे सर्वसंस्थे बृहन्ते अस्मिन् हंसो भ्राम्यते ब्रह्मचक्रे।
पृथगात्मानं प्रेरितारञ्च मत्वा जुष्टस्ततस्तेनामृतत्वमेति।। (श्वे.उ.१.६)

[३] **ज्ञाज्ञौ द्वावजावीशनीशौ** अजा ह्येका भोक्तृभोगार्थयुक्ता।
अनन्तश्चात्मा विश्वरूपो ह्यकर्ता त्रयं यदा विन्दते ब्रह्ममेतत्।। (श्वे.उ.१.९)

[४] **क्षरं प्रधानममृताक्षरं हरः क्षरात्मानाविशते देव एकः**।
तस्याभिध्यानाद्योजनात्तत्त्वभावात् भूयश्चान्ते विश्वमायानिवृत्तिः।। (श्वे.उ.१.१०)

[५] एतज्ज्ञेयं नित्यमेवात्मसंस्थं नातः परं वेदितव्यं हि किञ्चित्।
भोक्ता भोग्यं प्रेरितारञ्च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत्।। (श्वे.उ.१.१२)

[६] ब्रह्मम् इति छान्दसं रूपम् (श्रीरङ्गरामानुजमुनिव्याख्या)।

[७] श्वे.उ.४.६; मु.उ.३.१.२

[८] श्वे.उ.४.७; मु.उ.३.१.२

[९] छन्दांसि यज्ञाः क्रतवो व्रतानि भूतं भव्यं यच्च वेदा वदन्ति।
अस्मान्मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया संनिरुद्धः।। (श्वे.उ.४.९)

[१०] द्वे अक्षरे ब्रह्मपरे त्वनन्ते विद्याविद्ये निहिते यत्र गूढे।

[1]‘**तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतम्।**
पतिं पतीनां परमं परस्ताद्विदाम देवं भुवनेशमीड्यम्’ इति।
[2]‘**स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः**’ [3]‘**नित्यो नित्यानाञ्चेतनश्चेतानामेको बहूनां यो विदधाति कामान्**’ [4]‘**प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबन्धहेतुः**’ इति च।

बृहदारण्यके चतुर्थेऽध्याये चतुर्थे ब्राह्मणे - [5]‘**स यथा सैन्धवखिल्य उदके प्रास्त उदकमेवानुविलीयते, न हास्योद्ग्रहणायैव स्यात्, यतो यतस्त्वाददीत लवणमेव एवं वा, इदं महद्भूतमनन्तमपारं विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति, न प्रेत्य संज्ञास्ति**’ इति।

अनेन वाक्येन मुक्त्यवस्था प्रतिपाद्यते। विज्ञानघनो जीवः, पञ्चभूतमयं देहं विसृज्य तद्विशरणानन्तरक्षण एव, **महद्भूतम्** - महति भूते, परमात्मनि, **विनश्यति** - लीनो भवति, देवादि नामरूपप्रहाणादित्यर्थः। अविलम्बप्रतिपादनाय [6]‘**तानि अनु**’ इत्युक्तिः, जीववियोगोत्तरक्षण एव शरीरविशरणं भवति, तदुत्तरक्षण एव ब्रह्मप्राप्तिः भवतीति, न विलम्ब इति भावः।

देवादिवैजात्यप्रहाणात् परमसाम्यापत्तेश्चात्यन्तवैधर्म्याग्रहणं शेषत्वादिकतिपय-वैधर्म्यग्रहणञ्चाभिप्रेत्य तदनुगुणं दृष्टान्तमाह - ‘**स यथा सैन्धवखिल्य**’ इति। **सैन्धव-खिल्यः** - सैन्धवघनः [7]लवणपिण्डः **अस्य** - प्रासितुः। अत्र लयप्रतिपादनेन रूपतो

क्षरं त्वविद्या ह्यमृतं तु विद्या विद्याविद्ये ईशते यस्तु सोऽन्यः।। (श्वे.उ.५.१)

[1] श्वे.उ.६.७

[2] न तस्य कश्चित् पतिरस्ति लोके न चेशिता नैव च तस्य लिङ्गम्।
स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः।। (श्वे.उ.६.९)

[3] नित्यो नित्यानां चेतनश्चेतानामेको बहूनां यो विदधाति कामान्।
तत्कारणं सांख्ययोगाधिगम्यं ज्ञात्वा देवं मुच्यते सर्वपाशैः।। (श्वे.उ.६.१३)

[4] स विश्वकृद्विश्वविदात्मयोनिर्ज्ञः कालकालो गुणी सर्वविद्यः।
प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबन्धहेतुः।। (श्वे.उ.६.१६)

[5] बृ.उ.४.४.१२

[6] ङ - तान्येवानु

[7] ख - लवणखण्डः

वैधर्म्यग्रहणाभावः प्रतिपादितः '**यतो यत**' इति। आदिमध्यान्ताचामेषु रसतो वैधर्म्यं गृह्यत इति भावः। उद्ग्रहणायोग्यत्वप्रतिपादनेनापुनरावृत्तिर्व्यज्यते। 'अस्य' इति। संयोजकस्यापि न पृथग्भावकरणसामर्थ्यमिति प्रतिपादनेन स्वप्राप्तिप्रदस्यापि भगवतः पुनरावृत्तौ न सामर्थ्यमिति गम्यते।

अस्य वाक्यस्याभेदपरत्वे [१]दृष्टान्तवैघट्यम्, न प्रेत्येत्यादिवाक्यवैयर्थ्यञ्च। षष्ठेऽध्याये चतुर्थे ब्राह्मणे - [२]'**ब्रह्मैव सन् ब्रह्माप्येति**' इति। अष्टमेऽध्याये द्वितीये ब्राह्मणे - [३]'**तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति तेषां न पुनरावृत्तिः**' इति। **परावतः** - परवन्तः भगवत्परतन्त्रा इत्यर्थः।

तापनीये - [४]'**देहान्ते तमसः परं धाम प्राप्नुयात्, यत्र विराजा नृसिंहोऽव-भासते तत्र खलूपासते तत्सरूपाः सदृशो मुनयः, आकल्पान्तं ततस्तस्मिन्नेवात्मनि लीयन्ते न च पुनरावर्तन्त**' इति, यत्र नृसिंहोऽवभासते तद्धाम प्राप्नुयादित्यन्वयः। तत्र हेतुमाह - **तत्र खलु** इति परमव्योम्नि द्योतमानतयोपासत इत्यर्थः, यथोपासनं हि फलमिति भावः। **सरूपाः** - सदृशा इति, '**परमं साम्यमुपैति**' इति श्रुतिप्रतिपन्नं परमसाम्यमुक्तम्। **आकल्पान्तम्** - सर्वदेत्यर्थः, आकल्पं कार्यलोकविशेष एव, नृसिंहाधिष्ठिते चिरं

---

[१] ख - दृष्टान्तवाक्यवैघट्यम्

[२] तदेष श्लोको भवति - तदेव सक्तः सह कर्मणैति लिङ्गं मनो यत्र निषक्तमस्य। प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम्। तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मणे । इति नु कामयमानः। अथाकामयानः योऽकामो निष्काम आप्तकामः न तस्य प्राणा उत्क्रामन्ति, **ब्रह्मैव सन् ब्रह्माप्येति**। (बृ.उ.६.४.६)

[३] ते ये एवमेतद्विदुर्ये चेमे अरण्ये श्रद्धां सत्यमुपासते, तेऽर्चिरभिसम्भवन्ति, अर्चिषोहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षण्मासानुदङ्ङादित्य एति, मासेभ्यो देवलोकम्, देवलोकादित्यम्, आदित्याद्वैद्युतम्। तान् वैद्युतात् पुरुषो मानस एत्य ब्रह्मलोकान् गमयति। **तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति तेषां न पुनरावृत्तिः**। (बृ.उ.८.२.१५)

[४] मन्त्रराजजापकेन तत्समं तद्वा एतत्परमं धाम मन्त्रराजाध्यायकस्य यत्र सूर्यो न तपति, यत्र न वायुर्वाति, यत्र चन्द्रमास्तपति, यत्र न नक्षत्राणि भान्ति, यत्र नाग्निर्दहति, यत्र न मृत्युः प्रविशति, यत्र न दुःखं. सदानन्दं परमानन्दं शाश्वतं शान्तं सदाशिवं ब्रह्मादिवन्दितं योगिध्येयं यत्र गत्वा न निवर्तन्ते योगिनः। तदेतदृचाभ्युक्तम् तद्विष्णोः परमं पदँ सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्। तद्विप्रासो विपन्यवो जागृवांसः समिन्धते। विष्णोर्यत्परमं पदमिति तदेतन्निष्कामस्य भवति, तदेतन्निष्कामस्य भवति। (नृ.पू.ता.उ.५.८.३)

तमुपास्य, कल्पान्ते [1]परमां मुक्तिम् प्राप्नुवन्तीत्येवं तात्पर्यवर्णनेऽपि, नृसिंह एव लयश्रवणान्मुक्तौ भेदसिद्धिरनिवार्या।

अपि च सर्वत्र मुक्तिगोचरलयपदानां [2]"**स यथा सैन्धवखिल्य**' इत्यादि वाक्यप्रतिपन्नार्थपरत्वाच्च भेदसिद्धिः।

तापनीये पञ्चमोपनिषदि - [3]'**तद्विष्णोः परमं पदँ सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्। तद्विप्रासो विपन्यवो जागृवाँसस्समिन्धते। विष्णोर्यत्परमं पदम्**' इति।

मैत्रायणीयोपनिषदि - [4]"**तस्मिन्नेव यजमानास्सैन्धवघन इव व्लीयन्त्येषा वै ब्रह्मैकता नामात्र हि सर्वे कामास्समाहिता**' इति सैन्धवघन इति। यथा सैन्धवघन उदके प्रास्तः, तत्र लयं प्राप्नोति तत्समानरूपतया दुर्ग्रहविवेको भवति, रसविशेषेण विवेक्तुं च योग्यः, तद्वत् ब्रह्मणि लीनोऽपीति भावः। अत्र च ब्रह्मैकतानुवादेन लयरूपताविधिः प्रतीयते।

तदयं भावः सर्वेषु मोक्षप्रकरणेषु [5]"**ब्रह्म वेद ब्रह्मैव भवति**' इत्यादि रूपेणाभेद-प्रतिपादकत्वेन प्रतीयमानानां वाक्यानामयमेवार्थ इति। [6]भूमविद्यायां प्रथमतो भूमानमुपदिश्यानन्तरं विधीयमानमहंग्रहणोपासनं जिज्ञास्यतया भूम्न एव प्रकृतत्वात् तद्गोचरमेव। ततश्चाहमर्थाभेदादेव भूम्नोऽहंग्रहणोपासनं विधीयत इति जीवब्रह्माभेद-

---

[1] क, ख - परममुक्तिम्; च - परां मुक्तिम्

[2] बृ.उ.४.४.१२

[3] नृ.पू.ता.उ.५.८.३

[4] नभसोऽन्तर्गतस्य तेजसोंऽशमात्रमेतद्यादादित्यस्य मध्ये उदित्वा मयूखे भवत एतत्सवित् सत्यधर्म एतद्यजुरेतत्तप एतदग्निरेतद्वायुरेतत्प्राण एतदाप एतच्चन्द्रमा एतच्छुक्रमेतदमृतमेतद्ब्रह्मविषयमेतत् भानुरर्णवः **तस्मिन्नेव यजमानास्सैन्धवघन इव व्लीयन्त एषा वै ब्रह्मैकताऽत्र हि सर्वे कामास्समाहिता** इत्यत्रोदाहरन्ति। (मै.उ.६.३५)

[5] मु.उ.३.२.९

[6] **भूमविद्या** - छान्दोग्ये - 'यो वै भूमा तत्सुखम्। नाल्पे सुखमस्ति। भूमैव सुखम्। भूमा त्वेव विजिज्ञासितव्य' इत्यन्तेन उपदिश्यमानमनवधिकातिशयसुखरूपब्रह्मोपासनम्। सर्वत्र आनन्दादयः प्रधानस्य' इत्युक्तरीत्या स्वरूपनिरूपकधर्माणामपि अनुसन्धानं वर्तत एव। (वि.को.७)

शङ्कोन्मेषनिवृत्तये उपदेशभेदेन जीवब्रह्मभेदं स्पष्टयितुं जीवोपदेशः कृतः। तदुपदेशेन च भेदेऽवधारिते अहंप्रकारतयैवाहंग्रहणोपासनमिति सिध्यतीति।

तथा हि [१]'**सुखं त्वेव विजिज्ञासितव्यम्**' इति जिज्ञास्यतयोक्तस्य [२]'**सुखं भगवो विजिज्ञास**' इति पृष्टस्य सुखविशेषस्य लक्षणमाह - [३]'**यो वै भूमा तत्सुखम्। नाल्पे सुखमस्ति। भूमैव सुखम्। भूमा त्वेव विजिज्ञासितव्य इति**' इति।

भूमशब्दो धर्मिपर्यन्तः, अल्पप्रतिसंबन्धिनिर्देशत्वात्, '**नाल्पे सुखमस्ति**' इत्यल्पे सुखत्वं नास्तीत्यर्थः। 'तज्ज्ञानमज्ञानमतोऽन्यदुक्तम्' इतिवन्निन्दार्थवादः।

यत्किञ्चिदपेक्षया बृहत्त्वस्येतरसाधारण्यात् पृच्छति - [४]'**भूमानं भगवो विजिज्ञास**' इति। उत्तरमाह - [५]'**यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यत् विजानाति स भूमा, अथ यत्रान्यत्पश्यति, अन्यच्छृणोति, अन्यद्विजानाति तदल्पम्। यो वै भूमा, तदमृतम्। अथ यदल्पं तन्मर्त्यम्**' इति।

यत्रेति विषयसप्तमी, यद्विषये सदृशं बृहदन्तरं न जानाति स भूमेत्यर्थः। राजादिमहिमाधीनस्थितित्वस्य प्रजासु दर्शनात् पृच्छति - '**स भगवः कस्मिन् प्रतिष्ठित**' इति। स्वेच्छाधीनस्थितिरित्याह - '**स्वे महिम्नि**' इति।

किञ्चिद्धि वस्तु कुत्रचिद्वर्तमानं दृश्यते, अतः कुत्रायं विद्यत इत्यभिप्रायेण पृच्छति [६]'**अन्यो ह्यन्यस्मिन् प्रतिष्ठित**' इति '**कस्मिन् प्रतिष्ठित**' इति प्रश्नोत्तरस्य '**उवाच**' इत्येतदन्तत्वस्य स्वरसतः प्रतीतेः प्रश्न एवायं युक्तः। अत्र प्रतिष्ठितशब्दः संबन्धमात्रपरः।

---

[१] यदा वै सुखं लभते, अथ करोति। नासुखं लब्ध्वा करोति। सुखमेव लब्ध्वा करोति। **सुखं त्वेव विजिज्ञासितव्यमिति। सुखं भगवो विजिज्ञास इति**। (छा.उ.७.२२.१)

[२] छा.उ.७.२२.१

[३] **यो वै भूमा तत्सुखम्। नाल्पे सुखमस्ति। भूमैव सुखम्। भूमा त्वेव विजिज्ञासितव्य इति**। भूमानं भगवो विजिज्ञास इति। (छा.उ.७.२३.१)

[४] छा.उ.७.२३.१

[५] यत्र नान्यत्पश्यति, नान्यच्छृणोति, नान्यद्विजानाति, स भूमा। अथ यत्रान्यत्पश्यति, अन्यच्छृणोति, अन्यद्विजानाति तदल्पम्। यो वै भूमा, तदमृतम्। अथ यदल्पं, तन्मर्त्यम्। **स भगवः कस्मिन् प्रतिष्ठित इति। स्वे महिम्नि**, यदि वा न महिम्नीति। (छा.उ.७.२४.१)

[६] गो अश्वमिह महिमेत्याचक्षते, हस्ति हिरण्यं दासभार्यं क्षेत्राण्यायतनानीति। नाहमेवं ब्रवीमीति होवाच, **अन्योह्यन्यस्मिन् प्रतिष्ठित इति**। (छा.उ.७.२४.२)

सर्वत्रेत्युत्तरमाह - [१]'**स एवाधस्तात् स उपरिष्टात् स पश्चात् स पुरस्तात् स दक्षिणतः स उत्तरत**' इति।

यद्वा अन्य इत्यादि '**स्वे महिम्नि**' इत्येतदुपपादकस्सन् प्रतिवचनशेष एवास्तु। '**अन्यो ह्यस्मिन् प्रतिष्ठित**' इत्युवाचेत्यन्वयः।

अस्मिन् पक्षेऽयं प्रतिष्ठितशब्दः पूर्वप्रतिष्ठितशब्दसमानार्थः भूम्नोऽन्यः खलु स्वस्मादन्यत्र प्रतिष्ठितः, न तु भूमापीत्यर्थः।

एवं '**यत्र नान्यत्**' '**स्वे महिम्नि**' इति च [२]'**न तत्समश्चाभ्यधिकश्च दृश्यत**' इत्ययमर्थ उक्तः। द्वितीययोजनायां '**स एवाधस्तात्**' इत्यादिना गुणान्तरमुच्यते। वक्ष्यमाणाहं-ग्रहणोपयोगितया सार्वात्म्यमुपक्षिपति [३]'**स एवेदँ सर्वम्**' इति।

एवं भूमानमुपदिश्य शोकपारतरणहेतुभूतं भूमगोचराहंग्रहणोपासनमुपदिशति [४]'**अथातोऽहंकारादेश एवाहमेवाधस्तादहमुपरिष्टादहं पश्चादहं पुरस्तादहं दक्षिणतः अहमुत्तरतोऽहमेवेदं सर्वमिति**' इति।

कारः कृतिः, अहमिति कृतिरहंकारः, अहमित्युपासनमित्यर्थः। एतदुत्थाप्य जीव-ब्रह्माभेदभ्रमं वारयितुमाह - [५]'**अथात आत्मादेश एवात्मैवाधस्तादात्मोपरिष्टादात्मा**

---

[१] **स एवाधस्तात् स उपरिष्ठात् स पश्चात् स पुरस्तात् स दक्षिणतः स उत्तरतः** स एवेदँ सर्वमिति। अथातोऽहंकारादेश एवाहमेवाधस्तादहमुपरिष्ठादहं पश्चादहं पुरस्तादहं दक्षिणतोऽहमुत्तरतः अहमेवेदं सर्वमिति। (छा.उ.७.२५.१)

[२] न तस्य कार्यं करणञ्च विद्यते **न तत्समश्चाभ्यधिकश्च दृश्यते**।
परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च।। (श्वे.उ.६.८)

[३] छा.उ.७.२५.१

[४] छा.उ.७.२५.१

[५] **अथात आत्मादेश एवात्मैवाधस्तादात्मोपरिष्ठादात्मा पश्चादात्मा पुरस्तादात्मा दक्षिणत आत्मोत्तरत आत्मैवेदँ सर्वमिति**। स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्, आत्म-रतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड् भवति तस्य सर्वेषु लोकेषु कामचारो भवति। अथ येऽन्यथातोविदुरन्यराजानस्ते क्षय्यलोका भवन्ति तेषाँ सर्वेषु लोकेष्वकामचारो भवति। (छा.उ.७.२५.२)

पश्चादात्मा पुरस्तादात्मा दक्षिणत आत्मोत्तरत आत्मैवेदँ सर्वमिति' इति। [१]'**अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि**' इति नामरूपव्याकरणस्य जीवानुप्रवेशनिबन्धनत्वोपदेशेन जीवप्रचुरत्वात् प्रपञ्चस्य '**आत्मैवाधस्तात्**' इत्याद्युपपदेशः। एवञ्च '**अथातोऽहङ्कारादेश**' इत्यनेन सर्वात्मत्वादहंप्रकारकभूमोपासनं विहितम्।

यदाह कश्चित् '**यत्र नान्यत्**' इत्यादिना निरस्तनिखिलभेदं वस्तु लक्ष्यते। **यत्र** - यस्मिन् वस्तुनि, **अन्यत्** - भिन्नं कार्यजातं न पश्यति इत्यादिना नामरूपात्मकभेद-प्रपञ्चप्रमाणस्य[२] निषिद्धत्वात्। अथ [३]'**यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यत् विजानाति तदल्पम्**' इति वस्त्वन्तरपरिच्छिन्नस्याल्पत्वं संकीर्त्य '**अथ यदल्पं तन्मर्त्यम्**' इति मर्त्यत्वेन '**नाल्पे सुखमस्ति**' इत्यसुखत्वेन वस्त्वन्तरपरिच्छिन्नस्य निन्दितत्वाच्च।

किञ्च '**स भगवः कस्मिन् प्रतिष्ठित**' इत्यादिना ब्रह्मणोऽप्यधिकरणमस्ति न वेत्याशङ्क्य, [४]'**नाहमेवं ब्रवीमीति स होवाच, अन्यो ह्यन्यस्मिन् प्रतिष्ठित**' इति भेदनिषेधेनात्मनः प्रतिष्ठितत्वं निषिध्यते। '**स एवाधस्तात्**' इत्युत्तरवाक्ये च सार्वात्म्यं प्रतिपाद्यते। अतो '**यत्र नान्यत्**' इत्यद्वितीय्यत्वेन लक्षितत्वात्, '**अथ यत्रान्यत्**' इति भेदस्य निन्दितत्वात्, '**अन्यो ह्यन्यस्मिन्**' इति भेदनिषेधात्[५] सार्वात्म्यप्रतिपादनाच्च, अद्वितीयपरमिदं प्रकरणम्। जडस्य ब्रह्मकार्यत्वेन, [६]'**आरम्भणाधिकरण**' न्यायेन ब्रह्मणः

---

[१] तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्यण्डजं जीवजमुद्भिज्जमिति। सेयं देवतैक्षत हन्ताहम् इमांस्तिस्रो देवता **अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति**। (छा.उ.६.३.१-२)

[२] अस्मिन् कोशे '**प्रमाणस्य**' इत्यस्य '**प्रमाणमात्रस्य**' इत्यर्थः दृश्यते।

[३] छा.उ.७.२४.१

[४] गो अश्वमिह महिमेत्याचक्षते हस्तिहिरण्यं दासभार्यं क्षेत्राण्यायतनानीति **नाहमेवं ब्रवीमीति होवाचान्यो ह्यन्यस्मिन् प्रतिष्ठित**। (छा.उ.७.२४.२)

[५] घ, ङ - कोशे अधिकः पाठः - स एवाधस्तात् इत्यादिना

[६] **आरम्भणाधिकरणम्** - तदनन्यत्वमारम्भणशब्दादिभ्यः (ब्र.सू.२.१.१५), **भावे चोपलब्धेः** (ब्र.सू.२.१.१६), **सत्त्वाच्चापरस्य** (ब्र.सू.२.१.१७), **असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्य-शेषात् युक्तेः शब्दान्तराच्च** (ब्र.सू.२.१.१८), **पटवच्च** (ब्र.सू.२.१.१९), **यथा स प्राणादिः** (ब्र.सू.२.१.२०) इति षट्सूत्रात्मकमिदमधिकरणम्। अस्मिन्नधिकरणे बुद्धिशब्दान्तरादिभिः कार्यकारणयो-रनन्यत्वात् ब्रह्मणः अन्यजगदित्याशङ्क्य, वाचारम्भणमित्यादिभिः कार्यकारणयोरन्यत्वप्रतिपादनात्, बुद्धिशब्दान्तरादीनामवस्थान्तरपरत्वेनोपपत्तेश्च ब्रह्मणोऽनन्यत् जगदित्युक्तम्। (वि.को.२)

तदात्मकत्वेऽपि जीवस्य तदकार्यस्य तद्भेदे आत्यन्तिक एव भेदः स्यादिति। ब्रह्मणः सार्वात्म्यश्रुतिरुन्मत्तप्रलापः स्यादिति जीवस्य ब्रह्माभेदं सार्वात्म्यश्रुतिरपेक्षत इति। स एव तुल्यलक्षणतया '**अथातोऽहंकारादेश**' इत्यत्र प्रतिपाद्यते।

ननु [१]'**आत्मादेश**' इत्यनेनैव [२]आत्मोपदेशसिद्धौ किमहंकारादेशेनेति चेन्न, आत्मा ह्यहंप्रत्ययविषयः, कर्ता भोक्तेति लौकिकैर्निश्चीयत इति। तत्रैव प्रथममात्मशब्दात् बुद्धिः स्यात्, नाभेदमवगमयितुं शक्नोति। शक्नोति त्वहंपदार्थं पृथक् निर्दिश्य, ततोऽन्य एवात्मेति प्रतिपादिते जीवपराभेदं प्रतिपादयितुमिति सार्वात्म्यश्रुत्यपेक्षयैवाहमात्मानमादौ निर्दिशति। नन्वहंकारस्य तदवच्छिन्नचैतन्यस्य च भिन्नत्वादसर्वगतत्वाच्च कथं सर्वगतत्वं सर्वात्मत्वं चेति चेन्न। असौ ह्यहंकारशब्दः 'अहमिति कृतिः करणं यस्मिन्' इति व्युत्पत्त्या अन्तःकरणावच्छिन्नचैतन्यमभिधत्ते।

[३]'**शोकहर्षभयक्रोधलोभमोहस्पृहादयः।**
अहंकारस्य दृश्यन्ते जन्म मृत्युश्च नात्मन'

इति स्मृतावपि तत्रैव प्रयोगात्। तथा चोपाधिपरिच्छेदात्परिच्छिन्ने तद्भेदाद्भिन्ने च तस्मिन् सर्वगतब्रह्माभेदप्रतीतिर्न संभवतीति। दहरपुण्डरीकवेष्टितस्य परमात्मनो [४]'**यावान् वाऽयं आकाशस्तावानेषोऽन्तर्हृदय आकाश**' इत्युपाधिकृताल्पत्वनिवृत्तिपराकाशोपमोपदेशवत् अहमर्थस्याप्युपाधिकृतपरिच्छेदव्यावृत्त्या वास्तवसार्वात्म्यपराहंकारादेशश्रुतिर्न विरुध्यते। उत्तरवाक्ये तु ब्रह्मसमानस्वभावतया तदैक्यमुच्यते।

न चास्मिन् वाक्ये ब्रह्मणस्सार्वात्म्यं प्रतिपिपादयिषितम्, किन्तु '**स एवाधस्तात्**' इत्युपक्रमानुरोधेन सर्वगतत्वमेव, तच्च भेदेऽपि न विरुध्यत इति वाच्यम्। अत्र हि कञ्चन पदार्थमवधिं कृत्वा तस्याधश्चोर्ध्वञ्च चतुर्दिक्षु च यत्किञ्चिदस्ति तत्सर्वं स एवेति [५]षड्भिर्वाक्यैः प्रतीयते। '**स एवेदँ सर्वम्**' इत्यत्रावधिभूतपदार्थात्मकत्वमिति

---

[१] छा.उ.७.२५.२

[२] ङ - आत्मन उपदेशः

[३] भा.पु.११.२८.१५

[४] स ब्रूयात् **यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश** उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते उभावग्निश्च वायुश्च सूर्याचन्द्रमसावुभौ विद्युन्नक्षत्राणि यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन् समाहितमिति। (छा.उ.८.१.३)

[५] छा.उ.७.२५.१

सर्वात्मकत्वमेवोच्यते, न तु [१]सर्वगतत्वम्। सर्वगतत्वमात्रपरत्वेऽपि '**स एवाधस्तात्**' '**अहमेवाधस्तात्**' '**आत्मैवाधस्तात्**' इति प्रतिपर्यायमवधारणात् न जीवेशभेदः प्रत्येतुं शक्यत इति।

अत्रोच्यते - यदुक्तं प्रकरणमद्वैतविषयमिति। तत्र न तावत् '**यत्र नान्यत्**' इति वाक्यबलादद्वैतविषयता, अस्य ब्रह्मव्यतिरिक्तनिषेधपरत्वाभावात्। '**यत्र नान्यत् पश्यति**' इति नान्यनिषेधः प्रतीयते। [२]प्रमाणनिषेधेनार्थात् प्रमेयनिषेधसिद्धिरिति चेन्न, अत्र प्रमाणनिषेधेन प्रमेयनिषेधसिद्धावप्यन्यत्रानिषेधेनाद्वैतासिद्धेः।

प्रमाणनिषेधोऽप्यनुपपन्नः, त्वन्मते ब्रह्मणोऽधिष्ठानतया तत्रैव सर्वेषां पदार्थानां प्रतीतेः, यत्र तत्समानसत्ताकं न पश्यतीति विवक्षायामपि चरमधर्मे व्यावहारिके प्रातिभासिके चातिव्याप्त्या लक्षणत्वानुपपत्तेः। किञ्च '**यत्र**' इत्यादेर्भूमशब्दार्थोपपादकत्वं हि स्वरसम्।

न च भूयस्त्वमनेनैवोपपाद्यते, नापि '**यत्रान्यत्**' इत्यादिनाल्पत्वं, न हीतर मिथ्यात्वं भूयस्त्वोपपादकम्। नापि तदधिकरणकवस्तुसत्त्वं तस्याल्पत्वोपपादकम्, प्रत्युत विपरीतमेव। लोके हि विद्यागुणशालिनं भूयानिति वदन्ति, तच्छून्यं चाल्प इति। न च यतोऽन्यत्वेन किञ्चिद्वस्तु न पश्यति स भूमा, यतोऽन्यत्वेन किञ्चिद्वस्तु पश्यति तदल्पमित्यर्थः भवति च, वस्तुपरिच्छेदतदभावाभ्यामल्पत्वभूमत्वोपपादनमिति वाच्यम्। सर्वज्ञब्रह्मान्यत्वेनैव किञ्चिज्ज्ञजडयोः [३]प्रतिपत्तेः। वस्तुपरिच्छेदतदभावाभ्यामल्पत्वभूयस्त्वोपपादनाभावाच्च। महत्वं हि भूमा, अल्पत्वप्रतियोगित्वात्। तच्च वस्त्वन्तरपरिच्छेदेऽपि गगनादौ दृश्यते। दृश्यते च [४]'**न साधुना कर्मणा भूयान्**' इति कर्माधीनतया तस्यानुवादः।

न च वस्त्वन्तरापरिच्छेदः कर्माधीनस्तत्परिच्छेदो वेति युक्तम्। [५]'**अन्यो ह्यन्यस्मिन् प्रतिष्ठित**' इति भेदनिषेधेनात्मनः प्रतिष्ठितत्वनिषेधादपि नाद्वितीयपरता। '**स होवाच**' इत्युत्तरपरिसमाप्तिप्रतीत्या '**अन्यो ह्यन्यस्मिन्**' इत्यस्य पूर्वशेषत्वस्यास्वरसत्वेन

---

[१] अस्मिन् कोशे '**सर्वगतत्वम्**' इत्यस्य '**सर्वात्मगतत्वम्**' इत्यर्थः दृश्यते।

[२] घ, ङ - इतः पूर्वं 'प्रमाणमात्रनिषेधात्' इति अधिकः पाठः

[३] ङ - प्रतीतेः

[४] स **न साधुना कर्मणा भूयान्**; नो एवासाधुना कनीयान्। (बृ.उ.६.४.२२)

[५] छा.उ.७.२४.२

तस्य भिन्नवाक्यत्वात्। एकवाक्यत्वेऽपि प्रथमश्रुतान्यत्वं प्रति पूर्वोपस्थितभूम्न एव प्रतियोगितयान्वयस्वारस्यात् द्वितीयान्यपदोपस्थापितस्य चरमश्रुततया प्रतियोगितयान्वयोः स्वरस एव। '**स एवेदँ सर्वम्**' इति वाक्यबलादपि नाद्वितीयपरता, स्वप्रकाशस्य भूम्नो जडस्वरूपत्वासंभवात्। बाधार्थसामानाधिकरण्ये - 'स एवास्ति' 'इदं सर्वं नास्ति' इति अस्ति नास्ति पदाध्याहारप्रसङ्गः। किञ्च '**स एवाधस्तात्**' इत्युपक्रमे [१]षड्भिर्वाक्यैः भेदस्यैव प्रतीतेः, '**स एवेदँ सर्वम्**' इति न सर्वतादात्म्यपरम्। '**अधस्तादुपरिष्टात्**' इत्याधेयप्रधानत्वाभावेन [२]तत्सर्ववस्त्वैक्यप्रतिपादकत्वासंभवात्, अधस्तात् वर्तत इत्येव हि स्वरसतः प्रतीयते। एवकारः 'स एवायं देवदत्त' इत्यादाविव प्रत्यभिज्ञार्थस्सन् '**उपरिष्टात्**' इत्यादावन्वेति। तस्मान्नाद्वैतपरं प्रकरणम्, किन्त्ववधिसापेक्षेण बृहत्त्ववाचिना भूमशब्देनोपक्रमात् तस्य जिज्ञास्यत्वाभिधानात्। '**अधस्तात्**' इत्यादिना '**अन्यो ह्यन्यस्मिन् प्रतिष्ठित**' इति भेदप्रतीतेश्च द्वैतपरमेवेदं प्रकरणम्।

यदुक्तम् - सार्वात्म्यश्रुतेरुन्मत्तप्रलापताशङ्काव्यावृत्तये अभेदोपदेशायात्मोपदेश इति तन्न। तादृशशङ्कायास्तत्रापि सुलभत्वेन सार्वात्म्योपदेशासंभवेनाभेदबोधनासंभवात्। कथं चाभेदं कण्ठतो बोधयन्ती श्रुतिः स्वार्थे प्रामाण्यमलभमाना स्वसमानशीलश्रुतेः स्वस्याश्चार्थिकार्थमुपजीव्य प्रामाण्यं लभते।

ननु सार्वात्म्यश्रुत्यापि जडवन्मिथ्यात्वप्रतीतिव्यावृत्तये अभेदोपदेशः कार्य इति चेन्न, [३]'**श्रुतं ह्येव मे भगवद्दृशेभ्यः तरति शोकमात्मवित्**' इति वाक्यपर्यालोचनया श्रोतुर्नारदस्यात्मनि सत्यत्वबुद्धेः स्फुटतरं प्रतीतेः। न हि शोकतरितुर्मिथ्यात्वं कस्यापि शङ्काविषयः। आत्मनित्यत्वप्रतीतिबलादेव च त्वयोन्मत्तप्रलापतोक्ता। तथा च कुतो मिथ्यात्व शङ्कावकाशः?

किञ्चैवं [४]'**आत्मादेश एव**' अस्तु, किमहंकारोपदेशेन? न चाहंपदार्थात्मनोर्भेदेन प्रतिपादनं प्रयोजनमिति युक्तम्, भेदप्रतिपादकपदाभावात्।

---

[१] छा.उ.७.२५.१

[२] क - तत्स्थान; ख, घ, ङ, च, छ - तत्स्थ

[३] सोऽहं भगवो मन्त्रविदेवास्मि, न आत्मवित्। **श्रुतं ह्येव मे भगवद्दृशेभ्यः, तरति शोकमात्मविदिति**। सोऽहं भगवः शोचामि, तं मा भगवञ्छोकस्य पारं तारयत्विति। तँ होवाच। यद्वै किञ्चैतदध्यगीष्ठाः, नामैवैतत्। (छा.उ.७.१.३)

[४] छा.उ.७.२५.२

१. उपोद्घातः

न चोभयोपदेशादेवोभयोर्भेदसिद्धिः, अहंपदादपि सार्वात्म्यानुरोधेन स्वरूपोपस्थितेरेव त्वया वाच्यतया स्वरूप एव भेदप्रसङ्गात्।

न चाहंपदं शबळे व्युत्पन्नम्; ततश्चानित्यो घट इत्यत्रानित्यत्वस्य घटांश इव स्वरूपे सार्वात्म्यान्वयः उपदेशभेदादहमर्थभेदसिद्धिः[१] चेति वाच्यम्,

चैतन्याहंकारोभयविशेष्यकत्वे उभयत्र सर्वगतत्वाद्यन्वयप्रसङ्गात्। अहंकारप्रवृत्तिनिमित्तकत्वे च परस्पराध्यासाभावप्रसङ्गः, अहंशब्दसमानविषयत्वादहंप्रतीतेः।

ननु भूम्नस्सार्वात्म्यमुपदिश्य जीवस्य तदभेदसिद्धये तस्यापि सार्वात्म्यमुपदिदिक्षुः तस्य सार्वात्म्योपदेशे लोकतः परिच्छिन्नतया प्रतीतस्य जीवस्य तद्बुद्ध्यनारोहात्। तदारोहाय मध्येऽहंकार उपदिश्यते। तदुपदेशे चाहमर्थस्योपदेशभेदात् भेदस्य वाच्यत्वात्, तस्यापि सार्वात्म्योपदेशेन स्वरूपपरत्वस्य च वाच्यत्वादहमर्थोपाधिक एव जीवः, न त्वहमर्थ एवेति परीक्षकाणां बुद्धिरुन्मिषतीत्यहंकारोपदेशः सार्थ[२] इति चेन्न, आत्माहंकारोपाधिवशात् परिच्छिन्नतया प्रतीयते, वस्तुतस्स्वरूपतोऽपरिच्छिन्न एवेत्युपदेशे ह्यभिलषितार्थलाभस्स्यात्। न च तथोपदिश्यते, किन्तु त्रयाणां सार्वात्म्यमुपदिश्यते। ततश्च त्रयाणामभेदप्रसङ्गः। उपदेशभेदात् भेदश्च त्रयाणामपि प्रसज्यते। परिच्छिन्नस्य सार्वात्म्योपदेशात् [३]द्व्यात्मकत्वकल्पनमात्मोपदेशमात्रात् संभवतीति किमर्थोऽहंकारोपदेशः।

यदुक्तम् - उपाधिकृतपरिच्छेदव्यावृत्त्या [४]वास्तवतादात्म्यपराहंकारश्रुतिः दहराकाशमहत्त्वश्रुतिवदिति, तन्न, तद्वाक्यवदिहापरिच्छेदे तात्पर्यानवगमात्। सार्वात्म्योपदेशात् तदवगमस्त्वात्मोपदेशमात्रादपि सिध्यति। तस्मात् भूमात्मनोः पृथगुपदेशस्तयोर्भेदार्थ एव। अहमुपदेशस्तु अहंग्रहणोपासनार्थ इति यथोक्त एवार्थः।

'यदुक्तम् - 'अहमिति कृतिः करणं यस्मिन्निति' व्युत्पत्त्याहंकारशब्दोऽहमर्थवाचक इति, तन्न, बहुव्रीहेरत्रासंभवात्। अयं ह्यहंशब्दः [५]"**अनुकरणञ्चानितिपरम्**' इति गतिसंज्ञकः। अतो [६]"**गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः**' इति

---

[१] क, ख, छ - सिद्धिः
[२] घ, ङ - सार्थकः
[३] च, छ - आत्मकत्व
[४] घ, ङ - वास्तवसार्वात्म्य
[५] पा.सू.१.४.६२
[६] पा.सू.६.२.१३९

प्रागेव सुबुत्पत्तेर्भवतीत्युत्तरपदेन तत्पुरुषः। बहुव्रीहिस्तु सुबुत्पत्त्यपेक्षो विलम्बितः। किञ्च **बहुव्रीहिर्जघन्यः, व्यधिकरणस्तु सुतराम्**। एवमहमुपदेशस्याहमात्मनोः भेदतात्पर्य-बुद्ध्यनुप्रवेशेन[१] अहमर्थस्यानात्मत्वं निरस्तम्।

यदाहुः - तैत्तिरीयके [२]'**ब्रह्मविदाप्नोति परम्**' इत्युपक्रम्य '**यो वेद निहितं गुहायां परमे व्योमन्**' इति तस्य बुद्ध्यनुप्रवेशेनाहंप्रत्यये प्रकाशमानत्वं प्रत्यक्त्वमुक्त्वा तस्य देहादिसाधारण्यात् तद्व्यावृत्त्यर्थं प्रत्यगात्मानं स्थूलसूक्ष्मसूक्ष्मतरसूक्ष्मतमोपाधि-विवेकेन पञ्चकोशानवतार्य दर्शयन्ती[३] श्रुतिः [४]'**विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि च**' इति श्लोकेन विज्ञानमयस्याहंबुद्धिविषयस्याहंकारस्य निखिलकर्मकर्तृत्वमुक्त्वा तस्याविद्योपाधिमद्रूपान्तराभिप्रायेणाह - [५]'**अन्योऽन्तर आत्मानन्दमय**' इति। अतो न कर्ताहमनुभवगोचर एव जीवः।

नन्वानन्दमयो न जीवः, किन्तु ब्रह्मैवान्नमयादेरिवानन्दमयादन्यस्यानिर्देशादानन्द-मयस्यैव प्राकरणिकत्वादिति चेन्न, नहीदं प्रकरणमानन्दमये पर्यवसितम्, उपक्रमोप-संहारेष्वानन्दमयाप्रतीतेः।

न च [६]'**रसँ ह्येवायं लब्ध्वानन्दी भवति**' इति, [७]'**यदेष आकाश आनन्दो न स्यात्**' इति च [१]'**अन्योऽन्तर आत्मानन्दमय**' इत्युपक्रान्तस्य परामर्शोऽस्तीति वाच्यम्। आनन्दमयपदप्रकृत्यर्थस्यैवाभ्यासात्, लक्षणायाः चान्याय्यत्वात्।

---

[१] अन्यकोशेषु - निरासेन

[२] **ब्रह्मविदाप्नोति परम्**। तदेषाभ्युक्ता। सत्यं ज्ञानमनन्तं ब्रह्म। **यो वेद निहितं गुहायां परमे व्योमन्**। सोऽश्नुते सर्वान् कामान् सह। ब्रह्मणा विपश्चितेति। (तै.उ.२.१)

[३] क, ज - दर्शयती

[४] **विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि च** विज्ञानं देवाः सर्वे ब्रह्म ज्येष्ठमुपासते विज्ञानं ब्रह्म चेद्वेद। तस्माच्चेन्न प्रमाद्यति शरीरे पाप्मनो हित्वा सर्वान् कामान् समश्नुत इति तस्यैष एव शारीर आत्मा यः पूर्वस्य तस्माद्वा एतस्माद्विज्ञानमयः **अन्योऽन्तर आत्मानन्दमयः** तेनैष पूर्णः स वा एष पुरुषविध एव। तस्य पुरुषविधः तस्य प्रियमेव शिरः मोदोदक्षिणः पक्षः प्रमोद उत्तरः पक्षः आनन्द आत्मा **ब्रह्म पुच्छं प्रतिष्ठा** तदप्येष श्लोको भवति। (तै.उ.२.५)

[५] तै.उ.२.५

[६] रसो वै सः। **रसँ ह्येवायं लब्ध्वानन्दी भवति**। को ह्येवान्त्यात्कः प्राण्यात्। **यदेष आकाश आनन्दो न स्यात्**। (तै.उ.२.७)

[७] तै.उ.२.७

१. उपोद्घातः

मम तु निर्विशेषलक्षणायामपि भागत्यागलक्षणास्वीकारेण [२]रेवतीवाक्यगतप्रकृतधर्मिवाच्ये तच्छब्दस्य धर्ममात्रपरत्व इव श्रुतित्वाहानेः उपक्रमेऽप्यानन्दमयशब्दस्यान्नमयादि विकारप्रायपाठेन विकारार्थस्य ब्रह्मणि वर्तितुमनर्हत्वात्। आनन्दैकरसे ब्रह्मणि तत्प्राचुर्यवाचिनोऽपि मयटः प्रयोगानुपपत्तेः, प्रकृत्यर्थविरोधिनो लेशतोऽनुवृत्तावेव च प्राचुर्यवाचिमयटः प्रयोगात्, यथा ब्राह्मणमयो ग्राम इति।

न चाल्पत्वनिवृत्तिलक्षणयानन्दमयशब्दः परमात्मनि भूमशब्दवदिति वाच्यम्। [३]मनुष्यानन्दादेरुत्तरोत्तरशतगुणाधिक्यप्रतिपादनेनैव ब्रह्मानन्दे तत्सिद्धेः, जीवे मुख्यार्थसंभवे लक्षणायोगाच्च।

ननु जीवोऽपि दुःखप्रचुरोऽनादिश्चेति नानन्दमय इति चेन्न, अविद्यायामानन्दात्मकब्रह्मप्रतिबिम्बस्य जीवस्य ब्रह्माधीनाग्रिमक्षणसत्ताकतया तद्विकारत्वात्। किञ्चानन्दमयस्य ब्रह्मत्वे [४]'**ब्रह्म पुच्छं प्रतिष्ठा**' इति निर्दिष्टं ब्रह्मपुच्छत्वं तस्यानुपपन्नम्। न ह्येकमेव पुच्छं पुच्छवच्च भवति। तस्मात् पुच्छपदेनाधारलक्षणया सर्वाधारो ब्रह्मैव वाक्यार्थः। तथा च सर्वाधारभूतं ब्रह्मास्यानन्दमयस्य प्रतिष्ठापर्यवसितं रूपमिति ब्रह्मैवोच्यते।

---

[१] तै.उ.२.५

[२] रेवतीवाक्ये - एतस्मिन् रेवतीषु वारवन्तीयमग्निष्टोम साम कृत्वा (ता.ब्रा.१७.७.१)।

[३] सैषानन्दस्य मीमांसा भवति। युवा स्यात् साधु युवाध्यायकः। आशिष्ठो दृढिष्ठो बलिष्ठः। तस्येदं पृथिवी सर्वा वित्तस्य पूर्णा स्यात्। स एको मानुष आनन्दः। ते ये शतं मानुषा आनन्दाः। स एको मनुष्यगन्धर्वाणामानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं मनुष्यगन्धर्वाणामानन्दाः। स एको देवगन्धर्वाणामानन्दः। श्रोत्रियस्य चाकामहतस्य। ये ते शतं देवगन्धर्वाणामानन्दाः। स एकः पितृणां चिरलोकानामानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं पितृणां चिरलोकलोकानामानन्दाः। स एक आजानजानां देवानामानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतमाजानजानां देवानामानन्दाः। स एकः कर्मदेवानां देवानामानन्दः। ये कर्मणा देवानपियन्ति। श्रोत्रियस्य चाकामहतस्य। ते ये शतं कर्मदेवानां देवानामानन्दाः। स एको देवानामानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं देवानामानन्दाः। स एक इन्द्रस्यानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतमिन्द्रस्यानन्दाः। स एको बृहस्पतेरानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं बृहस्पतेरानन्दाः। स एकः प्रजापतेरानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं प्रजापतेरानन्दाः। स एको ब्रह्मण आनन्दः। (तै.उ.२.७)

[४] तै.उ.२.५

तदेव ब्रह्मप्रकरणि [१]'**ब्रह्मविदाप्नोति परम्**' इत्युपक्रमे [२]'**असन्नेव**' इत्यादौ तस्यैव प्रतीतेः। अत आनन्दमयः कर्तुरहमनुभवगोचरादन्यो जीव एवेति। तथा [३]'**योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः**' इत्यन्तःकरणाख्याहंकारातिरिक्तं ज्योतिरात्मकं जीवस्वरूपं दर्शयति। सूत्रकारोऽप्यहमनुभवविषयातिरिक्तं जीवस्य ब्रह्माख्यं रूपं न षष्ठप्रपाठकप्रतिपाद्यम् [४]'**स वायं पुरुषो जायमान**' इत्यादिना जन्मजरामरणाद्यवस्थावतो अहमनुभवगोचरस्यैवोपन्यासात् इत्याशङ्क्य सुषुप्त्युत्क्रान्तिकालयोः [५]'**प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद**' [६]'**प्राज्ञेनात्मनान्वारूढ उत्सर्जन् याति**' इत्यादिना संसारिणः प्राज्ञशब्दनिर्दिष्टब्रह्माख्यस्वरूपान्तरनिर्देशात् '**योऽयं विज्ञानमय**' इत्याद्यसङ्गोदासीन जीवस्वरूपपरमित्याह [७]'**सुषुप्त्युत्क्रान्त्योर्भेदेन**' इति। एवं [८]'**तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति**' इत्यभोक्तारं जीवं दर्शयति।

नन्वयं मन्त्रः परमात्मन एवानशनं दर्शयति, जीवस्य तु 'पिप्पलं स्वाद्वत्ति' इति भोक्तृत्वमेव दर्शयतीति चेन्न। एवं सति [९]'**ब्रह्म वेद ब्रह्मैव भवति**' इति वाक्य-

---

[१] तै.उ.२.१

[२] **असन्नेव** स भवति, असद्ब्रह्मेति वेद चेत् अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुरिति, **तस्यैष एव शारीर आत्मा**, यः पूर्वस्य। (तै.उ.२.६)

[३] कतम आत्मेति। **योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः** पुरुषः स समानस्सन्नुभौ लोकावनुसञ्चरति ध्यायतीव लेलायतीव। स हि स्वप्नो भूत्वेमं लोकमतिक्रामति मृत्यो रूपाणि।(बृ.उ.६.३.७)

[४] **स वायं पुरुषो जायमानः** शरीरमभिसम्पद्यमानः पाप्मभिः सँसृज्यते। स उत्क्रमान् म्रियमाणः पाप्मनो विजहाति। (बृ.उ.६.३.८)

[५] तद्वा अस्यैतदतिच्छन्दा अपहतपाप्माभयँ रूपम्। तद्यथा प्रिययास्त्रिया सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्। एवमेवायं पुरुषः **प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद** नान्तरम्। तद्वास्यैतदाप्तकाममात्मकाममकामँ रूपँ शोकान्तरम्। (बृ.उ.६.३.२१)

[६] तद्यथा अनः सुसमाहिमुत्सर्जद्यायात् एवमेवायँ शारीर आत्मा **प्राज्ञेनात्मनाऽन्वारूढ उत्सर्जन् याति** यत्रैतदूर्ध्वोच्छ्वासि भवति। (बृ.उ.६.३.३५)

[७] ब्र.सू.१.३.४३

[८] द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति।। (श्वे.उ.४.६; मु.उ.३.१.१)

[९] स यो ह वै परमं **ब्रह्म वेद ब्रह्मैव भवति** नास्या ब्रह्मकुले भवति।
तरति शोकं तरति पाप्मानं गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति।। (मु.उ.३.२.९)

शेषावगतस्य विदुषो ब्रह्मभावस्योपक्रमगतस्यैकविज्ञानात् सर्वविज्ञानप्रतिज्ञानस्य च बाधप्रसङ्गात् भोक्त्रभोक्त्रोरभेदायोगात्।

किं विषया तर्हि स्वाद्वत्तीति श्रुतिरिति [1]चेत्, सा हि ब्रह्मस्वरूपस्य सतो जीवस्य बुद्ध्युपाधिकृतं भोक्तृत्वमनुभवसिद्धमनुवदति स्वरूपेण तस्यैवाभोक्तृत्वं दर्शयितुम्।

अत एवायं मन्त्रः पैङ्गिरहस्यब्राह्मणे एवमेव व्याख्यातः - '**तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्त्वम्। अनश्नन्नन्योऽभिचाकशीति ज्ञः। तावेतौ सत्वक्षेत्रज्ञौ**' इति।

ननु तत्रापि सत्त्वशब्दो जीवं, क्षेत्रज्ञशब्दः परमात्मानमभिदधातीति चेन्न, '**तदेतत् सत्वम्। येन स्वप्नं पश्यति**, **अथ योऽयं शारीर उपद्रष्टा स क्षेत्रज्ञ**' इति सत्वक्षेत्रज्ञपदयोरन्तःकरणशारीरपरतया व्याख्यातत्वात्।

नन्वत्रापि स्वप्नद्रष्टृत्वतदुपद्रष्टृत्वाभ्यां जीवेशावेवोक्ताविति चेन्न, येनेति करण-तृतीयान्तयच्छब्दोक्तस्य तदेतदिति परामर्शात्, जीवस्यैव स्वप्नोपद्रष्टृत्वात्, [2]'**शारीर आत्मा**' इत्यत्र जीवे प्रसिद्धेन शारीरशब्देन तस्यैवाभिधेयत्वाच्चेति।

अत्रोच्यते - आसामपि श्रुतीनां न जीवाहमर्थभेदे तात्पर्यम्। तथाहि आनन्द-मयस्यैव ब्रह्मत्वेन विज्ञानमयातिरेकेण जीवस्याप्रतिपादनान्नान्तःकरणमहमर्थः। अन्नमयादि पर्यायेषु पक्षाद्यवयववतः प्राधान्यस्यावयवानामप्राधान्यस्य च प्रतीतेरानन्दमयपर्यायेऽपि आनन्दमयस्यात्मतया प्रधानप्रतिपाद्यत्वं स्वरसतः प्रतीयमानं पुच्छब्रह्मणः प्राधान्यं प्रतिक्षिपति। अतः पुच्छब्रह्मणः प्राधान्यमवान्तरप्रकरणविरुद्धम्। [3]'**ब्रह्मविदाप्नोति परम्**' इत्युपक्रान्तस्य '**सत्यं ज्ञानम्**' इति लक्षितस्य ब्रह्मण '**आत्मन आकाशस्संभूत**' इति कारणत्वमभिधाय, तमेवात्मानं जीववैलक्षण्येन सुखेन बोधयितुं प्राणमयाद्यन्तरात्मपरंपराम् उपदिश्य, आनन्दमयानन्तरं [4]'**अन्योऽन्तर आत्मा**' इत्यनुपदेशादन्तरात्मपरंपरामुखेन प्रतिपिपादयिषितं ब्रह्मानन्दमय इति स्वरसतः प्रतीयते। अतो महाप्रकरणविरोधश्च।

---

[1] ङ - चेन्न

[2] तै.उ.२.४.१;२.५.१;२.६.१

[3] **ब्रह्मविदाप्नोति परम्**। तदेषाभ्युक्ता। **सत्यं ज्ञान**मनन्तं ब्रह्म। यो वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वान् कामान् सह। ब्रह्मणा विपश्चितेति। तस्माद्वा **एतस्मादात्मनः आकाशः संभूतः**। (तै.उ.२.१)

[4] **अन्योऽन्तर आत्मा** प्राणमयः। (तै.उ.२.२) **अन्योऽन्तर आत्मा** मनोमयः। (तै.उ.२.३) **अन्योऽन्तरात्मा** विज्ञानमयः। (तै.उ.२.४) **अन्योऽन्तरात्मा** आनन्दमयः। (तै.उ.२.५)

न चैवं भूमविद्यायामप्यात्मोपदेशस्य प्राणपर्यन्तत्वप्रसङ्गः वागादिष्विव '**अस्ति भगवः प्राणाद्भूय**' इति प्रश्नस्य '**अदो वाव प्राणाद्भूय**' इति प्रतिवचनस्य चादर्शनादिति वाच्यम्। [१]'**एष तु वा अतिवदति यस्सत्येनातिवदति**' इति तु शब्देन प्राणातिवादिनोऽपि सत्यातिवादिनः प्रकर्षावगमात्। अतिक्रान्तस्वोपास्यवस्तु वादित्व-लक्षणस्य वागादिष्वनुक्तस्यातिवादित्वस्य [२]'**स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवति**' इत्यनेन प्राणे प्रतिपादनात् आत्मोपदेशस्य तात्पर्यन्तत्वं मन्यमानः शिष्यो भूयो न पप्रच्छ। आचार्यस्तु प्राणमपि सातिशयं जानन् '**एष तु वा अतिवदति**' इत्याद्युपदिदेश। न चेह तादृश उपदेशोऽस्ति। सर्वपर्यायसाधारणपुच्छोपदेश एवान्तरात्मान्तरोपदेश इति श्रोतुमप्यपत्रपामहे।

न च पुच्छपुच्छवतोरभेदायोगः, त्वन्मतेऽपि जीवब्रह्मणोरत्यन्तभेदाभावात्। कथञ्चिद्भेदस्तु सिद्धान्तेऽपि समानः। आनन्दप्राचुर्यविशिष्टम्[३] प्रति धर्मिस्वरूपस्य ब्रह्मत्वविशिष्टस्य वा पुच्छत्वसंभवात्। एतेन सर्वपर्यायसाधरणत्वेन पूर्वतरानन्दमयोपदेश-शेषत्वात् [४]'**तस्यैष एव शारीर आत्मा**' इत्यस्यात्मान्तरोपदेशपरत्वम् निरस्तम्।

ननु '**तस्यैष एव शारीर आत्मा**' इत्यत्र षष्ठ्या भेदप्रतीतेः, स एवान्तरात्मान्तरोपदेश इति चेन्न, परैरुत्तरोत्तरस्य पूर्वपूर्वशारीरत्वाभिधानात्।

सिद्धान्ते यद्यपि ब्रह्मण एव सर्वत्र शारीरत्वमित्यपि योजनास्ति तथापि न तेनान्तरात्मान्तरोपदेशसिद्धिः। शिरःपक्षादिमत्तया शरीरत्वेन प्रतिपादितस्य [५]शरीराधिष्ठातृ-त्वाकाङ्क्षायाम् [६]'**तस्माद्वा एतस्मादात्मन**' इत्यत्र '**तस्माद्वा एतस्मात्**' इत्येतावता प्रकृतस्य ब्रह्मणः परामर्शे सिद्धे, आत्मशब्दस्य संबन्धिशब्दत्वेन समभिव्याहृताकाश-प्रभृत्यन्नमयपर्यन्ताधिष्ठातृत्वलाभार्थतया, अन्नमये प्रकृतस्य तस्यैवाधिष्ठात्रात्मतया

---

[१] **एष तु वा अतिवदति, यस्सत्येनातिवदति**। सोऽहं भगवः सत्येनातिवदानीति। सत्यं त्वेव विजिज्ञासितव्यमिति। सत्यं भगवो विजिज्ञास इति। (छा.उ.७.१६.१)

[२] प्राणो ह्येवैतानि सर्वाणि भवति। **स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवति**। तं चेद्ब्रूयुरतिवाद्यसीति, अतिवाद्यस्मीति ब्रूयान्नापह्नुवीत। (छा.उ.७.१५.४)

[३] क, च, छ -प्रचुरं विशिष्टम्

[४] तै.उ.२.४; २.५; २.६

[५] क, ख, घ, ङ - शरीराधिष्ठात्राकाङ्क्षायाम्

[६] तै.उ.२.१

सिद्धत्वात्, स एव [1]'**यः पूर्वस्य**' इत्यनूद्य, [2]प्राणमयादिशरीरेष्वधिष्ठातृत्वेन विधीयते। स एवाधिष्ठात्रधिष्ठेयभावः षष्ठ्यर्थः। 'शारीर' इत्यत्राधिष्ठातर्येव शैषिकोऽण्। स च संबन्धोऽभेदेऽपि, तदधिष्ठातृत्वं हि स्वेच्छाधीनतत्प्रवृत्तिकत्वम्। अतः शारीरोपदेशेन न भेदसिद्धिः। भेदाभावेऽधिष्ठातृत्वोपदेशस्येषदस्वारस्येऽप्येवमेवार्थो युक्तः। शारीरोपदेशस्य [3]उपसर्जनतया अन्तरात्मोपदेशस्य प्राधान्यस्य च प्रतीतेः। किञ्चानन्दमयपर्यायशेषभूतस्य श्लोकस्य ब्रह्मपरत्वात् तदप्यानन्दमयस्य ब्रह्मत्वं साधयति। तत्तत् पर्यायस्थश्लोकानां तत्तत् [4]पर्यायस्थावयविपरत्वात्।

ननु मनोमयपर्यायश्लोके मनोमयपरत्वं न दृष्टमिति चेन्न, मनसि भयनिवृत्तेः प्रतिपादनात् प्रकारान्तरमप्युक्तमेव।

न च पुच्छवाक्यश्लोकयोर्ब्रह्मश्रुत्या श्लोकस्य पुच्छपरत्वम्, [5]'**तदप्येष**' इति वाक्येन तदिति पर्यायप्रधानावयविपरामर्शिना श्लोकस्य आनन्दमयविषयत्वप्रतिपादनात्।

किञ्चास्मिन्नानन्दमये तस्मादनतिरिक्तानां प्रियादीनां शिरःप्रभृतित्वेन [6]रूपणात् पुच्छेऽपि तथैव युक्तम्। [7]'**सोऽकामयत**' इत्यनन्तरवाक्ये तच्छब्देन प्रकृतत्वात् ब्रह्मैव परामृश्यते। तस्य च पुंलिङ्गान्तेन निर्देश आनन्दमयनिर्देशं [8]अपेक्ष्य एव।

एवं श्रुतिस्वारस्यसिद्धमानन्दमयस्य ब्रह्मत्वं सूत्रकारोऽप्याह - [9]'**आनन्दमयोऽभ्यासात्**' इति। '**आनन्दमय**' इत्यत्र विकारार्थे मयडिति प्रलपतो जिह्वां सूत्रकार एव लुनाति विकारशब्दान्नेति चेन्न, प्राचुर्यादिति, असंभवि चानादेर्जीवस्य

---

[1] तै.उ.२.४; २.५; २.६

[2] स एको ब्रह्मण आनन्दः। श्रोत्रियस्य चाकामहतस्य। स यश्चायं पुरुषे। यश्चासावादित्ये। स एकः। स य एवंवित्। अस्माल्लोकात् प्रेत्य। एतमन्नमयमात्मानमुपसंक्रामति। एतं प्राणमयमात्मानमुपसंक्रामति। एतं मनोमयमात्मानमुपसंक्रामति। एतं विज्ञानमयमात्मानमुपसंक्रामति। एतमानन्दमयमात्मानमुपसंक्रामति। तदप्येष श्लोको भवति। (तै.उ.२.७)

[3] क, घ, ङ - उपसर्जनतायाः

[4] ख - पर्यायावयवत्वात्; क, घ, छ - पर्यायावयविपरत्वात्

[5] तै.उ.२.१-८

[6] ङ - निरूपणात्

[7] तै.उ.१.६

[8] ख - अपेक्ष्यम्

[9] ब्र.सू.१.१.१३

विकारत्वम्। कथञ्चिद्विकारसादृश्यवर्णनं वर्णनमात्रमेव। ब्रह्मणोऽप्युत्तरक्षणसत्तायाः पूर्वक्षणसत्ताधीनतयानन्दविकारत्वं सुलभमेव।

न च लेशतो दुःखान्वयप्रसङ्गः, मयटः प्रकृत्यर्थातिशयमात्रवाचित्वात्। स चातिशयः क्वचित् समानाधिकरणविजातीयापेक्षया, यथा ब्राह्मणमयो ग्राम इति। क्वचिच्चाश्रयान्तरगतसजातीयापेक्षया, यथा तेजः प्रचुरो गभस्तिमानिति। इह च दुःखसंबन्धस्य ब्रह्मणि बाधितत्वात् जीवगतसुखमेव प्रतियोगि, अत एव मयडभिप्रेतो जीवानन्दात् [१]उत्कृष्ट आनन्दवल्ल्यां व्याख्यायते।

हेत्वन्तरमप्याह सूत्रकारः - [२]'**तद्धेतुव्यपदेशाच्च**' इति। [३]'**को ह्येवान्यात् कः प्राण्यात्, यदेष आकाश आनन्दो न स्यात्, एष ह्येवानन्दयाति**' इति प्रकृतमानन्दमयं पुंलिङ्गान्तेनैतच्छब्देन परामृश्य जीवानामानन्दहेतुरयं व्यपदिश्यते। अतश्चानन्दयितव्यात् जीवादन्य एवानन्दमयः परमात्मेति विज्ञायत इति।

एवं श्रुतिन्यायैरानन्दमयस्य ब्रह्मत्वावश्यंभावे सति आनन्दमयाधिकरणं दूषयतां शङ्करादीनां ब्रह्मविदाचार्यद्रोहादन्यत् किमपि प्रयोजनं न वीक्षामहे।

अहो नु खलु भ्रान्तेरपर्यनुयोज्यता, यल्लेशतोऽप्यहमर्थभेदगमकत्वाप्रतीतावपि तदर्थं [४]'**योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः**' इति श्रुतिमुदाहरन्ति। जीवस्य हृदयाद्भेदसिद्ध्यर्थं तदुदाहरणं निष्प्रयोजनम्, तत्र कस्यापि विप्रतिपत्त्यभावात्। जीवे विज्ञानमयशब्दप्रयोगात् स्वाभिमतविपरीतार्थसाधिका चेयं श्रुतिः। ननु विज्ञानमय-शब्दोपस्थितादन्य एवान्तर्ज्योतिश्शब्देन स्वप्रकाशत्वपरेणोपस्थाप्यते, विज्ञानमयस्य स्वप्रकाशत्वासंभवादिति चेत्, हन्त सम्यमुपपादितं सामानाधिकरण्यम्। विज्ञायतेऽनेनेति विज्ञानमित्यन्तःकरणार्थकेन विज्ञानपदेन तदुपहितस्वरूपलक्षणया सामानाधिकरण्यमिति चेत्, विज्ञानशब्दार्थे विप्रतिपद्यमानं [५]अहमर्थात्मत्ववादिनम् प्रति एतच्छ्रुतेरनुदाहर्तव्यत्वात्।

---

[१] अन्यकोशेषु - उत्कर्षः

[२] ब्र.सू.१.१.१४

[३] तै.उ.२.७

[४] बृ.उ.६.३.७

[५] ख, ङ - अहमर्थात्मवादिनम्; छ - अहमर्थात्मकत्ववादिनम्

१. उपोद्घातः

वस्तुतस्तु इयं श्रुतिः ज्ञानगुणकत्वं ज्ञानात्मकत्वं चाह - [१]'**सुषुप्त्युत्क्रान्त्योर्भेदेन**' इति। अत्रापि कर्तृजीववैलक्षण्यं न प्रतिपाद्यते, जीवविलक्षणपरमात्मपरत्वमेव षष्ठ-प्रपाठकस्योच्यते। एतच्च [२]'**पाराशर्यविजये**' स्पष्टमभिहितमस्माभिः, तत्रैव द्रष्टव्यम्।

---

[१] ब्र.सू.१.३.४३

[२] **पाराशर्यविजये प्रथमाध्यायस्य तृतीयपादः - सुषुप्त्युत्क्रान्त्योर्भेदेन** - व्यपदेशादिति वर्त्तते। बृहदारण्यके - 'प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्च न वेद नान्तरम्' इति सुषुप्तौ 'प्राज्ञेनात्मना अन्वारूढ उत्सर्जन्याति' इत्युत्क्रान्तौ च 'कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु' इति प्रकृतत्वात् प्रत्यगात्मनः परमात्मनो भेदेन व्यपदेशात् जीवभिन्नः परमात्मा स इत्येव। न च स्वपत उत्क्रामतो वाप्यकिञ्चिज्ज्ञस्य तदानीमेव स्वेनैव सर्वज्ञेन संपरिष्वंगान्वारोहौ संभवतः। न च क्षेत्रज्ञान्तरेण तस्यापि सर्वज्ञत्वासंभवादिति। अस्तु मुक्तावस्थेनात्मनान्वारोह इत्यत्राह - 'पत्यादिशब्देभ्यः'। अयं परिष्वञ्जकः परमात्मा उत्तरत्र पत्यादिशब्दैर्व्यपदिश्यते 'सर्वस्य वशी सर्वस्येशानस्सर्वस्याधिपतिस्स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयानेष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदायेति।' एते च पतित्वजगद्विधरणत्वसर्वेश्वरत्वादयः प्रत्यगात्मनि मुक्तावस्थेपि न कथञ्चित् संभवन्ति। ऐक्योपदेशभेदनिषेधौ तु प्रकार्य्येकत्वनिबन्धनाविति वक्ष्यते। श्रुतौ - <u>विशिष्ट</u> (वशी) शब्दस्य प्रथमोपात्तत्वेऽपि पतिशब्दस्यावृत्तत्वात् 'पत्यादिशब्देभ्य' इत्युक्तम्। अधिपत्यादि शब्देभ्य इत्यनुक्तिः 'पतिं विश्वस्य' इत्यादिरस्य प्रकरणस्यैकार्थ्येन विशेष्यस्य परमात्मनो नारायणत्वद्योतनार्थम्। अव्यवहितपूर्ववाक्ये परमात्मनः प्रकृतत्वस्य 'ते यदन्तरा' इति प्रत्यभिज्ञायाश्च स्पष्टत्वात् स्पष्टलिंगता, सूत्रक्रमस्तु स्पष्ट इति। परे तु 'सुषुप्त्युत्क्रान्त्योर्भेदेन' । बृहदारण्यके 'कतम आत्मा' इति पृष्टेन याज्ञवल्क्येन 'योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुष' इत्यारभ्य 'भूयानात्मा विषयः प्रपञ्चः कृतः। स तावत् संसार्य्यात्मविषयः, न तु परमेश्वरविषयः। तत्र सन्देहः किमयं सन्दर्भस्संसारिस्वरूपमात्राख्यानपरः, उत संसारिणमनूद्य तस्यासंसारिब्रह्मरूपत्व-प्रतिपादनपर' इति। अत्र 'आदिमद्ध्यावसानेषु संसार्य्यात्मानुवर्ण्यते । तस्मात्तत्पर एवायं सन्दर्भ इति युज्यत' इति पूर्वपक्षः। सिद्धान्तस्तु संसारिणो जीवस्यासंसारिपरमेश्वराभेदपरस्य सन्दर्भस्य कुतो नाद्रीयते, किं संसारिणोऽर्थान्तरभूतः परमेश्वरो अस्तीति उतास्मिन् प्रकरणे सोऽर्थः कुतोपि शब्दान्न प्रतीयत इति। नाद्यः सुषुप्त्युत्क्रान्त्योर्भेदेनास्ति संसारिणोऽर्थान्तरभूतः परमेश्वरः अस्मिन् प्रकरणे सुषुप्त्युत्क्रान्त्योस्तस्य ततोऽपि भेदेन व्यपदेशात्। नापि द्वितीयः, 'पत्यादिशब्देभ्यः' 'एष सर्वेश्वरः एष भूताधिपतिः' इत्यादयश्शब्दा हि परमेश्वरवाचकाः प्रकृतसंसारिवाचिभिः शब्दैस्सामानाधिकरण्येन निर्दिष्टास्तस्य तदभेदं प्रत्याययन्ति। अत इदं सूत्रद्वयमधिकरणान्तरमिति। अपरे तु सुषुप्त्युत्क्रान्त्योर्भेदेन 'स वा एष एतस्मिन् संप्रसादे रत्वा चरित्वा दृष्ट्वैव पुण्यञ्च पापञ्च पुनः प्रतिन्यायं प्रतियोन्याद्रवति स्वप्नायैव स यत्तत्र किञ्चित् पश्यत्यनन्वागतस्तेन भवत्यसंगो ह्ययं पुरुष' इति बृहदारण्यकवाक्यं विषयः। अत्रोक्तिः स्वप्नदृष्टा किं जीव उतेश्वर इति पूर्वः पक्षः, जीवस्यैव स्वप्नद्रष्टृत्वेन प्रसिद्धत्वादिति। राद्धान्तस्तु विष्णुरेवायमसंगत्वलिंगात्। न च जीवस्यापि ब्रह्माभेदेन

[१]'**द्वा सुपर्णा**' इति श्रुतिरपि न जीवस्य भोक्तृभेदे प्रमाणम्, आत्मपरमात्मपरत्वात्। न च तयोर्भेदे [२]'**ब्रह्म वेद ब्रह्मैव भवति**' इति श्रुतिविरोधः। न ह्यभेदो वेदनसाध्य इत्यनुन्मत्तो ब्रवीति। एवकारबलात्तत्र सादृश्यमेव विवक्षितमित्युक्तमेव। अतो [३]'**निरञ्जनः परमं साम्यमुपैति**' इति श्रुतिसमानार्थतया सम्यगेव श्लिष्यते। न चैकविज्ञानेन सर्वविज्ञान-प्रतिज्ञासंभवः सिद्धान्त एव तत्संभवस्य मतान्तरे तदसंभवस्य च '**सद्विद्याविजये**' उपपादितत्वात्।

पिप्पलादनं च नान्तःकरणस्य, तस्यैव संसारप्रसङ्गात्। किन्तु तदवच्छिन्नस्यात्मन एव। जीवस्य भोक्तृत्वमनुभवसिद्धमिति हि त्वयाप्युच्यते। ततश्च ततोऽन्यत्वेन प्रतिपाद्यमानं ब्रह्मैव स्यात्, न तु जीवः। पैङ्गिरहस्ये - सत्त्वशब्दो जीवपर एव, '**सत्त्वमस्त्री तु जन्तुषु**' इत्यभिधानात्। जन्तुश्च चेतनः। [४]'**प्राणी तु चेतनो जन्मी**

तन्निर्वाहः, सुषुप्त्युत्क्रान्त्योः जीवेश्वरयोर्भेदेन व्यपदेशात्। स्वप्नपदार्थानां वियदादिवदीश्वरसृष्टत्वेन तद्द्रष्टत्वमीश्वरेऽपि संभवति। पत्यादिशब्देभ्यः। 'एष नित्यो महिमा ब्राह्मणस्य वर्धते न कर्मणा नो कनीयान्। तस्यैव स्यात् पदवित्तं विदित्वा न कर्मणा लिप्यते पापकेन' इति वाजसनेयकवाक्यं विषयः। अत्र ब्राह्मणशब्दोक्तः किं विरिञ्चः किं वा विष्णुरिति सन्देहे विरिञ्च इति पूर्वपक्षः। वाक्यशेषे 'स एष महानज आत्मा' इत्यजशब्दस्य ब्राह्मणेऽनेकशब्दश्रवणात् तस्य च विरिञ्चे प्रसिद्धत्वादिति। राद्धान्तस्तु - विष्णुरेवायं ब्रह्मणः सर्वस्याधिपतिः सर्वस्येशानस्स वा एष नेति नेतीत्यादिशब्देभ्यः। अतस्सूत्रद्वयमधिकरणद्वयमिति। पक्षद्वयेऽपि पक्षनिर्देशेन पूर्वाधिकरणशेषत्वस्यैव स्वरसतः प्रतीतेरधिकरणान्तरत्वमनुपपन्नम्। किञ्च परपक्षे सन्दर्भो ब्रह्मरूपत्वप्रतिपत्त्यर्थ इति परमसाध्यं जीवादर्थान्तरभूतं ब्रह्मास्मीत्यवान्तरसाध्यञ्चाध्याहर्तव्यम्। तच्चानुवृत्तब्रह्मत्वसाद्ध्यकपूर्वसूत्रशेषत्व-संभवादयुक्तम्। अत एवापरपक्षे स्वप्नद्रष्टा विष्णुरसङ्गत्वादिति पक्षे तु सूत्रात् बहिरेव परिकल्प्य शिवस्य ब्रह्माभेदेनासङ्गत्वसंभवशङ्कायां जीवब्रह्मभेदसाध्यकं सुषुप्त्युत्क्रान्त्योर्भेदेनेति सूत्रमिति कल्पनमपास्तमिति।

[१] **द्वा सुपर्णा** सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति।। (श्वे.उ.४.६; मु.उ.३.१.१)

[२] स यो ह वै परमं **ब्रह्म वेद ब्रह्मैव भवति** नास्या ब्रह्मकुले भवति।
तरति शोकं तरति पाप्मानं गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति।। (मु.उ.३.२.९)

[३] यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम्।
तदा विद्वान् पुण्यपापे विधूय **निरञ्जनः परमं साम्यमुपैति**।। (मु.उ.३.१.३)

[४] अ.को.१.९१

जन्तुर्जन्यशरीरिणः' इति पाठात् क्षेत्रज्ञोऽपि ईश्वर एव। [१]'**योऽस्यात्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षते**' इति मानववचनाच्छारीरोपीश्वर एव जगच्छरीरकतया तस्य श्रुति-प्रसिद्धत्वात्। अत एव ब्रह्ममीमांसायाः शारीरकत्वप्रसिद्धिरपि।

उपद्रष्टृत्वमपीश्वरस्यैव, जीवस्य द्रष्टृमात्रत्वात्, तदध्यक्षत्वरूपोपद्रष्टृत्वस्य ब्रह्मण्येव संभवात्।

यदुक्तम् - [२]'**येन**' इति तृतीया नोपपद्यत इति। तत्र किं '**तयोरन्यः पिप्पलं स्वाद्वत्ति**' इति सत्त्वमित्युक्तत्वात् सत्त्वात् सत्त्वान्तरमेव, [३]'**तदेतत् सत्त्वं येन**' इत्यत्रोपदिश्यते, उत तदेव। नाद्यः, '**द्वा सुपर्णा**' इत्यत्र जीवपरमात्मप्रतिपादनाविरोधात्। अस्तु तर्हि द्वितीयः पक्ष इति चेत्, सम्यगभ्यस्तः त्वया वृषळोद्वाहमन्त्रः। येन पिप्पलात्तैव स्वप्नदर्शनरूपे भोगे करणत्वान्न कर्तेति ब्रूषे, मनसश्च करणत्वं तवानिष्टमेव।

[४]यच्चेदमुच्यते - अहमर्थो नात्मा, सुषुप्तिमोक्षयोरननुवर्तमानत्वादात्मनश्च नित्यत्वादिति, तन्न, अहमर्थस्य सुषुप्तिमोक्षयोरनुवर्तमानत्वात्। न च सुषुप्तावनुवृत्तौ तदानीमहमनुभवप्रसङ्गः, इष्टत्वात्। अत एव [५]'**नाह खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मि**' इत्युच्यते। यदि चाहमर्थस्याप्रकाश एव स्यात् तदाहमस्मीत्येव निर्दिश्येत, न तु '**अयमहमस्मि**' इति। अयमिति मनुष्यत्वादिपरम्, मनुष्यत्वादिरूपेण स्वात्मानं न जानातीत्यर्थः। यथा - [६]'**कश्चिद्धवा अस्माल्लोकात्प्रेत्य। आत्मानं वेद।**

---

[१] **योऽस्यात्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षते।**
यः करोति तु कर्माणि स भूतात्मोच्यते बुधैः।। (मनु.स्मृ.१२.१२)

[२] तदेतत् सत्त्वम्। येन स्वप्नं पश्यति, अथ योऽयं शारीर उपद्रष्टा स क्षेत्रज्ञः। तावेतौ सत्त्वक्षेत्रज्ञौ' इति सत्वक्षेत्रज्ञशब्दयोः अन्तःकरणजीवशब्दाभ्यां पैङ्गिश्रुत्यैव व्याख्यातत्वात्। 'येन' इति करणत्व-प्रतीतेः सत्त्वमन्तःकरणम्। स्वप्नद्रष्टृत्वात् क्षेत्रज्ञो जीव इति। (मु.उ.३.१.२भाष्ये)

[३] पैङ्गिरहस्यब्राह्मणम्

[४] इतः आरभ्य एषो भागः 'अहमर्थानात्मत्वभङ्ग' इति विदुषां तिरुनारायणपुरवासिनां अरैयर् श्रीरामशर्मणामभिप्रायः।

[५] तद्यत्रैतत्सुतः समस्तः संप्रसन्नः स्वप्नं न विजानाति, एष आत्मेति होवाच - एतदमृतमभयमेतत् ब्रह्मेति। स ह शान्तहृदयः प्रवव्राज। स हाप्राप्यैव देवानेतद्भयं ददर्श - **नाह खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति**, नो एवेमानि भूतानि। विनाशमेवापीतो भवति। नाहमत्र भोग्यं पश्यामि। (छा.उ.८.११.१-२)

[६] तै.ब्रा.३.१०.११.१

अयमहमस्मीति।' [1]"**अथ यो है एवैतमग्निं सावित्रं वेद। स एवास्माल्लोकात् प्रेत्य। आत्मानं वेद। अयमहमस्मीति**' इत्यादौ। न च '**किमपि नावेदिषम्, मामप्यहं नावेदिषम्**' इति सुप्तोत्थितपरामर्शदर्शनात् तदाहमनुभवाभावः शङ्कनीयः। तथा सति संविदज्ञानयोरपि प्रकाशाभावप्रसङ्गात्।

एतेन - [2]"**प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्**' इति श्रुत्या सुषुप्तावहमर्थाप्रकाश इति निरस्तम्। न च मोक्षे अहमर्थानुवृत्तावज्ञानदुःखादेरनुवृत्ति-प्रसङ्गः, संविदनुवृत्तावपि तथा प्रसङ्गात्।

यच्चाहंशब्दप्रत्यभिज्ञानादहंकार एवाहमर्थ इति निश्चीयते, स च [3]क्षेत्रान्तर्गतो भगवता परिगणितः। [4]"**महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च**' इत्यारभ्य [5]"**एतत् क्षेत्रम्**' इति वचनात्। [6]"**निर्ममो निरहङ्कार**' इत्यदिषु च हेयतया अयं [7]उद्दिश्यते। अतो नात्मा भवितुमर्हतीति, तन्न, बुद्धिशब्दप्रत्यभिज्ञानेन त्वदभिमतसंविदोऽपि बुद्धिपर्यायवाच्य-महत्तत्वानतिरेकप्रसङ्गात्। अध्यवसायाख्यकार्योपकरणत्वमात्रेण तत्र बुद्धिशब्द इति चेत्, [8]तर्ह्यनात्मनि देहेऽहमभिमानाख्यकार्यकरतया[9] अत्राप्यहंकारशब्द इति भाव्यम्, अभूत-तद्भावार्थ च्विप्रत्ययमुत्पाद्याहंकारपदव्युत्पादनसंभवात्।

यच्चेदमुच्यते - अहमनुभवविषयस्यात्मत्वे प्रतिशरीरं दुःखादिधर्मिणस्तस्य भेद आवश्यक इति गौरवम्, तदतिरिक्तस्य तु भेदे प्रमाणाभावाल्लाघवम्। न चाहमर्थान्य-कल्पनागौरवम्, त्वयाप्यन्तःकरणात्मभेदस्वीकारात्। अहमनुभवगोचरस्यात्मत्वे हि

---

[1] तै.ब्रा.३.१०.११.१

[2] बृ.उ.६.३.२१

[3] क, ङ - क्षेत्रान्तर्भूतः; ख - क्षेत्रान्तर्भावः; च - क्षेत्रान्तर्हितः

[4] **महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च।**
इन्द्रियाणि दशैकञ्च पञ्च चेन्द्रियगोचराः।। (महा.भीष्म.३७.५; भ.गी.१३.५)

[5] इच्छा द्वेषः सुखं दुःखं सङ्घातश्चेतना धृतिः।
एतत् क्षेत्रम् समासेन सविकारमुदाहृतम्।। (महा.भीष्म.३७.७; भ.गी.१३.६)

[6] विहाय कामान्यः सर्वान् पुमांश्चरति निःस्पृहः।
निर्ममो निरहङ्कारः स शान्तिमधिगच्छति।। (महा.भीष्म.२६.७१; भ.गी.२.७१)

[7] ङ, च - उपदिश्यते

[8] क - तस्य नात्मनि; ख - तर्ह्यात्मनि

[9] ख - कार्यकरणतया

विवादः। न चैवमहमनुभवगोचरस्य ज्ञानाश्रयत्वानुभवविरोधः, ज्ञानाश्रयस्यात्मत्वनियमग्राहकप्रमाणाभावात्, आत्मग्राह्यत्वेन बुद्ध्यादीनां रूपादिवदनात्मधर्मत्वात्। किञ्च 'मामहं जानामि' इति ज्ञानविषयत्वमहमर्थस्यानुभूयते। तच्च न स्वसमवेतजन्यज्ञानविषयत्वेन निरवयवात्मन्यव्याप्यवृत्तिसंयोगासंभवेन [१]ज्ञानसामग्र्यभावात्। नाप्यहमर्थधर्मो नित्यज्ञानमस्ति, आत्मातिरिक्तनित्यज्ञाने प्रमाणाभावात्। न च विषयस्य स्वप्रकाशत्वं संभवति।

किञ्च [२]'**स्वमपीतो भवति**' इति सुषुप्तौ लयः श्रूयते। न च ज्ञानस्यैव लयः, [३]'**यत्रैतत् पुरुषः स्वपिति नाम**' इति प्रक्रान्तपुरुषप्रतियोगिकत्वात्। न च जीवस्य स्वरूपेण विलयोऽस्ति, प्रत्यभिज्ञाविरोधात्, कृतहानादिप्रसङ्गात् सत्संपत्तिविरोधाच्च। उपाधिलये जीवस्य [४]तदभिमानिनः अपि लयो भवति। सत्संपत्तिवाक्यानुसारेण पुरुषलयवाक्यस्य तथैवार्थवर्णनात् तटस्थोपाधेर्विलयेऽप्युपहिते लयबुद्ध्यदर्शनात्, स उपाधिः जीवतादात्म्यापन्नोऽहमनुभवगोचरः, तस्यैव लयः, अन्यथा जाग्रतीव सुषुप्तावपि, अहमाकारधीः स्यात्। तथात्वे चाहमित्यभिमन्यमान एवास्वाप्समिति परामर्शप्रसङ्गः तस्यानुभवनियमात् जाग्रति तदनुभवतया निर्णीतचैतन्यस्य तदापि सत्त्वात्। न चानुभवस्मरणयोर्वैयधिकरण्यम्, [५]कृतहानाकृतागमो वा, तदापि सूक्ष्मरूपान्तःकरणावच्छिन्नचैतन्यस्य सत्त्वात् तावतैवातिप्रसङ्गपरिहारात्।।

ननु किं सूक्ष्मत्वं कारणात्मतापत्तिरिति चेत्, किं कारणमेव वर्तते उत कार्यमपि। आद्ये, नान्तःकरणसत्त्वम्, द्वितीये, न जाग्रदवस्थातो विशेष इति चेन्न, सूक्ष्मताया अनिर्वचनीयत्वात्। न च तत्र प्रमाणाभावः, सतोऽसतो वोत्पत्त्यनुपपत्त्या [६]'**असद्वा इदमग्र आसीत्**' इति श्रुत्या च कार्यमात्रे तस्यावश्याभ्युपेयत्वात्। अनभिव्यक्तरूपत्वस्यैव असच्छब्दार्थत्वात् तुच्छत्वे आसीदिति विरोधादिति।

---

[१] ङ - ज्ञानसामग्र्या अभावात्

[२] उद्दालको हारुणिः श्वेतकेतुं पुत्रमुवाच - स्वप्नान्तं मे सोम्य विजानीहीति। **यत्रैतत् पुरुषः स्वपिति नाम**, सता सोम्य तदा सम्पन्नो भवति। **स्वमपीतो भवति**। तस्मादेनं स्वपितीत्याचक्षते, स्वँ ह्यपीतो भवति। (छा.उ.६.८.१)

[३] छा.उ.६.८.१

[४] घ, ङ - तदभेदाभिमानिनः

[५] ख, च - कृतहानाकृतागमौ

[६] तै.उ.२.७

अत्रोच्यते - न तावत् भेदकल्पनागौरवम्, तस्याः प्रामाणिकत्वेनादोषत्वात्। न च भेदे प्रमाणाभावः, तथा सत्यौपाधिकभेदस्याप्युत्सादात्।

ततश्च कस्यचित् वस्तुविशेषस्य प्रतिबिम्बोद्ग्राहित्वकल्पनं भेदस्य [१]तादधीन्यकल्पनं तत्प्रतीतेर्भ्रमत्वकल्पनं द्वयोरहंप्रतीतिविषयत्वकल्पनमप्रतिपन्नाभेदकल्पनं चेति महदिदं गौरवम्। यच्च ज्ञानविषयत्वात्, अहमर्थस्यात्मभेदसमर्थनम्। तदपि न, अप्रयोजकत्वात्।

न च ज्ञानविषयत्वासंभवः स्वप्रकाशमात्रात् [२]स्वसमवेतज्ञानविषयत्वात् वा, मामहं जानामीति प्रतीत्युपपत्तेः, अभेदेऽपि विषयत्वसमर्थनात्। न च ज्ञानसामग्रीविरहः, मनःसन्निकर्षसत्वात्। न च संयोगासंभवः, स्वरूपसंबन्धविशेषस्य सामग्रीत्वोपपत्तेः। तत्संयोगस्याव्याप्यवृत्तित्वं वा त्यज्यताम्। [३]शाब्दप्रत्यक्षवत् संनिकर्षाजन्यं मनोजन्यमिति वा कल्प्यताम्। नित्यमेव ज्ञानं किञ्चिदात्मगोचरमात्मसमवेतमिति वा कल्प्यताम्। सर्वमपि त्वत्कुसृष्ट्यपेक्षया श्रेय एव।

अहमर्थगोचरज्ञानाश्रयत्वमहमर्थस्य हि प्रतीयते। न चान्तःकरणस्य स्वगोचर-वृत्त्याऽऽश्रयत्वमिष्यते, चैतन्यविषयत्वाङ्गीकारेऽपि न तस्याहमर्थाश्रयत्वसंभवः। ततश्चाहमाकारां वृत्तिमङ्गीकृत्य तद्विषयत्वमेव प्रतीयत इति वाच्यम्। तत्र च त्वदुक्त एव दोषस्संनिकर्षाभावः।

यच्च जीवस्य सुषुप्तौ श्रूयमाणो लयोऽहमभिमानगोचरोपाधिलयादेव वाच्य इति तन्न, अहमभिमानगोचरशरीरनाशेऽपि जीवनाशाव्यपदेशात्। अतो [४]'**नाह खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मि**' इत्युक्तमनुष्यत्वाद्यभिमानाभावरूपज्ञानसंकोचावस्थाया एव लयश्रुतिविषयत्वसंभवेऽन्तःकरणस्याहमर्थत्वकल्पना संभवात्।

यच्च सुषुप्तौ, अहमर्थस्य सत्त्वे सः प्रकाशेतेति, तन्न, इष्टत्वात्। न चाहमित्यभिमन्यमान एव, अस्वाप्समिति परामर्शप्रसङ्गः, आत्मस्वरूपस्यैव स्वाभिमति-

---

[१] ख - तदधीनकल्पनम्

[२] च - समवेतजन्यज्ञानविषयत्वात्

[३] क, घ, ङ, छ - शब्दप्रत्यक्षवत्

[४] **नाह खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति**, नो एवेमानि भूतानि। विनाशमेवापीतो भवति। नाहमत्र भोग्यं पश्यामि। (छा.उ.८.११.१-२)

रूपतया तदाश्रयत्वाभावात्। न चाहमित्यभिमतिः [१]आसम् इति परामर्शप्रसङ्गः, ज्ञानत्वस्याहंत्वप्रकारकत्वस्य च स्वरूपाप्रकाश्यत्वात्, कथमन्यथाज्ञानमनुभवन्नेव, अहमस्वाप्समिति परामर्शप्रसङ्गस्त्वया परिहार्यः, अहमर्थस्तु परामृश्यते अहमस्वाप्समिति, अतस्तत्सत्त्वमावश्यकम्।

किञ्चाहमनुभवस्मरणयोर्वैयधिकरण्यं कृतहानाकृताभ्यागमादिप्रसङ्गश्च। न च सूक्ष्मरूपेण परिहारः। तस्य सुषुप्तौ प्रकाशमानत्वे तत्स्मृतिप्रसङ्गात्, अप्रकाशमानत्वे च तदध्यासस्यैवासिद्धेः, [२]सूक्ष्मरूपम् च दुर्निरूपम्। यदुक्तं तद्भूषणमेवेति, तत् किमुत्पत्तिः नानिर्वचनीया, यदुपपादनाय सूक्ष्मरूपं कल्पयसि अनुपपादकञ्च, तत्कार्यस्यैव [३]तत्त्वे सत्त्वादेवोत्पत्त्यनुपपत्तेः। कार्यस्य ततो भेदे चासतः उत्पत्त्यसंभवात् [४]'**असद्वा इदमग्र आसीत्**' इति श्रुतिर्न सूक्ष्मरूपे मानम्, [५]तस्य कार्यावस्थाप्रहाणपरत्वोपपत्तेः। अनभिव्यक्तस्वरूपमसच्छब्दार्थ इति ह्युक्तम्। तच्चोक्तार्थ एवोपपद्यते, कारणस्यावस्था-विशिष्टरूपेणाभिव्यक्त्यभावात्।

तस्मात् [६]'**स यथा शकुनिः सूत्रेण प्रतिबद्धो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा बन्धनमेवोपश्रयते, एवमेव खलु सोम्य तन्मनो दिशं दिशं पतित्वान्यत्राऽऽयतनमलब्ध्वा प्राणमेवोपश्रयते। प्राणबन्धनं हि सोम्य मन इति**' मनसो व्यापारोपरममात्रश्रवणात् न मनसो लयः, अतो ज्ञानसंकोच एव विवक्षित इति।

किञ्चाहमर्थस्यात्मभेदे ईश्वरस्याहंबुद्ध्यभावप्रसङ्गः। श्रूयते हि [७]'**हन्ताहमिमाः तिस्रो देवता**' इति। स्मर्यते च [८]'**अहं कृत्स्नस्य जगत**' इत्यादि। किञ्च -

---

[१] ङ - अस्वाप्सम्

[२] ग - सूक्ष्मरूपत्वम्

[३] च - सत्त्वे

[४] तै.उ.२.७

[५] घ, ङ - तस्याः

[६] छा.उ.६.८.२

[७] सेयं देवतैक्षत **हन्ताहमिमास्तिस्रो देवता** अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति। (छा.उ.६.३.२)

[८] एतद्योनीनि भूतानि सर्वाणीत्युपधारय।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा।।
मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय।

[१]‘**आत्मानं चेद्विजानीयादयमस्मीति पूरुषः।**
किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत्’

इति निष्कृष्टात्मविषयं ज्ञानमहंत्वप्रकारकतयाऽभिलपन्ती श्रुतिरहमर्थस्यानात्मत्वे विरुध्यते। [२]‘**आत्मन्येष न दोषाय शब्दोऽहमिति यो द्विज**’ [३]‘**अनात्मन्यात्मविज्ञानं शब्दो वा भ्रान्तिलक्षण**’ इति स्मृतिश्च। तत्र हि दोषत्वं भ्रान्ततापादकत्वम्, उत्तरत्र ‘भ्रान्तिलक्षण’ इत्युक्तत्वात्। ‘शब्दोऽहम्’ इत्यत्र बुद्धिरपि विवक्षिता, उत्तरत्र ‘आत्मविज्ञानम्’ इत्युक्तत्वात्, सा च बुद्धिरहमिति शब्दसमानविषया। अहमिति बुद्धिरेव, सैव उत्तरत्र ‘आत्मविज्ञानम्’ इत्युच्यते इति स्वरसतः प्रतीयते। किञ्च [४]‘**विरजा विपाप्मा भूयासम्**’ [५]‘**ब्रह्मलोकमभिसंभवानि**’ इत्यहमर्थसंबन्धितया मुक्तिरभिलप्यते। तस्मादहमर्थ एवात्मा। अत एव द्वितीयेंशे त्रयोदशेऽध्याये -

[६]‘**शब्दोऽहमिति दोषाय नात्मन्येवं तथैव तत्।**
अनात्मन्यात्मविज्ञानं शब्दो वा भ्रान्तिलक्षणः’ इति।

‘अहमिति शब्दो न दोषाय’ इत्युक्त्या, ‘शब्दो वा भ्रान्तिलक्षण’ इत्यत्रापि स एव विवक्षितः।

[७]‘**यद्यन्योऽस्ति परः कोऽपि मत्तः पार्थिवसत्तम।**
तदैषोऽहमयं चान्यो वक्तुमेवमपीष्यते।’

अत्र परशब्दोऽन्यपरः, अन्यशब्दो वैजात्यपरः। यदि वस्तुतो मदन्यः ज्ञानस्वरूपान्मत्तो विलक्षणः स्यात्, तदानीं ह्येषोऽहमहं ज्ञानाकारः अन्यस्तद्विलक्षणः अज्ञानाकार इत्यात्मा

मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव।। (महा.भीष्म.३१.६-७; भ.गी.७.६-७)

[१] बृ.उ.६.४.१२

[२] योऽस्ति योऽहमिति ब्रह्मन् कथं वक्तुं न शक्यते।
आत्मन्येव न दोषाय शब्दोऽहमिति यो द्विज।। (ना.पु.१.२.४८.७६)

[३] शब्दोऽहमिति दोषाय नात्मन्येवं तथैव तत्।
अनात्मन्यात्मविज्ञानं शब्दो वा श्रुतिलक्षणः।। (ना.पु.१.२.४८.७७)

[४] ज्योतिरहं **विरजा विपाप्मा भूयासम्।** (म.ना.उ.२०.१५-२५)

[५] श्यामाच्छबलं प्रपद्ये शबलाच्छ्यामं प्रपद्ये। अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात् प्रमुच्य। धूत्वा शरीरमकृतं कृतात्मा **ब्रह्मलोकमभिसंभवामीति**। अभिसंभवामीति। (छा.उ.८.१३.१)

[६] ना.पु.१.२.४८.७७

[७] ना.पु.१.२.४८.८१

निर्देष्टुं [1]शक्येत इत्यर्थः। ब्राह्मण्यक्षत्रियत्वादिर्नात्मवैलक्षण्यनिर्देशनिमित्तं ब्राह्मण्यादीनां शरीरगतत्वादिति भावः। देहात्मवैलक्षण्यस्येह प्रतिपिपादयिषितत्वात् अत्रात्मनां स्वरूपतो वैलक्षण्ये सति 'एषोऽहम्' 'एतादृशोऽहम्' 'अयं चान्यः' 'अयमन्यादृश' इति वक्तुं शक्यत [2]इत्युक्त्वा आत्मैवाहमर्थ इत्युक्तम्।

[3]'**यदा समस्तभूतेषु पुमानेको व्यवस्थितः।**
तदा हि को भवान् सोऽहमित्येतद्विफलं वचः।।'

एकः - एकरूपः समस्तभूतेष्वात्मन एकरूपस्यैव विद्यमानत्वात् देवादिभेदस्य तत्रासिद्धेः। 'को भवान् देवो वा ब्राह्मणो वा क्षत्रियो वा इति वचः, सोऽहं देवोऽहं मनुष्योऽहं ब्राह्मणोऽहं क्षत्रियोऽहम्' इति वचः [4]विफलम् इत्यर्थः। सोऽहमिति विशिष्टनिषेधस्य[5] विफलत्वोक्त्या, अहमिति वचस्सफलमिति सिद्धम्, साफल्यं चात्र यथार्थत्वम्। अतः सिद्धमहमर्थस्यात्मत्वम्।

यदप्याह - [6]'**आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण**' इति श्रुतिरेव मनः तादात्म्यापन्नस्यात्मनो भोक्तृत्वे मानम्, मनस्तादात्म्यस्यैव मनोयोगत्वात्। [7]'**स समानः सन्नुभौ लोकावनुसञ्चरति ध्यायतीव लेलायतीव**' इति श्रुतिरप्यत्र मानम्। इव शब्दस्य मिथ्यात्वद्योतकत्वात्। भगवानपि केवलात्मनि केवलकर्तृत्वं निषेधति -

[8]'**तत्रैवं सति कर्तारमात्मानं केवलं तु यः।**
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः' इति।

---

[1] ख, घ, ङ - शक्यते

[2] ख, घ, ङ, च - इत्युक्त्या

[3] यदा समस्तभूतेषु पुमानेको व्यवस्थितः।
तदा हि को भवान् कोऽहमित्येतद्विफलं वचः। (ना.पु.१.२.४८.८२)

[4] ख - सफलमित्यर्थः

[5] ङ - विषयस्य

[6] इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः।। (कठ.१.३.४)

[7] कतम आत्मेति। योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः। **स समानः सन्नुभौ लोकावनुसञ्चरति ध्यायतीव लेलायतीव**। स हि स्वप्नो भूत्वेमं लोकमतिक्रामति मृत्यो रूपाणि। (बृ.उ.६.३.७)

[8] महा.भीष्म.४२.१६; भ.गी.१८.१६

तथा श्रीभागवते भगवद्वचनम् -

[१]"**शोकहर्षभयक्रोधलोभमोहस्पृहादयः।**
अहंकारस्य दृश्यन्ते जन्म मृत्युश्च नात्मनः' इति।

उच्यते - शरीरेन्द्रियसाधारणयोगस्यैव मनसा संभवात् न '**आत्मेन्द्रिय**' इति श्रुतिरत्र प्रमाणम्। '**ध्यायतीव**' इत्यत्र 'इव' शब्दोऽल्पार्थः भुक्तमिवेतिवत्। स्वहितं चिन्तयन्न कार्त्स्न्येन चिन्तयितुं शक्नोति, स्वहितं चरन्न कार्त्स्न्येन चरितुं शक्नोतीत्यर्थः। [२]"**कर्ता बोद्धा विज्ञानात्मा पुरुष**' इति इममेव पुरुषं प्रत्यभिज्ञाप्य कर्तृत्वादिकथनात्। यद्वा [३]"**तस्मादेवं विद्वान्। वीव नृत्येत्। प्रेव चलेत्**' इत्यत्र यथा विनृत्तत्वे प्रचलनत्वे सत्यपि तत्प्रयोजकत्वेनोन्मत्ते सिद्धस्योन्मादस्याभावात् इवशब्दप्रयोगः। एवमिहापि भगवति संकल्पप्रयोजकत्वस्य सत्यसंकल्पत्वस्य प्रवृत्तिप्रयोजकस्याप्रतिहतशक्तित्वस्य च जीवे अभावात् इवशब्दप्रयोगः।

यद्वा [४]'**तस्यैषा श्रुतिः यत्रैतत्कर्णावपि गृह्य निनदमिव नदथुरिवाग्नेरिव ज्वलत उपशृणोति**' इत्यत्र यथा प्रसिद्धवैधर्म्यात् इवशब्दप्रयोगः, एवमिहापि। वैधर्म्यञ्च प्रागुक्तमन्यप्रेर्यत्वादिकञ्च। उपक्रमे [५]'**उभौ लोकावनुसञ्चरति**' इत्यभिधानेन कर्तृत्व-निषेधासंभवात्, एवमेवार्थस्य वाच्यत्वात्।

'**स समानः सन्**' इति बुद्धिवैशिष्ट्याभिधानात्, औपाधिकत्वमेव कर्तृत्वस्योच्यत इति चेन्न, तस्य तत्प्रतिपादकत्वासंभवात्।

यदाह शंकरः - **स समानः** - सदृशः सन्, केन, संनिहितत्वात् हृदयेन। हृदिति च पुण्डरीकाकारो मांसपिण्डः तात्स्थ्यात् बुद्धिः हृत्। किं पुनः सामान्यम्? अश्वमहिषवत्

---

[१] भा.पु.११.२८.१५

[२] एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता
कर्ता बोद्धा विज्ञानात्मा पुरुषः स परेऽक्षर आत्मनि संप्रतिष्ठते। (प्र.उ.४.९)

[३] उत्तरत इतरान् पाप्मनः सचन्ते। **तस्मादेवं विद्वान्। वीव नृत्येत्। प्रेव चलेत्**। व्यस्येवाक्ष्यौ भाषेत। (तै.ब्रा.२.३.९.९)

[४] यत्रैतदस्मिञ्छरीरे सँस्पर्शेनोष्णिमानं विजानाति। **तस्यैषा श्रुतिः यत्रैतत्कर्णावपि गृह्य निनदमिव नदथुरिवाग्नेरिव ज्वलत उपशृणोति**। तदेतद्दृष्टं च श्रुतं चेत्युपासीत चक्षुष्यः श्रुतो भवति य एवं वेद य एवं वेद। (छा.उ.३.१३.८)

[५] बृ.उ.६.३.७

१. उपोद्घातः

विवेकतोऽनुपलब्धिरवभास्यावभासकयोर्विवेकतोऽनुपलब्धिः प्रसिद्धा, आलोको ह्यवभास्येन सदृशो भवति। यथा रक्तमवभासयन् रक्तसदृशो रक्ताकारो भवति, तथा पीतं लोहितं वावभासयनालोकस्तत्सदृशो भवतीति, तन्न, हृच्छब्देन मांसपिण्डस्यैवोपस्थापनात्। मुख्यार्थे बाधकाभावेन लक्षणानुपपत्तेः। ततश्च न बुद्धेस्सन्निधिः। तस्मात् समानः साभिमान इत्यर्थः।

यत्तु भगवानपि केवलात्मनि कर्तृत्वं [१]निषेधति इति, तत्तथैवान्तःकरण-तादात्म्याध्यासनिबन्धनमात्मनः कर्तृत्वमिति केवलशब्दतात्पर्यमिति न भ्रमितव्यम्, प्रकरणेनैव तद्भ्रमनिरोधात्।

[२]'**त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तित**' इति फलसङ्गकर्तृत्व-त्यागमुक्त्वा, एतदेव [३]'**यज्ञदानतपः कर्म**' इत्यारभ्य [४]'**यस्तु कर्मफलत्यागी स त्यागी**' इत्यन्तेनोपपाद्य कथं कर्तृत्वस्य त्यागः कृतिपरित्यागे कर्मण एवानिष्पत्तेः। नापि तद्बुद्धिपरित्यागः विषयाधीनत्वात् बुद्धेः। तस्मिन् सति तत्त्यागायोगादित्याशङ्क्य स्वतन्त्रकर्तृत्वबुद्धिपरित्याग एवात्र विवक्षित इत्यभिप्रायेण -

[५]"**पञ्चैतानि महाबाहो कारणानि निबोध मे।**
सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम्।।
अधिष्ठानं तथा कर्ता करणञ्च पृथग्विधम्।

---

[१] ङ - प्रतिषेधति

[२] निश्चयं शृणु मे तत्र त्यागे भरतसत्तम।
त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः।। (महा.भीष्म.४२.४; भ.गी.१८.४)

[३] **यज्ञदानतपः कर्म** न त्याज्यं कार्यमेव तत्। यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्।।
एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च। कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम्।।
नियतस्य तु सन्यासः कर्मणो नोपपद्यते। मोहात्तस्य परित्यागस्तामसः परिकीर्तितः।।
दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत्। स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत्।।
कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन। सङ्गं त्यक्त्वा फलञ्चैव स त्यागः सात्त्विको मतः।।
न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते। त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः।।
(महा.भीष्म.४२.५-१०; भ.गी.१८.५-१०)

[४] न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः।
यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते।। (महा.भीष्म.४२.११; भ.गी.१८.११)

[५] महा.भीष्म.४२.१३-१५; भ.गी.१८.१३-१५

विविधाश्च पृथक् चेष्टा दैवं चैवात्र पञ्चमम्।।
शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः।
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतव'

इति परमात्माधीनत्वमुक्तम्। संख्याबुद्धिः यथावस्थिततत्त्वविषयया वैदिक्या बुद्ध्यानुसंहिते निर्णयेऽधिष्ठानं शरीरम्। अधिष्ठीयत इति [1]'**कृत्यल्युटो बहुलम्**' इति कर्मणि व्युत्पत्तेः। [2]'**मघवन् मर्त्यं वा इदं शरीरमात्तं मृत्युना तदेतदशरीरस्यामृतस्यात्मनोऽधिष्ठानम्**' इति च वैदिकप्रयोगः। कर्ता जीवः। करणमिन्द्रियाणि [3]'**विविधा च पृथक् चेष्टा**' इति पञ्चात्मा वायुरभिधीयते। एवं चतुर्णामुपादानं दृष्टान्तार्थम्, लोकसिद्धतया विधानासंभवात्। दैवमिति विधिः। दैवं परमात्मा। [4]'**अन्तः प्रविष्टश्शास्ता जनानाम्**' '**य आत्मानमन्तरो यमयति**' इत्युक्तं नियन्तृत्वं विवक्षितम्।
एतद्विपरीतदर्शनं निषेधति -

[5]'**तत्रैवं सति कर्तारमात्मानं केवलं तु यः।**
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः' इति।

एवं सति परमात्माधीने कर्तृत्वे सति तत्र कर्मणि **आत्मानं** - जीवात्मानम्, **केवलं कर्तारं** - अनन्याधीनं कर्तारम्, **यः पश्यति स दुर्मतिः** - विपरीतमतिः, **अकृतबुद्धित्वात्** - अनिष्पन्नयथावस्थितबुद्धित्वात्, **न पश्यति** - न यथावस्थितं कर्तारं पश्यतीत्यर्थः। अयं प्रकरणपर्यालोचनसिद्धोऽर्थः तदपर्यालोचनेऽपि।

एवं सति केवलमिति पदाभ्यां पञ्चानां [6]करणत्वे सति चतुष्टयनिरपेक्षं जीवात्मानं कर्तारमात्मानं यः पश्यतीति प्रतीयते। एवञ्च तात्त्विकार्थे आपातार्थे च कर्तृत्वस्य नाहंकारोपाधिकत्वगन्धोऽपि।

---

[1] पा.सू.३.३.११३

[2] **मघवन् मर्त्यं वा इदं शरीरमात्तं मृत्युना तदस्यामृतस्याशरीरस्यात्मनोऽधिष्ठानम्**। आत्तो वै सशरीरः प्रियाप्रियाभ्याम्। न वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति। अशरीरं वा व सन्तं न प्रियाप्रिये स्पृशतः। (छा.उ.८.१२.१)

[3] अधिष्ठानं तथा कर्ता करणञ्च पृथग्विधम्।
विविधा च पृथक्चेष्टा दैवं चैवात्र पञ्चमम्।। (महा.भीष्म.४२.१४; भ.गी.१८.१४)

[4] **अन्तः प्रविष्टश्शास्ता जनानाम्** सर्वात्मा सर्वाः प्रजा यत्रैकं भवन्ति। (तै.आरण्य.३.११.२)

[5] महा.भीष्म.४२.१६; भ.गी.१८.१६

[6] क, ख, घ, ङ, ज - कारणत्वे

१. उपोद्घातः

यच्च भागवतं वचनं तत्र जन्ममृत्युशरीरसंबन्धवियोगौ[१] एव न चात्मनि तन्निषेधः शक्यः, दृश्यन्त इति च लोकसिद्धानुवादता प्रतीयते। न चाहंकारसंबन्धितया लोकसिद्धोऽयमर्थः। अतः अहमिति कृतिः अहंकारः देहात्माभिमानः, तत्संबन्धित्वञ्च लोकसिद्धमेव। तत एव शोकादिदर्शनात्। एवञ्च [२]'**कामोऽकार्षीत्,** [३]'**मन्युरकार्षीत् नमो नमः**' इतिवत् तादधीन्यनिबन्धनोऽयं व्यपदेशः।

एवं भूमविद्यायां जीवेशभेदः प्रतिपन्नः। तैत्तिरीये च - [४]'**सोऽश्नुते सर्वान् कामान् सह। ब्रह्मणा विपश्चिता**' [५]'**तस्माद्वा एतस्माद्विज्ञानमयात्। अन्योऽन्तर आत्मानन्दमयः**' [६]'**रसो वै सः। रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति। एष ह्येवानन्दयाति**' इति च ब्रह्माभेदस्यैव मोक्षत्वे रसं लब्ध्वाऽऽनन्दी भवतीति साध्यद्वयकीर्तनं पौर्वापर्यमानन्दाश्रयत्वञ्च नोपपद्यते।

यदाह नवीनः - '**सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा**' इत्यत्र सहश्रुतिः [७]ब्रह्मणा सहत्वं दर्शयन्ती न भेदं दर्शयति, ब्रह्मणः सहार्थत्वायोगात्। सहत्वं हि ब्रह्मणः पुत्रेण सहागतः पितेत्यत्रेव प्रधानक्रियानुकूलतज्जातीयक्रियाकर्तृत्वेन, किं वा पत्न्या इवानुज्ञामात्रेण। नाद्यः, ब्रह्मणोऽपि भोगप्रसङ्गात्। न द्वितीयः, ईश्वरस्य प्राणिमात्र-भोगेऽनुज्ञादातृत्वेन मुक्तौ तस्य विशिष्य निर्देशवैयर्थ्यात्। ब्रह्मणस्सहत्वे भृत्येन सह भुङ्क्ते राजेत्यत्र भृत्यस्येवाप्राधान्यमावश्यकमिति तस्य सर्वशेषित्वमपि भज्येत। तस्मात् [८]ब्रह्मणः सहत्वायोगात्, न सहयोगे तृतीया। नापि '**सर्वान् कामान्**' इति सर्वशब्द-बहुवचनाभ्यां मुक्तावनात्मभेदसिद्धिः, तयोरल्पत्वनिवृत्तिमात्रपरत्वात्। तव मतेऽपि

---

[१] ङ - वियोगात्

[२] **कामोऽकार्षीत्** नाहं करोमि कामः करोति कामः कर्ता कामः कारयिता एतत्ते काम कामाय स्वाहा। (म.ना.उ.१८.२)

[३] **मन्युरकार्षीत्** नाहं करोमि मन्युः करोति मन्युः कर्ता मन्युः कारयिता एतत्ते मन्यो मन्यवे स्वाहा। (म.ना.उ.१८.३)

[४] तै.उ.२.१.२

[५] तै.उ.२.५

[६] तै.उ.२.७

[७] ख - ब्रह्मणि; घ,ङ - ब्रह्मणः

[८] क, ग, घ, ङ, च, छ - ब्रह्मणा

सर्वशब्दस्यासंकुचितवृत्तेरसंभवात् जगत्सर्जनादीनां जीवेषु बाधितत्वात्। [१]पृथग्जनानां तत्र तत्र क्रमेण सर्वैः कामैरमरवधूपरिरम्भणादिभिरभिव्यङ्ग्यं यत्सुखं तदभिप्रायेण वा सर्वान् कामानिति। तृतीया चेत्थंभावे ब्रह्मरूपेण मुक्तस्सह युगपत् परमात्मानमनुभवतीत्यर्थः। तथा च स्मृतिः -

[२]'**सोऽश्नुते सकलान् कामानक्रमेण सुरर्षभाः।**
विदितब्रह्मरुपेण जीवन्मुक्तौ न संशयः' इति।

उच्यते - अत्र हि भोग्यसाहित्यमेव विवक्षितम्। गुणानां मोक्षे अनुभाव्यत्वध्रौव्यार्थं प्राधान्येन निर्देशः। सहशब्दस्य यौगपद्यार्थत्वमनुपपन्नम्, तदानीं तस्य बाधितत्वात्। बहुत्वे सत्येव हि यौगपद्यसंभवः। [३]सहयोगे जाग्रति नेत्थंभावे तृतीया, इत्थंभावानुपपत्तिश्च [४]**ब्रह्मविद्याविजय** एवोक्ता।

---

[१] ङ - पृथग्जीवानाम्

[२] तैत्तिरीयोपनिषद्भाष्ये (पृ.९६) स्कान्दपुराणादुद्धृतमिति दृश्यते।

[३] ख, घ, ङ, च - सहप्रयोगे

[४] **ब्रह्मविद्याविजयः (दहरविद्यावेद्यत्वभङ्गे - पृ.९६)** एवं ब्रह्मगुणानामव्याप्यत्वस्फुटप्रतिपत्त्यर्थं प्राधान्यनिर्देशात् नास्य परशब्देन प्रथमप्रतीतगुणोपसर्जनकत्वबाधः। ब्रह्मविद् प्रयुक्तेन परशब्देन मन्दमतीनां ब्रह्मणो भेदबुद्धिर्मा भूदिति ब्रह्मणा इत्युक्तम्। काम्याः क इत्याकाङ्क्षायां षड्गुणाद्या इत्यभिप्रायेण ब्रह्मणेत्यस्यानन्वयात्। न चेत्थंभावे तृतीयेति मृषावाद्युक्तार्थः संभवति। तदानीं हि ब्रह्मवैशिष्ट्यं प्रति एतत् ब्रह्मभूयमश्नुत इति तदभिलषितार्थो न लभ्यत एव। तस्मात् ब्रह्मणा सहेत्यन्वयः। अस्तु वा पररीत्या सहशब्दो यौगपद्यार्थकस्सन् स्वपाद एवान्वितः, तथापि '**सहार्थयोगे तृतीया**' '**वृद्धो यूना तल्लक्षणश्च**' इतिवदेवं हि 'ब्रह्मविदाप्नोति परम्' इति वाक्यवेद्य-प्राप्ययोश्शब्दभेदेन प्रसक्तभेदनिवारणेन सप्रयोजनता भवति। परमाप्नोतीति प्राप्यत्वसिद्धये सर्वस्मादुत्कृष्टमिति प्रतिपादनाय विपश्चितेत्युक्तम्। अत्र ब्रह्मणा सहेत्यन्वयः। अन्यथा नत्वित्थंभावतृतीयायां किंचित् प्रयोजनमस्ति। न च परमाप्नोतीति प्राप्यप्राप्त्यभेदः प्रतीतेस्तन्निवारणेन पक्षान्तरेऽपि साफल्यं वाच्यमस्तीति। तथा सति ब्रह्मणेत्यस्य स्थाने परेणेति निर्शेदप्रसङ्गात्। ब्रह्मविद्ब्रह्मीभूय परं प्राप्नोतीत्युक्तेऽपि ब्रह्मविदोर्भेदशङ्का तादवस्थ्याद्वाक्यान्तरेण ब्रह्मणः परस्य चाभेदसिद्धेरुक्तशङ्का निरास इत्यपि न वाक्यान्तरादर्शनात्। नैरपेक्ष्येण शङ्कानिवारणप्रयोजने संभवति सापेक्षप्रयोजनकल्पनायोगात्। तथापि 'सर्वान् कामान् इति प्रतीतेस्तच्छङ्का तावदस्थ्याच्च। सहशब्दस्य यौगपद्याभिप्रायेण प्रयोगेऽपि कामानामेव परस्परयौगपद्यं प्रतीयेत। ततश्च ब्रह्मणः प्राप्यता प्रतीतिरेव न स्यात्। अतो वक्रमार्गपरिग्रहोप्यर्थोऽनिष्टफलकश्च स्यादेतत्। तल्लाभस्य तत्प्रसादाधीनत्वात् कर्तरि तृतीया इति न स्यात्, पदार्थविवरणार्थं प्रवृत्तत्वादस्य मन्त्रस्य।

१. उपोद्घातः

सर्वशब्दबहुवचनाभ्यामपि भेदस्सिध्यति। सर्वशब्दबहुवचनयोः अनन्वयादेव त्वदुक्तपरिहारासंभवः।

किञ्च कामानिति काम्यमानत्वं ह्यवगम्यते। काम्यमानत्वञ्च नानन्दाभिव्यक्तिमात्रस्य, घटज्ञानस्यापि स्वतः काम्यत्वप्रसङ्गात्। किन्तु प्राप्ताप्राप्तविवेकेन सुखरूपवृत्तेरेव वा तद्विशिष्टानन्दस्य वा काम्यमानता स्यात्, ततश्च मुक्तौ वृत्तिप्रसङ्गे संसारः तदवस्थः। सुखरूपवृत्तावानन्दाभिव्यक्तिर्भवति। घटाकारवृत्तौ चैतन्याभिव्यक्तिमात्रम्। अत आनन्दाभिव्यक्तेरेव काम्यमानताः। न चाद्वैतहानिः, स्वरूपभेदानङ्गीकारादित्यादिव्याहतभाषणानाम् व्याहतिरेवोत्तरम्।

सिद्धान्ते तु [१]'**सर्वान् कामान्**' इति भगवद्गुणा गृह्यन्ते, ब्रह्मणेति समभिव्याहारात्। समस्तवस्तुपरिग्रहेऽपि न दोषः, कृत्स्नस्यापि वस्तुजातस्य तदीयतया मुक्तभोग्यत्वात्। सर्वत्वश्रुतिरल्पत्वनिवृत्त्यर्थेत्यपि न, लक्षणाप्रसङ्गात्। किञ्च वैषयिकसुखे सुखरूपवृत्तेरपि काम्यमानत्वात् तस्येहालाभादल्पमेवेह प्राप्यते। किञ्च लोके यदल्पत्वकाष्ठाभूतम् सुखं तत्र यत्सुखस्वरूपमभिव्यज्यते, तदेवात्रेति प्रभूतवैषयिकसुखात् मोक्षसुखमत्यल्पमेव स्यात्। प्रभूतसुखाभिव्यक्तस्वरूपमपीहेति कथमल्पत्वमिहेति [२]चेत्, स्वरूपतारतम्यासंभवेनाल्पसुखात् प्रभूतसुखस्य काम्यत्वं सुखस्याल्पत्वेऽपि सुखरूपवृत्तेरुत्कर्षादेवेति तदभावान्मुक्तौ पुरुषार्थोऽल्पत्वकाष्ठैव स्यादिति।

एवञ्च स्वरूपानन्दस्यैव पुरुषार्थत्वं वदत आनन्दवल्लीद्रोहादन्यत् न किञ्चित् प्रयोजनं पश्यामः। तत्र हि [३]'**श्रोत्रियस्य चाकामहतस्य**' इति निरतिशयानन्दस्य मुक्तप्राप्यत्वमुच्यते। एवं भेदश्रुतिभिर्भेदः प्रतिपन्नः, घटकश्रुतयश्चान्तर्यामिब्राह्मणसौबालाद्याः। तत्र हि कृत्स्नस्यापि वस्तुनः स्वरूपस्थित्यादेर्भगवदधीनत्वमवगतम्। आसाञ्च घटकत्वं

नह्ययमुपयुक्तार्थप्रदर्शनार्थं प्रवृत्तः। पदत्रयेऽपि पदार्थविवरणं हि दृश्यते। ब्रह्मविदाप्नोतीति पदत्रयवत् परमित्यपि विवरणसापेक्षमेव। तस्मात् सहयोग एवेयं तृतीया। सर्वान्कामानित्यस्यैव परशब्दार्थस्य प्रपञ्चस्तस्माद्वा इत्यादिः।

[१] तै.उ.२.१

[२] ङ - चेन्न

[३] तै.उ.२.८. मानुषानन्दे पर्याये श्रोत्रियस्य चाकामहतस्येति वाक्यं शुद्धश्रुतौ नास्तीति तिरुनारायणपुरम् अरैयर् श्रीरामशर्मस्वामिनामभिप्रायः।

भेदाभेदश्रुत्योरविरोधेन तात्पर्यव्यञ्जनात्। आभिः खलु श्रुतिभिर्वैशिष्ट्यं प्रतिपादयन्तीभिः भेदश्रुतीनां स्वरूपभेदे तात्पर्यम्, अद्वैतश्रुतीनां विशिष्टाद्वैते तात्पर्यमित्यवगम्यते।

एवमाभिः श्रुतिभिरन्याभिश्च सजातीयविजातीयभेदः प्रतिपन्नः। स्वगतभेदश्च [१]‘**सत्यं ज्ञानमनन्तं ब्रह्म**’ [२]‘**विज्ञानमानन्दं ब्रह्म**’ [३]‘**अन्तः प्रविष्टश्शास्ता जनानाम्**’ [४]‘**यस्सर्वज्ञस्सर्ववित्**’ [५]‘**परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च**’ [६]‘**सत्यकाम सत्यसङ्कल्प**’ [७]इत्यादिभिः प्रतिपाद्यते।

मुक्तिदशायामपि भेदश्रवणात् भेदश्रुतयो व्यावहारिकभेदविषया इति निरस्तम्। घटकश्रुतयश्च [८]‘**यस्य पृथिवी शरीरम्**’ इत्याद्याः। एवं चिदचिदीश्वरभेदे भगवतः चिदचिद्वैशिष्ट्ये चावगते, अन्यस्यापि कस्यचित् तादृशत्वबुद्धिनिवृत्तये विशिष्टाद्वैतं प्रतिपादयन्त्यद्वैतश्रुतयः। तथा हि कठवल्ल्यां चतुर्थे खण्डे -

[९]‘**यदेवेह तदमुत्र यदमुत्र तदनु इह।**
मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति।।
मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन।
मृत्योस्स मृत्युं गच्छति य इह नानेव पश्यति’ इति।

---

[१] तै.उ.२.१

[२] जात एव न जायते को न्वेनं जनयेत् पुनः। **विज्ञानमानन्दं ब्रह्म** रातिर्दातुः परायणम्। तिष्ठमात्मनस्य तद्विद इति। (बृ.उ.५.९.२८)

[३] **अन्तः प्रविष्टश्शास्ता जनानाम्** सर्वात्मा सर्वाः प्रजा यत्रैकं भवन्ति। (तै.आरण्य.३.११.२)

[४] **यस्सर्वज्ञस्सर्वविद्यस्य** ज्ञानमयं तपः। तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते।। (मु.उ.१.१.१०)
यस्सर्वज्ञस्सर्वविद्यस्यैष महिमा भुवि। दिव्ये ब्रह्मपुरे ह्येष व्योम्न्यात्मा प्रतिष्ठितः।। (मु.उ.२.२.७)

[५] न तस्य कार्यं करणञ्च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते।
परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च।। (श्वे.उ.६.८)

[६] य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः **सत्यकामः सत्यसंकल्पः**, सोन्वेष्टव्यः स विजिज्ञासितव्यः। स सर्वांश्च लोकनाप्नोति सर्वांश्च कामान् यस्तमात्मानमनुविद्य विजानीतीति ह प्रजापतिरुवाच। (छा.उ.८.७.१)

[७] ङ - इत्येवमादिभिः

[८] यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद **यस्य पृथिवी शरीरम्**, यः पृथिवीमन्तरो यमयति, एष त आत्मान्तर्याम्यमृतः। (बृ.उ.३.७.७)

[९] कठ.१०-११

१. उपोद्घातः

अत्र खण्डादौ -

[1]'**पराञ्चि खानि व्यतृणत् स्वयंभूस्तस्मात्पराङ्पश्यति नान्तरात्मन्।**
कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्।।'

इति जीवात्मस्वरूपं प्रतिपाद्य तमेवार्थं

[2]'**पराचः कामाननुयन्ति बालास्ते मृत्योर्यन्ति विततस्य पाशम्।**
अथ धीरा अमृतत्वं विदित्वा ध्रुवमध्रुवेष्वथ न प्रार्थयन्ते।।'

इति विवृत्य, उत्तरग्रन्थेन ब्रह्मस्वरूपं प्रतिपाद्यते। प्रतीचो ज्ञानोपायः क इत्यत्राह -

[3]'**येन रूपं रसं गन्धं शब्दान् स्पर्शांश्च मैथुनान्।**
एतेनैव विजानाति किमत्र परिशिष्यते। एतद्वै तत्' इति।

एवं विभागः प्रत्यक्पदानुसारात् कृतः। स्वयमेव हि प्रत्यगात्मान्तरमपि स्वापेक्षया परागेव। कृत्स्नमपि भगवत्परमेव वा अन्तरात्मपदानुसारात्। प्रत्यक् शब्दस्तदन्तर्यामिपरः, येनैकेनैवानन्तो जीवलोकः, [4]रूपादीन् जानाति तदधीनो जानाति। अत्र रूपादिसकलदर्शनहेतुभूतेऽस्मिन् विद्यमाने किं परिशिष्यते, तत्प्रसादेन दुर्विज्ञेयमपि ज्ञास्यत एवेत्यर्थः। किं तादृशं वस्त्वित्यत्राह '**एतद्वै तत्**' इति रूपादिसकलदर्शनहेतुभूतं वस्तु [5]'**तद्विष्णोः परमं पदम्**' इति पूर्वोक्तमित्यर्थः। शंकरेणाप्येवमेव व्याख्यातम्।

[6]'**स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति।**
महान्तं विभुमात्मानं मत्वा धीरो न शोचति।।'

[7]'**य इदं मध्वदं वेद आत्मानं देवमञ्जसा।**
ईशानं भूतभव्यस्य न ततो विजुगुप्सते। एतद्वै तत्' इति।

स्वप्नान्तम् - स्वप्नमध्यगतं पदार्थम्, **जागरितान्तम्** - जागरितमध्यगतं पदार्थम्। एवं पूर्वोक्तं [8]रूपादिकम् एव द्वेधा विभज्य दर्शितम्, तं महान्तमित्यन्वयः। अनेन '**किमत्र**

---

[1] कठ.२.१.१

[2] कठ.उ.२.१.२

[3] कठ.२.१.३

[4] ङ, च - रूपादिकम्

[5] विज्ञानसारथिर्यस्तु मनः प्रग्रहावान्नरः।
सोऽध्वनः पारमाप्नोति **तद्विष्णोः परमं पदम्**।। (कठ.उ.१.३.९)

[6] कठ.२.१.४

[7] कठ.२.१.५

परिशिष्यत' इत्येतद्विवृतम् - **यो मध्वदम्** - कर्मफलभोक्ता जीवः, लिङ्गव्यत्ययः छान्दसः। **इदम्** - आत्मानम्, इदं शब्देऽपि लिङ्गव्यत्ययश्छान्दसः। यद्वा, **मध्वदम्** - निरतिशयानन्दतृप्तं, **य** - एवंविधं, **भूतभव्येशानं** -परमात्मानं, वेद स **ततो** - भूतभव्यात्, न विजुगुप्सते, भगवदात्मकतया सर्वं तस्योपादेयमेवेति भावः। '**एतद्वै तत्**' - पूर्ववदेव।

[२]'**यः पूर्वं तपसो जातमद्भ्यः पूर्वमजायत।**

गुहां प्रविश्य तिष्ठन्तं यद्भूतेभिर्व्यपश्यत। एतद्वै तत्' इति।

यः - परमात्मा, **पूर्वं** - सर्गाद्यकाले, **तपसः** - संकल्पात्, **जातं** - चतुर्मुखम्, **अद्भ्यः** - अबुपलक्षितभुवनेभ्यः, पूर्वमजीजनत्, करणकलेबरयोगेन हृदयगुहां प्रविश्य भूतैस्सह तिष्ठन्तं चतुर्मुखं अपश्यत। भगवानेव पूर्वं चतुर्मुखं सृष्ट्वा स्वानुग्रहलब्धशक्तिविशेषेण [३]भूतैः स्वकार्यभूतभुवनादिभिः सह तिष्ठन्तमपश्यदित्यर्थः। 'एतद्वै तत्' इति पूर्ववत्।

[४]'**या प्राणेन संभवत्यदितिर्देवतामयी।**

गुहां प्रविश्य तिष्ठन्ती या भूतेभिर्व्यजायत। एतद्वै तत्'

इति परदेवतारूपा, अदितिः दितिर्नाशः। '**दो अवखण्डन**' इति धातोः क्तिनि [५]'**द्यतिस्यति**' इत्यादिना इकारादेशः। **प्राणेन** - जीवेन, हृदयगुहां प्रविश्य तिष्ठन्ती, **संभवति** - तद्वारा स्थूलावस्थाभाग्भवति, **भूतेभिः** - भूतैश्च, स्थूलावस्थाभाग्भवतीति विशिष्टोपादानत्वमुक्तम्। '**एतद्वै तत्**' इति पूर्ववत्।

[६]'**अरण्योर्निहितो जातवेदा गर्भ इवेत् सुभृतो गर्भिणीभिः।**

दिवे दिव ईड्यो जाग्रवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः। एतद्वै तत्' इति। अनेन गुहां प्रविश्य स्थितौ दृष्टान्त उच्यते - अग्न्यन्तर्यामित्वं वा। गर्भिणीभिस्सुभृतो गर्भ इवारण्योर्निहितो **जातवेदः** - जातवेदशब्दवाच्योऽग्निः, **जाग्रवद्भिः** - अवहितैः, **हविष्मद्भिः** - प्रशस्तसोमादिहविर्युक्तैः, **मनुष्येभिः** - मनुष्यैः, दिवे दिवे - तत्तत् स्वर्गादिकमुद्दिश्य, ईड्यः। दिने दिने इत्यपरे। '**एतद्वै तत्**' पूर्ववत्।

---

[१] क, छ - स्वरूपादिकम्

[२] कठ.२.१.६

[३] छ - भूतेभिः

[४] कठ.उ.२.१.७

[५] द्यतिस्यतिमास्थामिति किति (पा.सू.७.४.४०)

[६] कठ.उ.२.१.८

१. उपोद्घातः

[1]‘**यतश्चोदेति सूर्योऽस्तं गच्छति यत्र च।**
तं देवाः सर्वेऽर्पिता तदु नात्येति कश्चन। एतद्वै तत्’

इति तद्वस्तु ब्रह्मरुद्रादिः कोऽपि नात्येति, तदर्पिततया [2]तन्नियाम्यत्वात्। ‘**एतद्वै तत्**’ पूर्ववत्।

[3]‘**यदेवेह तदमुत्र यदमुत्र तदन्विह।**
मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति।।
मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन।
मृत्योस्स मृत्युं गच्छति य इह नानेव पश्यति।।
अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति।
ईशानो भूतभव्यस्य न ततो विजुगुप्सते। एतद्वै तत्’ इति।

एवं सर्वप्रपञ्चाधिष्ठातृतया वर्तमानं वस्त्वेव, अमुत्र मुक्तप्राप्यञ्च। ‘यदमुत्र’ इति तात्पर्यातिरेकख्यापनाय। यस्त्वस्मात् प्राप्यस्य भेदं पश्यति स पुनः संसार्येव भवति। **मनसैव** - ज्ञानेनैव, इदं वस्त्वाप्तव्यम्, **इह** - प्रपञ्चे, **नानाभूतं** - तेन विनाभूतं, किमपि स्वतन्त्रं वस्तु नास्तीत्यर्थः। ‘यस्मिन् सूर्य उदेति, यत्र चास्तं गच्छति तं देवा अर्पिताः सर्वे तदु नात्येति कश्चन’ इत्यपृथक्सिद्धत्वावगमात्, अतो नान्यत्र कुत्रचित् तादृशत्वशङ्कावकाश इति भावः। यद्वा ‘**मनसैवेदमाप्तव्यम्**’ इति भगवत्प्राप्तिसाधनस्य प्रस्तुतत्वात्, मोक्षसाधने यो नानात्वं पश्यति कर्मणोऽन्यस्य वा साधनत्वं पश्यतीति भावः। ‘**एतद्वै तत्**’ पूर्ववत्। ‘एतदद्वै तत्’ इत्येतदभ्यासः देवतान्तरस्य परत्वशङ्कानिरासाय।

बृहदारण्यके - [4]‘**नेह नानास्ति किञ्चन**’ इति वाक्यमप्युक्तार्थकम्। तत्रैव [5]‘**यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठित**’ इत्यपृथक्सिद्धत्वावगमात्। ईशावास्ये

[1]‘**यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति।**

---

[1] यतश्चोदेति सूर्योऽस्तं यत्र च गच्छति। तं देवाः सर्वेऽर्पिता तदु नात्येति कश्चन। एतद्वै तत्। (कठ.उ.२.१.९)

[2] क, ख, घ, छ - तन्नियम्यत्वात्

[3] कठ.उ.२.१.१०-१२

[4] मनसैवानु द्रष्टव्यं **नेह नानास्ति किञ्चन**। मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति। (बृ.उ.६.४.१९)

[5] **यस्मिन् पञ्चपञ्चजना आकाशश्च प्रतिष्ठितः।**
तमेवमन्य आत्मानं विद्वान् ब्रह्मामृतोऽमृतम्।। (बृ.उ.६.४.१७)

सर्वभूतेषु चात्मानं ततो न विजुगुप्सते।।
यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः।
तत्र को मोहः कश्शोक एकत्वमनुपश्यत' इति।

यस्मिन् - यदा, **तत्र** - तदा, **एकत्वमनुपश्यतः** - सर्वव्यापके एकत्वं पश्यतः, सर्वव्यापकं वस्त्वन्तरं नास्तीति पश्यत इत्यर्थः। बृहदारण्यके चतुर्थेऽध्याये चतुर्थे ब्राह्मणे-[२]'**इदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमानि भूतानीदं सर्वं यदयमात्मा**' इति सर्वदेवातानां तद्विभूतित्वात् नान्यत्रैतत् तुल्यत्वशङ्कावकाश इति भावः। तत्रैव [३]'**यत्र हि द्वैतमिव भवति, तदितर इतरं जिघ्रति, तदितर इतरं पश्यति, तदितर इतरमभिवदति, तदितर इतरं शृणोति, तदितर इतरं मनुते, तदितर इतरं स्पृशति, तदितर इतरं विजानाति। यत्र वा अस्य सर्वमात्मैवाभूत् तत् केन कं जिघ्रेत् तत् केन कं पश्येत् तत्केन कमभिवदेत् तत्केन कं शृणुयात् तत्केन कं मन्वीत तत्केन कं विजानीयात्। येनेदं सर्वं विजानाति तं केन विजानीयात् विज्ञातारमरे केन विजानीयात्**' इति। **यत्र** - यदा, **द्वैतं भवति** - द्वैतबुद्धिर्भवति, स्वतन्त्रद्वैतबुद्धिर्भवति, **तत्** - तदा, **इतरः** - स्वतन्त्रः, **इतरेण** - स्वतन्त्रकरणेन, **इतरम्** - स्वतन्त्रम्, जिघ्रति। '**केन**' इत्युत्तरत्र वक्ष्यमाणत्वादत्र, '**इतरेण**' इत्यध्याहार्यम्। स्वतन्त्रोऽहं स्वतन्त्रकरणेन स्वतन्त्रं वस्तु जिघ्रामीति बुद्धिर्भवतीति तात्पर्यम्। एवमुत्तरत्रापि योज्यम्। **यत्र** - यदा, **अस्य** - ज्ञातुः, **सर्वमात्मैवाभूत्** - तत्परतन्त्रत्वेन ज्ञातमभूत्। इदं वाक्यमितरमिथ्यात्वपरमिति पक्षे, यदा द्वैतबुद्धिर्भवति तदा [४]इतरेण इतरं जिघ्रति, यदा सर्वमात्मैवेत्यद्वैतबुद्धिः

---

[१] ई.उ.६-७

[२] ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद। क्षत्रं तं परादाद्योऽन्यत्रात्मनः क्षत्रं वेद। लोकास्तं परादुर्योऽन्यत्रात्मनो लोकान् वेद। देवास्तं परादुर्योऽन्यत्रात्मनो देवान् वेद। भूतानि तं परादुर्योऽन्यत्रात्मनो भूतानि वेद। सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद। **इदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमानि भूतानीदं सर्वं यदयमात्मा**। (बृ.उ.४.४.६; बृ.उ.६.४.७)

[३] यत्र हि द्वैतमिव भवति, तदितर इतरं जिघ्रति, तदितर इतरं पश्यति, तदितर इतरं शृणोति, तदितर इतरमभिवदति, तदितर इतरं मनुते, तदितर इतरं विजानाति। यत्र वा अस्य सर्वमात्मैवाभूत् तत्केन कं जिघ्रेत् तत्केन कं पश्येत् तत्केन श्रुणुयात् तत्केन कमभिवदेत् तत्केन कं मन्वीत तत्केन कं विजानीयात् येनेदं सर्वं विजानाति तं केन विजानीयात् विज्ञातारमरे केन विजानीयादिति। (बृ.उ.४.४.१४)

[४] क, ख, घ, ङ, छ - इतर

भवति तदा सर्वस्य निवृत्तेः, **केन कं जिघ्रेत्** करणाभावात् ज्ञेयाभावाच्चेति नार्थः, सर्वमात्मैवाभूदित्यस्याभेदपरत्वेऽचिदंशे बाधात्, बाधार्थपरत्वे चिदंशे बाधात्।

यदा द्वैतबुद्धिर्भवति तदा इतरोऽहमितरेणेतरं जिघ्रामीति बुद्धिर्भवति, यदा त्वद्वैतबुद्धिर्भवति तदा इतरोऽहमितरेणेतरं जिघ्रामीति बुद्धिर्न भवतीत्यपि नार्थः। यत्र तु '**अस्य सर्वम्**' इति तद्दोषतादवस्थ्याद्द्वैतज्ञानिनोऽपि मिथ्यात्वेन ब्रह्मणोऽन्यमेव गन्धं तथा भूतेनैव घ्राणेन जिघ्रामीति ज्ञानाच्च। यत्र तु '**अस्य सर्वमात्मैवाभूत्**' इत्युक्तसार्वात्म्य-बुद्धिः केन भवतीत्यत्राह - '**येनेदम्**' इति, तदन्येन केन विजानीयादिति भावः। '**पश्यति**' इत्यादिना प्रकृतस्य ज्ञानमपि तेनैवेत्याह - '**विज्ञातारम्**' इति, भगवत्प्रसादादृते केन विजानीयादित्यर्थः। तत्र [१]'**यथा सैन्धवखिल्य**' इति मोक्षे भगवत्साम्यप्रतिपादनादिदं वाक्यं यथोक्तार्थम्।

अत्रैव पञ्चमेऽध्याये सप्तमे ब्राह्मणे - [२]'**अदृष्टो द्रष्टा**, **अश्रुतश्श्रोता**, **अमतो मन्ता**, **अविज्ञातो विज्ञाता**, **नान्योऽतोऽस्ति द्रष्टा**, **नान्योऽतोऽस्ति श्रोता**, **नान्योऽतोऽस्ति मन्ता**, **नान्योऽतोऽस्ति विज्ञाता**' इत्यत्र अदृष्टो द्रष्टा इतोऽन्यो नास्तीत्येवं योज्यम्। अनेनान्यस्य परत्वनिषेधसिद्धेश्चिदचिद्वैशिष्ट्यमपि नान्यस्येति [३]फलितम्।

नारायणोपनिषदि द्वितीये खण्डे - [४]'**ब्रह्मा नारायणः शिवश्च नारायणश्शक्रश्च नारायणः कालश्च नारायणो दिशश्च नारायण ऊर्ध्वञ्च नारायणोऽधश्च नारायणोऽन्तर्बहिश्च नारायणः। नारायण एवेदँ सर्वं यद्भूतं यच्च भव्यम्। निष्कळो निरञ्जनो निर्विकल्पो निराख्यातश्शुद्धो देव एको नारायणो न द्वितीयोऽस्ति कश्चित्**' इति। **न द्वितीयः** - एतादृशो द्वितीयो नास्तीत्यर्थः। तत्रैव -

---

[१] **स यथा सैन्धवखिल्य** उदके प्रास्त उदकमेवानुविलीयेत, न हास्योद्ग्रहणायैव स्यात्, यतो यतस्त्वाददीत लवणमेवैवं वा इदं महद्भूतमनन्तमपारं विज्ञानघन एव एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति, न प्रेत्य संज्ञाऽस्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः।। (बृ.उ.४.४.१२)

[२] यो रेतसि तिष्ठन् रेतसोऽन्तरो यँ रेतो न वेद , यस्य रेतश्शरीरं यो रेतोऽन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः। **अदृष्टो द्रष्टा अश्रुतश्श्रोता अमतो मन्ता अविज्ञातो विज्ञाता नान्योऽतोऽस्ति द्रष्टा, नान्योऽतोऽस्ति श्रोता, नान्योऽतोऽस्ति मन्ता, नान्योऽतोऽस्ति विज्ञाता।** (बृ.उ.५.७.२७)

[३] ङ - द्योतितम्

[४] ना.अ.शि.उ.२

‘**ब्रह्मा नारायणः शिवश्च नारायणः शक्रश्च नारायणो दिशश्च नारायणो विदिशश्च नारायणो अधश्च नारायण ऊर्ध्वं च नारायणो मूर्तामूर्ते च नारायण अतश्चेतश्च नारायणस्सर्वे ऋषयो नारायणः। नारायण एवेदँ सर्वं यद्भूतं यच्च भव्यम्। अथ नित्यो निष्कळो निरञ्जनो [१]निराख्यो निर्विकल्पो निरञ्जनश्शुद्धो देव एको नारायणो, न द्वितीयोऽस्ति कश्चित्**’ इति। न द्वितीय इति पूर्ववत्।

उत्तरतापनीयेऽष्टमे - [२]‘**अद्वयो ह्ययमात्मैकल एव**’ इत्यादि, **अद्वयः** - स्वतुल्य-द्वितीयरहितः। नवमे - [३]‘**न ह्यस्ति द्वैतसिद्धिरात्मैव सिद्धोऽद्वितीय**’ इत्यद्वितीयशब्दश्च सदृशद्वितीयराहित्य एव स्वरसः तत्रैव भूरिप्रयोगात्। ‘न द्वितीय’ निषेधमात्रे, तद्विवक्षायां हि द्वितीयं नेत्येवोच्येत, न त्वद्वितीय इति, अन्योपसर्जनतया प्रतिपादने प्रयोजनाभावात्। तस्मात् निस्समत्वप्रतिपादनार्थमेवाद्वितीयपदप्रयोगः। एवमद्वैतश्रुतयो विशिष्टाद्वैतं प्रतिपादयन्ति।

---

[१] घ, ङ - निराख्यातः

[२] अथ तुरीयेणोतश्च प्रोतश्च ह्ययमात्मा नृसिंहोऽस्मिन् हि सर्वमयं हि सर्वात्मायं हि सर्वं नैवातः **अद्वयो ह्ययमात्मैकल एव** अविकल्पो न हि वस्तु सदयं होत इव सद्धनोऽयं चिद्धन आनन्दघन एवैकरसोऽव्यवहार्यः केनचनाद्वितीय ओतश्च प्रोतश्चैष ओंकार एवं नैवमिति पृष्ठ ओमित्येवाह वाग्वा ओंकारो वागेवेदं सर्वं न ह्यशब्दमिवेहास्ति चिन्मयो ह्ययमोङ्कारश्चिन्मयमिदं सर्वं तस्मात् परमेश्वर एवैकमेव तद्भवत्येतदमृतमयमेतत् ब्रह्माभयं वै ब्रह्म भवति य एवं वेद। (नृ.उ.ता.८)

[३] देवो ह वै प्रजापतिमब्रुवन्निममेव नो भगवन्नोङ्कारमात्मानमुपदिशेति तथेत्युपद्रष्टानुमन्तैष आत्मा नृसिंहश्चिद्रूप एवाविकारो ह्युपलब्धं सर्वस्य सर्वत्र **न ह्यस्ति द्वैतसिद्धिरात्मैव सिद्धोऽद्वितीयो** मायया ह्यन्यदिव स वा एष आत्मा पर एषैव सर्वम्। (नृ.उ.ता.९)

२. प्रपञ्चमिथ्यात्वभङ्गः

तमिममौपनिषदं राद्धान्तमसहमाना मिथ्यावादिनः शुद्धाद्वैतमाचक्षते। तथाहि प्रपञ्चो मिथ्या दृश्यत्वाज्जडत्वात् परिच्छिन्नत्वाद्व्यावर्तमानत्वात् शुक्तिरूप्यवत्[१] न चाप्रयोजकत्वम्, दृग्दृश्ययोस्संबन्धानुपपत्याध्यासिकसंबन्धस्य वाच्यत्वात्, ज्ञाननिवर्त्यत्वान्यथानुपपत्तिरपि मानम्। न च जीवस्य ब्रह्मणोऽन्यत्वात् कथमद्वैतसिद्धिरिति वाच्यम्। जीवात्मा परमात्माभिन्नः, आत्मत्वात् परमात्मवत्। न चाप्रयोजकत्वं, भेदस्य दुर्निरूपत्वादिति आहुः, तथोपनिषदमपि स्वोत्प्रेक्षितार्थे पातयन्त इवाहुः - [२]'**सत्यज्ञानादि**' वाक्यमखण्डार्थम्, लक्षणवाक्यत्वात् 'प्रकृष्टप्रकाशश्चन्द्र' इति वाक्यवत्। एवं [३]'**तत्त्वमसि**' इत्यप्यखण्डार्थम्, समानाधिकरणवाक्यत्वात् 'सोऽयं देवदत्त' इति वाक्यवत्। समानमेकमधिकरणमर्थो अस्येति हि [४]सामानाधिकरण्यं उच्यते। अतः [५]'**सत्यं ज्ञानम्**' [६]'**तत्त्वमसि**' [७]'**अयमात्मा ब्रह्म**' इत्यादौ स्वरूपस्यैव लक्षणा। अतः सत्यादिवाक्येन स्वगतभेदो न तत्र प्रतिपाद्यत इति ।

अत्रोच्यते - मिथ्यात्वं हि स्वाभावाधिकरणे प्रतीयमानत्वं प्रपञ्चस्य देवतान्तरनिष्ठत्वस्य कैश्चिदभ्युपगमात् सिद्धसाधनम्। नन्वन्यथाख्यातेरसंभवात् भ्रमानुरोधात् स्वात्यन्ताभावसामानाधिकरण्यमेव मिथ्यात्वं वाच्यम्, अन्यथाख्यातिश्च विषयेन्द्रिय-

---

[१] ख - रौप्यवत्

[२] ब्रह्मविदाप्नोति परम्। तदेषाभ्युक्ता। **सत्यं ज्ञानमनन्तं ब्रह्म**। यो वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वान् कामान् सह। ब्रह्मणा विपश्चितेति। तस्माद्वा एतस्मादात्मनः आकाशः संभूतः। (तै.उ.२.१)

[३] छा.उ.६.१६.३

[४] क, ख, घ, ङ, छ - समानाधिकरणम्

[५] तै.उ.२.१

[६] स यथा तत्र नादाह्येतैतदात्म्यमिदं सर्वं स आत्मा **तत्त्वमसि** श्वेतकेतो इति तद्धाह्य विजज्ञाविति विजज्ञाविति। (छा.उ.६.१६.३)

[७] स वा **अयमात्मा ब्रह्म** विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः पृथिवीमय आपोमय वायुमय आकाशमयस्तेजोमयोऽतेजोमयः काममयोऽकाममयः क्रोधमयोऽक्रोधमयो धर्ममयोऽधर्मयः सर्वमयस्तद्यदे तदिंमयोऽदोमय इति यथाकारी यथाचारी तथा भवति साधुकारी। (बृ.उ.२.४.५)

संनिकर्षाभावादनुपपन्ना। न हि शुक्ताविदं रजतमिति ज्ञानदशायां रजतत्वमिन्द्रिय-सन्निकृष्टम्। तस्मादनिर्वचनीयमेव रजतं [१]तत्रोत्पद्यत इति चेन्न, तत्र सामग्र्यन्तरस्यैव कल्पनीयत्वात्। यथा चक्षुषा घटाभावं पश्यामीत्यनुभवे सत्यपि त्वया क्लृप्त-प्रत्यक्षकारणाभावादभावाख्यं प्रमाणान्तरमङ्गीक्रियते, इन्द्रियान्वयव्यतिरेकयोः चाधिकरणग्रहणोपक्षयः पश्यामीति प्रतीतिश्च तावन्मात्रादिति कल्प्यते, तथेहापि दोषस्यान्यस्य वा कारणान्तरस्य कल्पनीयत्वात्। यदि रजतं पश्यामीत्यनुभवानुसारेण तज्ज्ञानस्य प्रत्यक्षान्तर्भाव इष्यते तदा अभावोपलब्धौ[२] प्रत्यक्षबहिर्भावाङ्गीकारः तव विरुध्येत। घटाभावं पश्यामीत्यनुभवस्य तत्रापि सत्त्वात्।

वस्तुतस्तु नात्र प्रत्यक्षसामग्रीविरहः, विशेष्यसंनिकर्षस्यैव विशिष्टप्रत्यक्षहेतुत्वात्। न च विशेषणसंनिकर्षस्याकारणत्वे उष्णीषाच्छन्नकुण्डले कुण्डलीति बुद्ध्यापत्तिः। तवापि तत्र कुण्डलसंयोगमादाय [३]संयोगीति प्रत्यक्षापत्तेः। न च संयोगप्रत्यक्षे प्रतियोगिद्वय-प्रत्यक्षस्य तत्संनिकर्षस्य वा हेतुत्वात् तदभावात्तदभाव इति वाच्यम्, ममापि तुल्यत्वात्। कुण्डलीति प्रत्यक्षस्य संसर्गविधया संयोगप्रत्यक्षत्वात् तद्विशेषणकतत्संसर्गक [४]तद्विशेष्यकत्वौदासीन्येन इन्द्रियसंयोगावच्छेदेन[५] समवायस्य हेतुत्वाच्च। किञ्च कुण्डलीति प्रत्यक्षे, कुण्डलस्य कुण्डलत्वं प्रति विशेष्यतया तत्संनिकर्षाभावात् कथमिदमापादनम्? न च कुण्डलत्वाप्रकारककुण्डलप्रकारककुण्डली प्रत्यक्षापत्तिः, इन्द्रियसंयोगस्य [६]द्रव्यप्रत्यक्षे कारणत्वात्।

ननु संयुक्तसमवायाभावात् कथं [७]द्रव्यजातिप्रत्यक्षमिति चेन्न, गुणकर्मादि ग्रहाव्यापकत्वात्[८]। संयुक्तसमवायं प्रति न [९]द्रव्यजातिप्रत्यक्षत्वं कार्यतावच्छेदकम्, नापि द्रव्यसमवेतप्रत्यक्षत्वं शब्दग्रहणानुपपत्तेः। अतः संयुक्तसमवेतप्रत्यक्षत्वं संयुक्तसमवाय-

---

[१] ग - प्रतीयते

[२] ग - कोशे अधिकः पाठः - सन्निकर्षस्य कारणत्वे

[३] घ, ङ - कुण्डलीसंयोगीति

[४] क, ग, च, छ - तद्विशेष्यकौदासीन्येन

[५] घ, ङ - संयोगप्रदेशावच्छेदेन; ग - संयोगावच्छिन्न

[६] ग, च - द्रव्यप्रत्यक्षत्वेन

[७] क - द्रव्यत्वजाति

[८] ग - ग्रहादिव्यापकत्वात्; ङ - ग्रहव्यापकत्वात्

[९] क - द्रव्यत्वजाति

जन्यतावच्छेदकम्, तथा च भ्रमस्थले रजतत्वस्य संयुक्तसमवेतत्वाभावात् न तत्प्रत्यक्षासंभवः।

नन्वतीतश्यामतादिविशिष्टप्रत्यक्षप्रसङ्ग इति चेन्न, संयुक्तसमवायो हि स्वप्रतियोगिप्रत्यक्षे कारणम्, श्यामरूपाभावदशायां न तादृशस्समवायः। ननु जन्यप्रत्यक्षमात्रे विषयसंनिकर्ष एव कारणम्, लाघवात्। एवञ्च तत्तत्प्रत्यक्षे तत्तत्संनिकर्षस्य कारणत्वात् विशेषणसंनिकर्षाभावे कथं तत्प्रत्यक्षमिति चेन्न, प्रत्यभिज्ञाप्रत्यक्षे व्यभिचारात्। यदि च तत्र संस्कारसहकारात् स्मृतिसहकाराद्वा तयोस्संनिकर्षत्वकल्पनया वा विशिष्ट-प्रत्ययः तदेहापि तथास्तु। किञ्च शाब्दब्रह्मापरोक्षवृत्तौ व्यभिचारः [1]शब्दाजन्यत्वेन अपरोक्षविशेषणे तद्विशेष्यकत्वापेक्षया कुतो लाघवम्। अस्तु वा विशेषणसंनिकर्षः कारणम्, स तु प्रमायामेव, न तु भ्रम इति कल्प्यताम्।

ननु लाघवात् जन्यप्रत्यक्षत्वं कार्यतावच्छेदक्म्, न तु प्रमात्वपर्यन्तं गौरवादिति चेन्न, भ्रमे व्यभिचारोपस्थित्या लोके सामान्येन कारणत्वग्रहासंभवात्।

न च भ्रमः साक्षिरूपत्वान्न जन्य इति वाच्यम्। लोके [2]प्रमाया इव भ्रमस्याप्युत्पत्तिप्रतीतेः सामान्यकारणत्वग्रहरूपपरिपन्थिव्यभिचारोपस्थितेरावश्यकत्वात्। न च परीक्षकाणां साक्षिरूपभ्रमे, उत्पत्तिप्रतीतेरर्थोत्पत्त्युपाधिकत्वग्रहात् व्यभिचारज्ञानाभावात् सामान्येन कारणत्वग्रह इति वाच्यम्, तथा सति चक्रकप्रसङ्गात्। जन्यप्रत्यक्षत्वावच्छेदेन कारणत्वे निर्णीते भ्रमस्थले कारणबाधेनान्यथाख्यात्यसंभवेऽनिर्वचनीयोत्पत्तिसिद्धौ तद्भ्रमरूपसाक्षिण्युत्पत्तिप्रतीतेरर्थोत्पत्त्युपाधिकत्वे सिद्धे जन्यप्रत्यक्षत्वाभावात् व्यभिचार-ग्रहनिवृत्तौ तदवच्छेदेन कारणत्वग्रह इति।

अपि च रजतसर्पाद्यनन्तकार्यानन्त तत्तत्कारणनिरूपित तत्तत्कार्यतावच्छेदकतया क्लृप्तेषु रजतत्वसर्पत्वाद्यनन्तधर्मेषु प्रातिभासिकातिरिक्तत्वं विशेषणं दातव्यम्। क्लृप्त-कारणाभावेऽपि तदुत्पत्तेः। अत एकस्मिन् सन्निकर्षजन्यतावच्छेदके प्रमात्वविशेषणमेव [3]लघु। यदि च रजतत्वादिकं व्यावहारिकेष्वन्यदेव, तदेव च तत्तत्कार्यतावच्छेदकम्। न

[1] ख - शाब्दजन्यत्वेन

[2] ङ - जन्यप्रमायाः

[3] ङ - लाघवम्; च - लघुतमम्

च तत्र विशेषणं देयमित्युच्येत, तदाप्यपूर्वमिदं कार्यं कार्यतावच्छेदकं कारणतावच्छेदकं चाङ्गीकार्यमेव इति गौरवान्न मुक्तिः।

किञ्च घटज्ञानवदेव रजतज्ञानमुत्पन्नं रजतज्ञानं नष्टमिति प्रतीतेरर्थविषयत्वं कथं कल्प्यते? सविशेषणे हीति न्यायादिति चेन्न, तन्न्यायस्यात्रानवतारात्। शब्दविषय एव हि स न्यायः, शब्दस्य व्याख्येयत्वात्, प्रतीतिस्तु न व्याख्येया। अपि च 'स्वर्गी ध्वस्त' इत्यत्र हि विशेष्यान्वयबाधो दृश्यते विशेषणसंबन्धध्वंसश्च। न चात्र ज्ञानोत्पत्तिनिवृत्योर्बाधो दृश्यते, नाप्यर्थोत्पत्तिनिवृत्तिः। तस्मात् ज्ञानोत्पत्तेरावश्यकत्वात् प्रमाविशेषणं दातव्यमेवेति।

किञ्चाविद्यावृत्तिपक्षे सा जन्यैवेति तस्यास्संनिकर्षजन्यत्वाभावात् प्रमाविशेषणं दातव्यमेव। इदमाकारवृत्त्यवच्छिन्नचैतन्यमेव [१]रजतावभास इति पक्षेऽपि तद्वृत्तेर्जन्यत्वात् रजतसंनिकर्षजन्यत्वाभावाच्च विशेषणं देयमेव।

ननु तद्विषयकज्ञानं हि तत्संनिकर्षजन्यम्। न चेदमाकारवृत्ती रजतविषयेति चेदुच्यते - घटं जानामीति तावत् ज्ञाने अर्थविषयता प्रतीतिसिद्धा। सा किं चैतन्यगता उत वृत्तिगता। नाद्यः, वृत्तेस्सविषयत्वे मानाभावेन निर्विषयत्वप्रसङ्गात्। अथ स्यात् चैतन्यविषयता हि चैतन्याभेदः। स च न भासते, [२]घटो ज्ञानमित्यननुभवात्। किन्तु वृत्तिगतमेव सविषयत्वम् भासत इति, तन्न। वृत्तेर्हि तद्विषयता, [३]तदभिन्न-चैतन्यावच्छेदकत्वमेव। तच्चेदं वृत्तेरप्यस्त्येव, रजतावभासकचैतन्यावच्छेदकत्वात्।

नन्वन्यदेव वृत्तौ [४]सविषयत्वम् इति चेन्न, [५]सुखं जानामि, ज्ञानं जानामि, रजतं जानामीति प्रतीत्यभावप्रसङ्गात्। तस्मात् तदवभासकचैतन्यावच्छेदकत्वमेव वृत्तौ [६]सविषयत्वं इति वाच्यम्। तथा चेदमाकारवृत्तेरपि रजतविषयत्वात् तत्संनिकर्षाभावे

---

[१] ङ - रजतत्वावभासः
[२] ख - घटम्
[३] घ, ङ - तदवभासक
[४] ग - सविषयम्
[५] ग - कोशेऽधिकः पाठः - 'तथा चेदमाकारवृत्तेरपि'
[६] ख - सविषयकत्वम्

तज्ज्ञानासंभवात् प्रमाविशेषणं तस्मिन्नपि पक्षे दातव्यमेव। अस्तु वा विशेषणसंनिकर्षोऽपि जन्यप्रत्यक्षमात्रे कारणम्, [१]तदापि न दोषः, ज्ञानप्रत्यासत्तेर्विशेषणे सत्वात्।

ननु ज्ञानस्य प्रत्यासत्तित्वे काशीस्थं पदार्थं वाक्याज्जानतः तम् पदार्थं जानामीत्यनुभवतोऽपरोक्षतो जानामीत्यनुभवप्रसङ्ग इति चेन्न, काशीस्थपदार्थगोचर-वाक्यजन्यज्ञानस्यैव स्वयंप्रकाशस्य काशीस्थं पदार्थं जानामीति [२]ज्ञानरूपतया ज्ञान-प्रत्यासत्तिजन्यत्वाभावात्, अनुव्यवसायाङ्गीकारेऽपि कवीनामौत्प्रेक्षिकज्ञानसिद्धये संशयाद्यर्थञ्च ज्ञानप्रत्यासत्तेः स्वीकार्यतया तदनुरोधाद्दोषविशेषासहकृतज्ञानप्रत्यासत्तिजन्य-प्रत्यक्षेषु [३]शिलादौ पृथिवीत्ववदभिव्यञ्जकाभावात् प्रत्यक्षत्वं नोपलभ्यत इति कल्प्यताम्।

न च संशयादेर्ज्ञानाभासत्वम्, तवैव पुरुषाभासत्वात् ज्ञानत्वेनानुभवात्। अत एव हि त्वयापि ज्ञानाभासत्वमुच्यते, न तु घटाभासत्वम्। न च ज्ञाने क्लृप्तकारणाभावाद-ज्ञानत्वम्, कार्यानुसारेण कारणस्य कल्पनीयत्वात्। अन्यथा चक्षुर्जन्यत्वाभावेन स्पर्श-ज्ञानस्य ज्ञानत्वापरोक्षत्वयोरभावप्रसङ्गात्। अभावज्ञानस्यापि आभासत्वप्रसङ्गेन प्रमाणान्तरकल्पनानुपपत्तेश्च। अयं दोषस्तवैव दुष्परिहरः। सर्वेषामपि परोक्षार्थानां सदभिन्नतया प्रतीयमानत्वेन सत एवापरोक्षत्वेन सन् घट इति प्रतीतिवदपरोक्षो घट इति प्रतीतेरावश्यकत्वात्। प्रमातृभेदाभावात् ममापरोक्ष इति प्रतीत्यभावेऽपि सत्प्रतीतिवद-परोक्षप्रतीतिः स्यात्।

ननु ज्ञानस्य प्रत्यासत्तित्वे पर्वतेवह्निसाक्षात्कारप्रसङ्ग इति चेन्न, प्रत्यक्षसामग्रीतो अनुमति सामग्र्याः [४]प्रबलत्वात्। न चैवं संशयोत्तरप्रत्यक्षानुपपत्तिः, समाने विषये प्रत्यक्ष-सामग्र्याः [५]बलवत्त्वात्। न चैवं पर्वते वह्निप्रत्यक्षप्रसङ्गः, उपनयसामग्रीतोऽनुमिति सामग्र्याः बलवत्वात्। न चैवं संशयोत्तरप्रत्यक्षभ्रमाभावप्रसङ्गः[६] दोषाघटितोपनीतप्रत्यक्ष-सामग्रीतोऽनुमितिसामग्र्याः बलवत्वात्।

---

[१] ग, घ, ङ - तथापि
[२] ङ - अनुभवरूपतया
[३] ङ - शिलातलादौ
[४] च - प्रबलवत्वात्
[५] ग, ङ - प्रबलत्वात्
[६] ग - प्रमाभावप्रसङ्गः

न चैवं पर्वते वह्निभ्रमाऽनुमित्यनुपपत्तिः, ज्ञानप्रत्यासत्तेः ज्ञाप्याभाववति व्याप्य-परामर्शरूपदोषसाहित्यात्[१] इति वाच्यम्, दोषघटिताद्रव्योपनीतप्रत्यक्षसमाग्र्या एव बलवत्त्वकल्पनात्।

नन्वेवं यत्र सौरभ्यव्याप्यचन्दनत्वभ्रमस्तत्र सौरभ्यविशिष्टोपनीतप्रत्यक्षापत्तिः। न चेष्टापत्तिः, यत्र प्रत्यक्षत्वं नानुभवसिद्धं तत्र प्रत्यक्षत्वस्य मानान्तरासंभवनिबन्धनतया मानान्तरसंभवे तज्जन्यत्वस्यैव वाच्यत्वादिति चेन्न, अत्राद्रव्यपदेन जातेरेव विवक्षितत्वात्।

नन्वेवमपि यत्र दूरस्थरूपे श्यामत्वनीलत्वसंदेहानन्तरं [२]श्यामत्वव्याप्यतमाल-समवायभ्रमात् श्यामतानुमितिः तत्रोपनीतश्यामत्वविशिष्टप्रत्यक्षतापत्तिः। न चेष्टापत्तिः, प्रत्यक्षत्वानुभवाभावात् प्रमाणान्तरसन्निधानाच्चेति चेन्न, अद्रव्यपदेन द्रव्यजातेः विवक्षितत्वात्।

नन्वेवमपि यत्राङ्गुल्यग्रस्पृष्टे घटमणिकसंदेहे घटत्वव्याप्यभ्रमात् घटत्वानुमितिः, तत्रोपनीतघटत्वविशिष्टप्रत्यक्षापत्तिरिति चेन्न, चाक्षुषत्वेन प्रत्यक्षविशेषणात्। नन्वेवमपि यत्र पर्वताग्रवर्तिनि घटे पाषाणघटसंदेहानन्तरं पाषाणत्वव्याप्यपर्वताग्रसंबन्धभ्रमात् पाषाणत्वानुमितिः, तत्रोपनीतपाषाणत्वविशिष्टप्रत्यक्षापत्तिः।

न चेष्टापत्तिः, प्रत्यक्षत्वाननुभवात्, प्रत्युतानुमितित्वस्यैवानुभवादिति चेन्न। तत्र यदि प्रत्यक्षत्वं नानुभूयते किंत्वनुमितित्वमेव तदा प्रतीत्यनुरोधेन व्यावृत्तावयवरूपविशेष-भ्रम एव द्रव्यजातिप्रत्यक्षे दोषः, न तु व्याप्यभ्रममात्रमिति कल्प्यताम्। यद्वा वर्तमान-कालीनत्वेन विशेषणानवगाहिविशिष्टप्रत्यक्षसामग्रीतोऽनुमितिसामग्री बलवती। अतोऽसन्निकृष्टस्य वह्नेर्वर्तमानकालावच्छेदेन प्रत्यक्षासंभवात् पर्वते वह्न्यनुमितिसामग्री बलवती।

ननु वर्तमानकालावच्छेदेनैव वह्नेः प्रत्यक्षं पर्वते स्यात्। प्रत्यक्षसामग्र्याः सत्त्वादिति चेन्न, वर्तमानकालोपस्थितिमात्रं न तत्कालीनप्रत्यक्षे सहकारित्वञ्चागृह्यमाण-घटादौ श्यामिकोपनये [३]कालोपनयेऽपि तज्जन्यप्रत्यक्षेण वर्तमानत्वाग्रहात्। अतो यस्मिन्

---

[१] ग - सहकृत्वात्

[२] घ, ङ - श्यामत्वव्याप्यतमालरूपत्व; च - श्यामत्वव्याप्यतमालत्व

[३] ग, ङ - 'वर्तमान' इति अधिकः पाठः

काले यत्र यत्सत्तापादनमात्रेण तद्विशेष्यकप्रत्यक्षापादनसंभवः स काल स्वावच्छेदेन तत्र तद्विशेषणावगाहने हेतुः, न चानुमितिकालस्तादृशः।

ननु तथापि कालघटितव्याप्तिग्रहेण यत्रेदानीं वह्निमानित्यनुमितिस्तत्र वह्निप्रत्यक्षापत्तिः इति चेन्न, तादृशकालप्रयुक्तवर्तमानकालावच्छिन्नविशेषणावगाहिताक-प्रत्यक्षान्यप्रत्यक्षसामग्रीतो बलवत्त्वस्य विवक्षिततत्वात्। यद्वा साक्षात्कारत्वसंदेहयोग्य-प्रत्यक्षसामग्रीतोऽनुतिसामग्री बलवती। उपनयाद्यपेक्षसाक्षात्कारश्च तत्संन्देहयोग्यः। [१]असाक्षात्कारत्वबुद्धियोग्यप्रत्यक्षसामग्रीतः [२]अचाक्षुषत्वादिबुद्धियोग्यप्रत्यक्षसामग्रीतो योग्यसन्निकृष्टग्रहप्रतिबन्धकदोषाघटितोपनीतप्रत्यक्षसामग्रीतो वानुमिति सामग्री बलवती।

वस्तुतस्तु यत्र प्रत्यक्षानुमितिसामग्रीद्वयसमावेशे साक्षात्करोमीत्यनुभवस्तत्र प्रत्यक्ष-सामग्र्या अनुमितिसामग्रीप्रतिबन्धकत्वम्। यत्र तत्समावेशेऽनुमितित्वानुभवः तत्रानुमिति-सामग्र्याः प्रत्यक्षप्रतिबन्धकत्वञ्च कल्प्यते फलबलेन प्रतिबन्धकाननुगमस्य अदोषत्वात्[३]।

यत्तु प्रत्यक्षमात्रप्रयोजकदोषाघटितोपनीतप्रत्यक्षसामग्र्यपेक्षयानुमितिसामग्री प्रबला। संशयोत्तरप्रत्यक्षभ्रमे च सादृश्यस्य वा तत्प्रत्यक्षस्य वा प्रत्यक्षासाधारणदोषस्य सत्त्वात् पर्वते तदभावाद्व्याप्यभ्रमरूपविशेषदर्शनस्यानुमितिसाधारणत्वात् सादृश्य तत्प्रत्यक्षयोः कथञ्चिदत्रापि संभवेऽपि तस्य वह्निभ्रमं प्रति दोषत्वे मानाभावादिति, तन्न। सौरभ्य-व्याप्यदर्शनाभावदशायां चन्दनत्वभ्रमात् सौरभ्यप्रत्यक्षभ्रमो जायत इत्यवच्छेदकभ्रमो [४]दोष इति सिद्धम्। तथा च व्याप्यदर्शनदशायामप्यनुमितिर्न स्यात्। अवच्छेदकदर्शनरूप-प्रत्यक्षमात्रप्रयोजकदोषसत्त्वात्, न चेष्टापत्तिः, प्रमास्थलेऽवच्छेदकदर्शनकालीनेन[५] अपि व्याप्यदर्शनेनानुमितेः स्वीकर्तव्यत्वात्। त्वदुक्तप्राबल्यप्रयोजकस्य तत्रापि सत्त्वात् स्वकल्पितप्रयोजकमात्रानुसारेण प्रमास्थलेऽनुमितिरेव भ्रमस्थले प्रत्यक्षमेवेति वैषम्य-कल्पनस्यानुचितत्वात्।

यच्च संशयानुत्तरप्रत्यक्षसामग्रीतोऽनुमितिसामग्री प्रबला। तेन संशयोत्तरपुरुष-प्रत्यक्षोपपत्तिरिति भावः। तदपि न, संदिग्धवह्नौ पर्वते प्रत्यक्षापत्तेः, असंदिग्धपुरुषत्वे

---

[१] ङ - साक्षात्कारत्व

[२] ङ - चाक्षुषत्व

[३] ङ - दोषत्वात्

[४] ग - न दोषः

[५] ङ - ग्रहकालीनेन

सन्निकृष्टे पुरुषे व्याप्यदर्शनादनुमित्यापत्तेश्च। यदप्यसन्निकृष्टद्रव्यविशिष्टप्रत्यक्ष-सामग्रीतोऽनुमितिसामग्री बलवती। तेन पुरुषप्रत्यक्षं वह्निप्रत्यक्षाभावश्च सिद्धिः[१]।

न च घटे पच्यमानत्वेन भाविरक्तिमानुमानानुपपत्तिः [२]अवर्तमानविशेषणकप्रत्यक्ष-सामग्रीतोऽपि [३]बलवत्त्वात् इति तदपि न। एवमपि करभ्रमात् पुरुषतादात्म्यारोपानुपपत्तेः। किञ्च सौरभ्यव्याप्यदर्शनेऽपि सौरभ्यानुमितिर्न स्यात्, सौरभ्यस्य वर्तमानत्वादद्रव्यत्वाच्च। यदपि च प्रत्यक्षजनकसंनिकर्षानाश्रयविशेषणकप्रत्यक्षप्रमा सामग्रीतोऽनुमितिसामग्री बलवती। तेन पुरुषप्रमाभ्रमयोरुपपत्तिः [४]सौरभ्याप्रत्यक्षोपपत्तिः च चक्षुस्संयुक्तसमवायस्य गन्धाग्राहकत्वात्। एवञ्च पर्वते न वह्निप्रत्यक्षापत्तिश्चेति, तदपि न, पर्वते वह्नि-भ्रमानुमित्यनुपपत्तेश्च।

ननु ज्ञानस्य प्रत्यासत्तित्वेऽनुमितिसामग्र्या निरुक्तप्राबल्यस्य कल्प्यतया गौरवान्न ज्ञानं प्रत्यासत्तिरिति चेन्न। त्वन्मतेऽपि संशयानन्तरपुरुषभ्रमस्थलेऽनिर्वचनीयोत्पत्तिसामग्र्या अनुमितिसामग्रीप्रतिबन्धकत्वस्य कल्प्यतया गौरवस्य तुल्यत्वात्।

इयांस्तु विशेषः - अर्थसामग्र्याः प्रतिबन्धकत्वेऽनुमित्सया पुरुषभ्रमानुमित्यर्थं सिसाधयिषाविरहसहकृतार्थसामग्रीप्रतिबन्धकत्वस्य तत्रैव सिसाधयिषा [५]सहकृतानुमिति-सामग्र्या अर्थप्रतिबन्धकत्वस्य च कल्प्यतयातिगौरवमिति । अथवा यत्र मानान्तरं नास्ति यत्र च तत्संभवेऽपि प्रत्यक्षत्वमनुभूयते संशयोत्तरप्रत्यक्षादौ तत्रैव ज्ञानस्य प्रत्यासत्तित्वं कल्प्यते। ततश्च वह्निज्ञाने मानान्तरसत्त्वात् प्रत्यक्षत्वाननुभवाच्च न तत्र ज्ञानस्य प्रत्यासत्तिता।

ननु तत्र ज्ञानस्य प्रत्यासत्तित्वेऽनुमानं प्रमाणान्तरमेव न भवेत्, वह्न्यादिज्ञानस्य मानसत्वसंभवात्। तस्मात् मानान्तरसत्त्वात् वह्न्यादिज्ञानं न प्रत्यक्षमित्यनुपपन्नम्। न चानुमितित्वानुभवात् [६]प्रत्यक्षत्वाभावः, अनुमितेः प्रत्यक्षविशेषत्वसंभवात्। न च प्रत्यक्षत्वाननुभवात् प्रत्यक्षत्वाभावानुभवाद्वा प्रत्यक्षत्वाभावः। कविकाव्यमूलभूतज्ञानेऽपि

---

[१] ख, ग, घ, ङ, च - सिद्धः

[२] ङ - आवर्तमान

[३] घ, ङ - बलवत्त्वस्य विवक्षितत्वात्

[४] ङ - सौरभ्याप्रत्यक्षापत्तिः

[५] ङ - सहितानुमिति

[६] ग - प्रत्यक्षत्वासंभवः

तथात्वप्रसङ्गादिति [१]चेत् - उच्यते, अनुमितिरूपकार्यानुसारेण तावद्व्याप्यपरामर्शत्वेन हेतुता वाच्यैव। तस्यैव प्रत्यासत्तितयापि जनकत्वे गौरवम्। अपि च सिसाधयिषायां सत्यां तत्र तया प्रत्यक्षप्रतिबन्धस्संप्रतिपन्नः। तत्रानुमितेः प्रत्यक्षान्तर्भावे सिसाधयिषयानुमिति-प्रतिबन्धाभावायानुमितिभिन्नप्रत्यक्षत्वं सिसाधयिषा प्रतिबन्ध्यतावच्छेदकं वाच्यम्। अनुमितेः प्रत्यक्षानन्तर्भावे तु प्रत्यक्षत्वमेव प्रतिबन्ध्यतावच्छेदकमिति लाघवम्। किञ्चानुमितौ प्रत्यक्षत्वमानसत्वलक्षणजातिद्वयकल्पने गौरवम्।

यदुक्तं कैश्चित् - अनुमितेरुपनीतान्तरवैलक्षण्यं [२]उभयसिद्धम्। तथा चानुमिति-स्थले तादृशप्रत्यक्षानुत्पत्तिः[३] अनुमितिसामग्र्या प्रतिबन्धात् वाच्या। तत्रानुमितिसामग्री प्रतिबन्ध्यतावच्छेदकमुपनीतप्रत्यक्षत्वम्, नत्वनुमितिभिन्नत्वविशेषितं गौरवात्। तथा चानुमिति सामग्र्यानुमितेः प्रतिबन्धासंभवादनुमितिः प्रत्यक्षभिन्नेत्यनुमानं पृथगिति, तन्न, तयोः हि वैलक्षण्यमनुमितित्वं तदभावावेवान्यस्यादर्शनात्। तथा चानुमितित्वाभाव-विशिष्टप्रत्यक्षानुत्पत्तिः[४] अनुमितिसामग्र्यास्सत्त्वात्।

यच्चोच्यते - अनुमितित्वस्यानुभवत्वव्याप्यप्रत्यक्षत्वव्याप्यमानसत्वव्याप्यत्व-कल्पनापेक्षया लाघवादनुभवत्वव्याप्यत्वमेव कल्प्यतामिति, तन्न। प्रत्यक्षत्वव्याप्यत्वाभाव-मानसत्वव्याप्यत्वाभावकल्पनापेक्षया तदुभयव्याप्यत्वकल्पनस्यैव लघुत्वात्।

केचित्तु - अप्रसिद्धाभावसाध्यकेऽयं वह्नित्वाभाववद्विशेष्यको न दाहसमर्थप्रवृत्ति-जनकत्वादित्यादिव्यतिरेकिणि साध्यस्य पूर्वाज्ञाततयोपनयासंभवादनुमानं पृथक्। न च साध्यस्याप्रसिद्धतया तद्विशिष्टानुमितेरसंभवः, पक्षविशेषणिकायास्तस्यास्संभवात्।

ननु साध्यांशे साध्यतावच्छेदकप्रकारकव्यतिरेकव्याप्तिज्ञानं हि साध्यतावच्छेदक-प्रकारकानुमितौ कारणम्। तथा चाभावसाध्यकेष्वप्रामाण्याभावत्वादेः साध्यतावच्छेद-कत्वादप्रामाण्याभावाभावत्वेन व्यतिरेकव्याप्तिज्ञानमेवोपकारकं स्यात्, न त्वप्रामाण्यत्वेन। प्रकृते चाप्रामाण्याभावाप्रसिद्धेः तादृशव्यतिरेकव्याप्तिज्ञानासंभवात् नानुमितिरिति चेन्न। यद्रूपेण व्यतिरेकव्याप्तिज्ञानं तदवच्छिन्नाभावत्वप्रकारकानुमितिः[५] इत्येव नियमः। तथा

---

[१] ख - चेन्न

[२] ख - उभयवादिसिद्धम्; घ - उभयानुभवसिद्धम्

[३] ग - प्रत्यक्षत्वानुत्पत्तिः

[४] क, ख, घ, छ - प्रत्यक्षत्वानुत्पत्तिः

[५] ग, घ, च - प्रकारिकानुमितिः

चाप्रामाण्यत्वेन व्यतिरेकव्याप्तिज्ञानादप्रसिद्धाप्रामाण्याभावत्वप्रकारकानुमितिः[१] अविरुद्धा, तर्हि यत्र वह्न्यभावस्तत्र धूमाभाव इति व्यतिरेकव्याप्तिज्ञानात् वह्न्यभावाभावत्व-प्रकारिकानुमितिः[२] स्यात्, न तु वह्नित्वप्रकारिका।

न चेष्टापत्तिः, इष्टतावच्छेदकाप्रकारकत्वेन वह्न्यर्थप्रवृत्त्यनुपपत्तेरिति चेन्न। वह्निमानित्यनुमानान्तरात् प्रवृत्तेः। न चान्वयव्यतिरेक्यनुमितेर्वह्नौ वह्नित्ववह्न्यभावा-भावत्वोभयप्रकारकत्वापत्तिरिष्टापत्तेः। न च पृथिवीत्वादिनेतरभेदानुमानं न स्यात्, भेदस्य तादात्म्याभावत्वाभावादिति वाच्यम्, तादात्म्याभावेन[३] भेदानुमानसंभवात्। न च तन्निरूपितव्याप्तिज्ञानस्य तदनुमितिहेतुत्वात् व्यतिरेकव्याप्तिज्ञानादनुमित्यसंभवः, प्रमेयत्वेन व्याप्तिज्ञानादनुमित्यदर्शनेन व्यभिचारज्ञानविरोधिव्याप्तिज्ञानहेतुत्वस्य वाच्यतया[४] व्यतिरेकव्याप्तिज्ञानस्यापि तादृशत्वेन हेतुत्वात्।

न च व्यतिरेकिणि साध्यसन्देहस्य साध्याभावरूपव्याप्यसंदेहरूपत्वाद्धेतुनिश्चयस्य व्यापकाभावनिश्चयरूपत्वात् व्यभिचारसंशयात् व्याप्त्यग्रहादनुमितिर्न संभवतीति वाच्यम्, पक्षीयस्य तस्याप्रतिबन्धकत्वात्, अन्यथा अनुमानमात्रोच्छेदादित्याहुः। किञ्चानुमितेः मानसत्वेऽपि न हानिः। अनुमितित्वानपायात् क्लृप्तानामनन्तानां कारणानामभावेऽप्यपूर्व-मिथ्यावस्तूत्पत्ति कल्पनापेक्षयास्यैव ज्यायस्त्वात्।

वस्तुतस्तु [५]"**स्मृतिः प्रत्यक्षमैतिह्यमनुमानश्चतुष्टयम्**' इति प्रमितिविभागः श्रूयते।

[६]"**प्रत्यक्षमनुमानञ्च शास्त्रञ्च विविधागमम्।**
त्रयं सुविदितं कार्यं धर्मसिद्धिमभीप्सता'

इति प्रमाणविभागो मनुना स्मृतः। अतस्तदनुसारान्न ज्ञानस्य प्रत्यासत्तितयानुमिति जनकतेति। यत्तु यत्र यदनुभूतं तत्रैव ज्ञानं प्रत्यासत्तिर्भवदपि भवेत्, अन्यथा पूर्वं दण्डिनि

---

[१] ग - प्रकारिकानुमितिः
[२] क, घ - प्रकारकानुमितिः
[३] ग - तादात्म्यानुमानेन
[४] क, छ - ज्ञानत्वेन हेतुत्ववाच्यतया
[५] **स्मृतिः प्रत्यक्षमैतिह्यमनुमानश्चतुष्टयम्।**
प्रमाणमिति विज्ञेयं धर्माद्यर्थे बुभूषुभिः।। (माधवाचार्यस्य प्रमाणक्षणम्)
[६] म.स्मृ.१२.१०५

दण्डवत्तयाऽज्ञातेऽपि पश्चात् सन्निकृष्टे स्मृतदण्डवैशिष्ट्यानुभवप्रसङ्गादिति, [१]तदयुक्तम्, काव्यादि [२]मूलभूतोत्प्रेक्षकज्ञानप्रतियोगिविशिष्टाभावप्रत्यक्षादीनां विशेषणोपनयमात्रेण दर्शनेन ज्ञानमात्रस्य प्रत्यासत्तित्वकल्पनात्।

न चैवमुक्तातिप्रसङ्गः, तत्र तत्रावच्छेदकज्ञानदोषोत्प्रेक्षादीनामन्वयव्यतिरेकाभ्यां सहकारित्वकल्पनात् सामान्यकारणमात्रात् कार्यानुत्पत्तिस्थले विशेषकारणकल्पनस्य युक्तत्वात्। यच्चोक्तम् - अन्यथाख्यातिमते रजत एव प्रवृत्तिस्स्यात् न शुक्तौ, ज्ञानस्य स्वविषये प्रवर्तकत्वात्। ननु रजतं न विषयः, किन्तु शुक्तिरेवेति चेन्न। अन्याकारं ज्ञानं [३]अन्यालम्बनम् इति संविद्विरोध इति, तन्न। रजताकारज्ञानस्य शुक्त्यालम्बनतया स्वविषय एव प्रवर्तकत्वात्।

न च संविद्विरोधः, आकारशब्देन प्रकारविवक्षायां सप्रकारकज्ञानासिद्धिप्रसङ्गात्, विषयविवक्षायामपि तथा, अन्यमात्रविषयत्वं त्वसिद्धम्। एवञ्च न संविद्विरोधः, न वा प्रवृत्त्यनुपपत्तिः, यत्रेष्टतावच्छेदकवैशिष्ट्यं विषयीक्रियते तत्र ज्ञानस्य प्रवर्तकत्वात्। नन्विदं रजतमिति ज्ञानं हि पुरोवर्तिनो रजतत्वविशिष्टाभेदं विषयीकरोति, न रजतत्व-संसर्गं रजतमिति स्मृतावुपसर्जनस्य तस्यारोपासंभवात्। स्वातन्त्र्येणानुपस्थितस्याप्यारोपे संसर्गाभावधीनियामकप्रतियोग्यारोपसमये तादात्म्यारोपप्रसङ्ग इति चेन्न, त्वया मया च [४]आरोपस्याभावधीहेतुत्वानङ्गीकारात्। तदङ्गीकारेऽप्यारोपहेतूपस्थितौ सत्यामपि तद्धेतु-दोषाभावान्न तादात्म्यारोपः, दोषस्य फलकल्प्यत्वात्। किञ्च प्रतियोगितावच्छेदकस्य सप्रकारकतयोपस्थित्यभावेऽप्यन्योन्याभावप्रतीतेस्सर्वत्र दर्शनात्, उपसर्जनतयोपस्थितस्य प्रतियोगितावच्छेदकस्य सर्वत्रारोपो वाच्यः।

किञ्च [५]प्राधान्येन उपस्थितस्यारोपनियमेऽपि घटत्वात्यन्ताभावघटान्योऽन्याभावयोः युगपत् प्रतीतिनियमापत्तिः। प्राधान्येनैव घटत्वोपस्थितेः। तन्नियमाभ्युपगमे भूतलनिष्ठाभ्यां घटात्यन्ताभावघटान्योऽन्याभावाभ्यां किमपराद्धम्, तदुभयारोपे च दोषादेव व्यवस्था। किञ्चैवं संविद्विरोधं वदन् परोक्षे कां

---

[१] ग - तन्न

[२] अन्येषु कोशेषु - मूलभूतौत्प्रेक्षिक

[३] ग -अन्यालम्बनत्वं सिद्धम्

[४] ग - आरोप्याभावधी; ख - आरोपस्य भावधी

[५] ख - सामान्येन

गतिं [१]यास्यसि। तत्र ह्यन्यथाख्यातिरेव गतिः, तत्राप्यनिर्वचनीयोत्पत्तिः यदीष्यते तदातीतवस्त्ववच्छिन्नाधिष्ठानकशाब्दभ्रमोऽनुपपन्नः। इदानीं तदवच्छिन्नाभावेनाधिष्ठानाभावेऽध्यासासंभवात् तदवच्छिन्नाधिष्ठानकत्वाभावे च [२]तदभिन्नसत्ताकत्वाभावेन तादात्म्याभावात् सामानाधिकरण्यप्रतीतिरनुपपन्ना। ननु शुक्ति-रजतसंसर्गस्य[३] शून्यतया संनिकर्षाभावादपूर्वतया ज्ञानप्रत्यासत्तिविरहाच्च, तत्प्रतीतेरसिद्धेः नान्यथाख्यातिसंभवः। नैवम्, सत्यस्यैव रजतत्वसंसर्गस्य [४]ज्ञानेन प्रत्यासन्नस्य तत्र प्रतीतिसंभवात्।

ननु सत्यस्यैव प्रतीतौ कथमन्यथाख्यातिः? तत्राविद्यमानस्य संसर्गस्य तत्र प्रतीतेरन्यथाख्यातिरिति चेत् केयं तत्र प्रतीतिः? न तावत् तत्र विद्यमानस्य प्रतीतिः, तत्राविद्यमानस्य तत्र विद्यमानत्वाभावात्, नापि तत्र विद्यमानतया प्रतीतिः, संसर्गे विशेषणाप्रतीतेः। शुक्तिविशेष्यकरजतत्वविशेषणकप्रतीतौ रजतत्वसंसर्गस्सत्य एव संसर्गमर्यादया भासते। तस्य च संसर्गस्य शुक्तिलक्षणविशेष्येऽविद्यमानत्वादन्यथा-ख्यातिरिति चेन्न, समूहालम्बनमात्रस्य भ्रमत्वप्रसङ्गात्।

घटपटसमूहालम्बनं हि घटरूपविशेष्याविद्यमानपटत्वसंसर्गविषयमिति, चेदुच्यते - विशिष्टज्ञाने तावद्विशेषणविशेष्यसंबन्धानां भासमानता सर्वलोकप्रसिद्धा दुरपह्नवा। एवं समूहालम्बने विशेषणादिव्यवस्था दृश्यते। किञ्चित् प्रत्येव किञ्चित् विशेषणं, नान्यत् प्रतीतिः, इयमपि व्यवस्था सर्वलोकप्रसिद्धा, नापह्नवमर्हति। ततश्च घटपटसमूहालम्बने घटविशेष्यकत्वावच्छेदेन घटत्वविशेषणकत्वं तत्संबन्धसंसर्गकत्वञ्च, पटविशेष्यकत्वा-वच्छेदेन पटत्वविशेषणकत्वं तत्संबन्धसंसर्गकत्वं चेति न काचिदनुपपत्तिः। अन्यथा परोक्षसमूहालम्बने तवापि [५]भ्रमत्वस्य दुर्वारत्वात्। अतिरिक्तविषयितापक्षे[६] तु सैव विशेषणविशेष्यसंसर्गनिरूप्या [७]घटविशेष्यकघटत्वविशेषणिका तत्संसर्गिका चेति। ततश्च

---

[१] ङ - अध्यवस्यसि

[२] घ, ङ - तदवच्छिन्न

[३] क, छ - रजतत्वसंसर्गस्य

[४] ग, ङ - ज्ञाने

[५] ग, ङ - भ्रमस्य

[६] ख, घ, ङ - अतिरिक्तविषयतापक्षे

[७] ङ - घटविशेष्यका; ग, घ, च - घटविशेष्यिका

विषयितां प्रत्येव विशेष्यता विशेषणता चेति। एवञ्च विषयितां प्रति विशेषणविशेष्ययोः तादृशस्वभावनिबन्धन एव परस्परविशेषणविशेष्यभावव्यपदेशः। सा च विषयिता समूहालम्बने नाना तत्र, यत्र [१]विषयितायां येषां विशेषणविशेष्यसंसर्गाणां निरूपकत्वं तेषामेवेदमस्य विशेषणमित्यादिरूपेण परस्परसंबन्धित्वं नान्येषाम्। यज्ज्ञानविषयितायां विशेष्यावृत्तिविशेषणसंबन्धो निरूपकः सान्यथाख्यातिः।

ननु सिद्धान्ते ज्ञातुरेकस्य ज्ञानमेकमेव विषयिताभेदादेव ज्ञानभेदव्यपदेशो वाच्यः। तत्र विषयिताभेदे कथं समूहालम्बनमेकं [२]ज्ञानम् उच्यते। प्रसरणात्मिकावस्था एका ज्ञानैक्यव्यपदेशप्रयोजिका। न च परोक्षे प्रसरणाभावः, तत्राप्यान्तरस्य प्रसरणस्य सत्त्वात्। यद्वा [३]विषयित्वम् एवावस्था।

न च समूहालम्बनासिद्धिः, विषयितानां समूहीभूयैकतापन्नानां ज्ञानैक्यव्यपदेश-निबन्धनत्वात्। समूहीभावश्चैककालावच्छेदेनैकज्ञानगततया। एवञ्च संसर्गस्य सत्त्वेऽपि विशेष्यासंसर्गिप्रकारकत्वादन्यथाख्यातिसिद्धिः।

यत्तु विशिष्टज्ञानं विशेषणविशेष्योभयसंसर्गविषयमभेदज्ञानञ्च स्वप्रकारीभूतधर्म-द्वयाश्रयाभेदविषयमिति नियमात्, कथं नासत्ख्यातिरिति तन्न, तादृशनियमे [४]मानाभावात्। विशिष्टज्ञानत्वन्तु सप्रकारकत्वमेवेति न तदनुपपत्तिस्तत्र मानम्।

नन्विह प्रतीतस्य रजतस्यान्यत्र सत्त्वं विना [५]नान्यथाख्यातिः सिद्ध्यति । तच्च न भ्रान्त्या न बाधेन वा सिध्यति, तयोरिह सदसद्भावमात्रविषयत्वात्। न च भ्रान्तेः पूर्वानुभवजन्यत्वात् तस्य च देशान्तरे वाच्यत्वात् भ्रान्त्यनुपपत्त्यान्यत्र सत्वं सिध्यति, भिन्नविषयादपि समानप्रकारकपूर्वानुभवात् [६]भ्रान्त्युपपत्तेः। न चासतो निषेधायोगात् त्रैकालिकनिषेधविषयस्य च तत्र सत्त्वायोगात् बाधानुपपत्त्या तत्र तत्सिध्यति। तत्र रजतस्याप्यनुभूयमानतया त्रैकालिकतदभावस्यैवासिद्ध्यापातात् सदसद्विलक्षणरजतस्य त्रैकालिकाभावेऽपि सत्त्वोपपत्तेश्चेति चेन्न। रजतत्वस्यैव शुक्तौ प्रतीयमानतया तस्यान्यत्र

[१] ख, ग - विषयतायां
[२] ग, घ, ङ - विज्ञानम्
[३] ख, ङ - विषयत्वम्
[४] ङ - प्रमाणाभावात्
[५] ङ - अन्यथाख्यातिः न संभवति
[६] क - भ्रान्त्यनुपपत्तेः

सत्वे आपणरजतानुभवस्यैव मानत्वात्, रजतस्य तत्र प्रतीयमानत्वेऽपि शुक्तिप्रवृत्ति-प्रयोजिका रजतबुद्धिः सत्यविषया। रजतबुद्धित्वात् संप्रतिपन्नवदित्यनुमानेन क्लृप्त-विषयत्वकल्पने लाघवम्। तत्र रजतस्य विद्यमानत्वे सर्वैरुपलभ्येत। सामग्र्यभावाच्च न तत्र रजतसंभवः। वह्निभ्रमादौ च दाहादिप्रसङ्ग इत्यादि तर्कसहकृतेनान्यत्र सत्त्वसिद्धेः। ख्यातिबाधान्यथानुपपत्तिश्चात्र मानम्। ख्यात्यनुपपत्तेस्सत्त्वसिद्धिः बाधान्यथानुपपत्तेः तत्र [१]असिद्धिः इति। न च तत्र सत्त्वप्रतीतिबलात् त्रैकालिकाभावस्यैवासिद्धिप्रसङ्गः, दोषजन्यत्वेन निषेधप्रतीत्यपेक्षया तस्या दुर्बलत्वात्। अन्यथा तवापि निषेधस्य सत्यत्वं रजतस्य मिथ्यात्वञ्च कथं सिद्ध्येत्।

यदुक्तम् - त्रैकालिकाभावसत्त्वेऽपि सदसद्विलक्षणप्रतियोगी तत्रोपपद्यत इति, तन्न, वक्ष्यमाणदूषणगणग्रासात्। तस्मात् त्रैकालिकनिषेध एवान्यत्र सत्त्वे प्रमाणम्। क्वचित् मदीयमिदं रजतमिति भ्रमानन्तरं गेहं गतस्य तत्र तद्दर्शने सति, इदमेव रजतं मया पूर्वं भ्रमेण तद्देशस्थतया [२]ज्ञातम् इति प्रतीतिश्च तत्र मानम्। [३]'**वाचं धेनुमुपासीत**' इत्यादिश्रुतिः, [४]'**अधर्मं धर्ममिति यो मन्यते तमसाऽऽवृता**' इति स्मृतिश्चान्यथाख्यातौ प्रमाणम्।

अनिर्वचनीयख्यातौ च न मानम्, भ्रमविषयरजतस्य सद्वैलक्षण्ये मानाभावात्। यदाहुः - सद्रजतमिति प्रत्यक्षं तत्र मानम्। तत्र न तावत् रजतस्वरूपमेव सत्, सच्छब्दस्य रजतपर्यायत्वेनाप्रसिद्धेः सत्ताजातेः सर्वत्रासिद्धेः। चैतन्यातिरिक्तसत्तायाम्[५] मानाभावाच्च। बाधायोग्यतायाश्च सत्ताया आत्मनोऽन्यत्र मानाभावात्। तस्मादधिष्ठानसद्व्यक्ति-तादात्म्यमेवेदं ज्ञानं विषयीकरोति। तस्य च भिन्नत्वे सति अभिन्नसत्ताकत्वरूपतया सद्भेदघटितत्वात् सदन्यद्रजतं प्रत्यक्षविषय इति, तन्न। सद्रजतमित्यत्र सदभेदस्य

---

[१] क, ख, घ - असत्त्वसिद्धिः

[२] ङ - गृहीतम्

[३] **वाचं धेनुमुपासीत**। तस्याश्चत्वारः स्तनाः, स्वाहाकारो वषट्कारो हन्तकारः स्वधाकारः। तस्यै द्वौ स्तनौ देवा उपजीवन्ति, स्वाहाकारं च वषट्कारं च हन्ताकारं मनुष्याः, स्वधाकारं पितरः। तस्याः प्राण ऋषभो मनो वत्सः। (बृ.उ.७.८.१)

[४] **अधर्मं धर्ममिति यो मन्यते तमसाऽऽवृता।**
सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी।। (महा.भीष्मे.४२.३२; भ.गी.१८.३२)

[५] ख - सत्तायाः

सत्त्वसंसर्गस्य वा रजते प्रतीतेः। भिन्नस्याभिन्नसत्ताकत्वस्य क्वाप्यसिद्धेश्च। न च ब्रह्मण एव सत्तारूपत्वात् तदादाय भिन्नयोरभिन्नसत्ताकत्वसंभवः, सर्वेषां सर्वतादात्म्यप्रसङ्गात्।

न च घटाद्यवच्छिन्नसत्तैव रूपादेः सत्ता, तथा च शुक्त्याद्यवच्छिन्नसत्तैव [१]रजतादेः सत्ता, अतो नातिप्रसङ्ग इति वाच्यम्। तथा सति घटप्रकाशदशायां रसादिप्रकाशप्रसङ्गस्य प्रागेवोक्तत्वात्। किञ्चोक्तन्यायेन घटस्सन्नित्यत्रापि सद्भेदप्रतीतेः मिथ्यात्वानुमानेऽपि सिद्धसाधनम्। अपि च सद्रजतमिति प्रतीतेस्सत्ताधर्मो विषयः। सा च त्वयाप्यभ्युपगता चैतन्यातिरिक्ताविद्यमानतैव, [२]अस्तिविद्यत्योरेकार्थत्वात् [३]बाधायोग्यत्वम् वा विषयोऽस्तु। अत्रात्मनोऽन्यत्र सत्त्वे [४]प्रमाणाभावः चासिद्धः, घटः सन्निति सत्सामानाधिकरण्यप्रतीतेरेव मानत्वात्।

न च ब्रह्मणोऽन्यत्र सत्ताङ्गीकारे गौरवम्, प्रामाणिकगौरवस्यादोषत्वात्, सर्वप्रतीतीनां बाधितार्थविषयत्वकल्पन एव च गौरवम्। एतेनानिर्वचनीयः सदभेदो घटादावुत्पद्यते, तत्प्रतीतिरेव सामानाधिकरण्यव्यवहारनिमित्तमिति निरस्तम्। किञ्च विशेषणद्वयसंसर्गस्यैव सामानाधिकरण्यप्रतीतिनिबन्धनत्वस्य नीलमुत्पलमित्यादौ दर्शनात्, इहापि स एव वाच्यः। तत्राप्यभेद एव निमित्तमिति चेत्, तथापि विशेषणस्यैव तद्वत् भेदाभावरूपतया तत्संसर्गस्य सामानाधिकरण्यव्यवहारनिमित्तत्वानपायात्। न ह्यभेद इति नामकरणमात्रेण तत्कार्यसिद्धिः। तथा सत्यपां वह्निनामकरणे ततो दाहप्रसङ्गात् भेदाविरोधित्वादभेद इति नाममात्रमेवाङ्गीकृतो हि घटस्य सद्वैलक्षण्यमङ्गीकुर्वता सद्भेदः।

यदप्याहुः - बाधान्यथानुपपत्तिः रजतस्य सद्वैलक्षण्ये प्रमाणमिति, तत्र किं रजतस्य सद्वैलक्षण्यं विना नेह रजतमिति निषेधोऽनुपपन्नः, उत नेदं रजतमिहेति, अथवा नेदं रजतमिति वा। नाद्यः, देशान्तरनिषेधस्य देशान्तरसत्त्वेन विरोधाभावात्। न द्वितीयः, तादृशस्य बाधस्यासिद्धेः। न तृतीयः, इदं पदार्थगतरजतान्यत्वस्य रजतसत्वेन विरोधाभावात्। न हि घटस्य पटान्यत्वं पटसत्वविरोधि। इदं रजतमेव न सदिति प्रतीतिस्तु साधिका स्यात्, सा तु नास्त्येव।

---

[१] ङ - रूपादेः

[२] **अस्तिसच्छब्दौ** पर्यायौ भवनक्रियाक्तृवाच्यत्वात्। (नारायणार्यस्य नीतिमाला - पृ.३३)

[३] ग - बाधायोग्यम्

[४] ङ - प्रमाणाभावात्

ननु बाधायोग्यत्वं सत्त्वं तत्कथं बाधे स्यादिति चेत्, कोऽत्र बाधः। यदयोग्यत्वं सत्त्वम्, किं प्रतिपन्नोपाधौ निषेधः, उत स्वाधिकरणे निषेधः? आद्येऽपि किं प्रतिपन्नोपाधिरधिकरणतया प्रतिपन्नमुताधिष्ठानम्। आद्येऽपि प्रतिपन्नेऽधिकरणे क्वापि निषेधायोग्यत्वम् सत्वमुत प्रतिपन्नेऽधिकरणे क्वचिन्निषेधायोग्यत्वं सत्त्वम्।

नाद्यः, तस्य लोकरीत्या त्वद्रीत्या च सच्छब्दार्थत्वाभावात्। लोके हि गेहे देवदत्तो वर्तत इति ज्ञानानन्तरं गेहे भ्रान्त्या देवदत्तः प्रतिपन्नः तत्र नास्त्येवेति प्रतीतौ सत्यामप्यापणे सोऽस्तीति सत्त्वं प्रतीयते। लोकव्यवहारानुसारादेवास्माकमपि न तत्सच्छब्दार्थः। त्वन्मतेऽप्यनाप्तवाक्यादिना क्वचित् ब्रह्मणि प्रतीते सति तत्र निषेध-संभवात् न द्वितीयः। क्वचिन्निषेधायोग्यस्याप्यन्यत्र निषेधयोग्यत्ववत्[१] प्रतिपन्नाधिकरणे क्वचिन्निषेधायोग्यस्यापि अन्यत्र क्वचित् प्रतिपन्नाधिकरणे निषेधसंभवात् न द्वितीयः।

अधिष्ठानं किं भ्रमे धर्मि उताध्यस्यमानाभिन्नमध्यासाधिकरणम्। नाद्यः, पूर्वोक्त-रीत्या लोकरीत्यादिविरोधेनाधिकरणतया भ्रमविषये निषेधायोग्यत्वस्य सत्त्वरूपत्वा-भावात्। न द्वितीयः, अध्यस्यमानाभिन्नस्याध्यासाधिकरणत्वासिद्धेः। स्वाधिकरणे निषेधो बाध इत्याद्यद्वितीयेऽप्यसिद्धिरेव। एतेन विमतं सदन्यत् बाध्यत्वात् [२]व्यतिरेकेण आत्मवत् इत्यनुमानमपि निरस्तम्। साध्यसाधनयोः पूर्वोक्तविकल्पैः [३]यथायोगम् अर्थान्तरत्वादि-दोषसत्त्वात्।

न च ख्यातिबाधान्यथानुपपत्तिश्शुक्तिरजतस्य [४]सदसद्विलक्षणत्वे मानम्, ताभ्यां सत्त्वासत्वयोरेव सिद्धेः। नन्वसत्त्वेन विरोधात् सद्रूपता न संभवतीति [५]अधिष्ठानसता एव सद्रूपतायाः वाच्यत्वात् सद्वैलक्षण्यसिद्धिः इति चेन्न, ख्यातिबाधयोरन्यत्र सत्त्वेऽप्युपपत्तेः। एवमनिर्वचनीयोत्पत्तौ न किञ्चित् साधकं, बाधकानि तु भूयांसि। तथा हि बाधानन्तरमपीह पूर्वं रजतमासीदिति धीप्रसङ्गः, अनिर्वचनीयरजतस्य तत्र सत्त्वात्।

---

[१] ग - निषेधयोग्यवत्

[२] ख - व्यतिरेकिणः

[३] ग - यथायोग्यम्

[४] घ, ङ - सद्विलक्षणत्वे; ग - सदन्यद्विलक्षणत्वे

[५] ग, घ, ङ - अधिष्ठानसत्तया

२. प्रपञ्चमिथ्यात्वभङ्गः

ननु नेदं रजतमिति ज्ञाने सतीदं रजतमिति ज्ञानासंभवात् नोक्तप्रतीतिसंभव इति चेन्न, भिन्नत्वे सत्यभिन्नसत्ताकत्वम्। इदं रजतमिति सामानाधिकरण्यप्रतीतेर्विषय इत्युक्ततया भेदप्रतीतेस्तादृशसामानाधिकरण्यप्रतीत्यविरुद्धतया तत्प्रतीतेरप्यनपायप्रसङ्गात्, तादात्म्यं सामानाधिकरण्यप्रतीतौ संसर्गमर्यादया भासत इत्युक्तावपि, न सप्रकारकभेदज्ञानं निष्प्रकारकभेदज्ञानस्य विरोधि, नापि निष्प्रकारकाभिन्नसत्ताकत्वज्ञानस्य[१]।

नन्विदं रजतमिति [२]सामानाधिकरण्यप्रतीतिविषयस्य[३] एव नेदं रजतमिति निषेधः, अतो रजतमासीदिति प्रतीत्यभाव इति चेन्न, भिन्नत्वे सत्यभिन्नसत्ताकत्वस्य निषेधासंभवात्। किञ्च शुक्तिगतत्रैकालिकाभावविरोधान्न तत्र प्रतियोगिसंभवः।

ननु प्रतियोगिसत्तयैव विरोधात् सद्विलक्षणरजतस्य नाभावविरोध इति चेन्न, लाघवेन प्रतियोगिनैव विरोधात्, घटाद्यभावानां प्रतियोगिनैव विरोधात्, तत्रापि प्रतियोगिसत्त्वस्य त्वया निरासात्, अधिष्ठानात्मिकाया घटादेस्सत्ता, तयैवाभावो विरुध्यत इति। यदि [४]तदा इहापि [५]अधिष्ठानात्मिकायाः रजतसत्तायाः[६] विरोधादेव नाभावसंभवः। किञ्च प्रतियोगितदभावयोः सत्त्वासत्त्वव्यवस्थानुपपत्तिः।

यच्चेदमुच्यते - अनन्यथासिद्धविधिनिषेधप्रत्यक्षाभ्यां रजततदभावयोरावश्यकत्वे रजतस्य इव[७] तदभावस्य बाधाभावात् सत्त्वमिति।

तत्र यद्यभावबुद्धिर्बाधः तदा रजतबुद्धिरपि बाधः [८]प्रसजेत्। यदि च विरहैकस्वभावस्याभावस्य बुद्धिर्बाधः, यदि वाभावत्वेन बुद्धिः, तदा घटाभावभ्रमानन्तरं घटबुद्धिर्बाधो न स्यात्।

एतेन त्रैकालिकाभावधीर्बाध इति निरस्तम्, घटस्य भूतले तत्त्रैकालिकत्वाभावात्। यदि च पश्चात्तनाभावबुद्धिर्बाधः तदोत्तरभाविघटाभावभ्रमेण घटप्रमाया बाधः स्यात्, यदि

---

[१] ङ - सत्ताकत्वस्य; ग - सत्वाक्त्वज्ञानत्वस्य

[२] क, छ - समानाधिकरण

[३] ख - विषयज्ञानस्य

[४] ङ - तत्

[५] क, च, छ - अधिष्ठानात्मिकया

[६] ग, घ, ङ - रजतसत्ता तया; क - रजतसत्तया

[७] ङ - एव

[८] ग, ङ - प्रसज्येत्

चाभावप्रमाबाधः तदा प्रमात्वम्, यद्यबाधितार्थगोचरत्वं तदात्माश्रयः, यदि तत्संसर्गवति तत्प्रकारकत्वं तदा तस्य विधिनिषेधयोस्तुल्यत्वात् कथं बाध्यबाधकभावः? यदि च [१]ज्ञानेन [२]निवृत्तिर्बाधः तदोत्तरकालसत्त्वाभावेऽपि स्वकाले सत्त्वाभावः कुतः? न हि मुद्गरनिवृत्तस्य घटस्य स्वकालेऽप्यसत्त्वं दृष्टमिष्टं वा। प्रत्युत निवृत्त्यनुपपत्त्या तत्पूर्वकाले सत्त्वमेव सिध्येत्। [३]ज्ञाननिवृत्तस्य सद्विलक्षणत्वनिर्बन्धोऽपि निर्निबन्धनः। यदि च मिथ्यात्वबुद्धिर्बाधः तदा स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वं मिथ्यात्वमिति त्वदभिमतत्वात् लौकिकैः तदनवगमान्न बाधसिद्धिः। स्वसमानाधिकरणात्यन्ताभावप्रतियोगिनो [४]बुद्ध्या बाध इत्युक्तावपि बाधासिद्धिः परस्परबाधप्रसङ्गश्च।

अपि च यदि रजते [५]प्रातिभासिकसत्वं तदभावे व्यावहारिकसत्त्वं वा पारमार्थिकसत्त्वं वा, व्यावहारिकसत्त्वाभावात् पारमार्थिकसत्त्वाभावाद्वा सदसद्व्यवस्थेत्युच्येत, तदा यदि व्यवहारदशायामबाध्यत्वं व्यावहारिकसत्त्वं प्रतिभासदशायामबाध्यत्वं प्रातिभासिक सत्त्वमित्युच्येत, तदा रजततदभावयोस्सत्त्वद्वयमप्यवर्जनीयम्। प्रतिभादशायां व्यवहारस्य व्यवहारदशायां प्रतिभायाश्च रजततदभावयोस्तुल्यत्वात्। ब्रह्मज्ञानेतराबाध्यत्वं व्यावहारिकसत्वं तदितरबाध्यत्वं प्रातिभासिकत्वमित्यपि न। बाध्यत्वस्य स्वाधिकरणनिष्ठात्यन्ताभावप्रतियोगित्वात्मकत्वे[६] ब्रह्मज्ञानेतरविशेषणानन्वयात् तस्य प्रतियोगितदभावयोः तुल्यत्वाच्च। निवर्त्यत्यात्मकत्वेन तेन भावाभावयोरविरोधसिद्धिः, कालह्रासदैर्घ्यमात्रस्याविरोधाहेतुत्वात्। तथा सति ध्वंसप्रागभावात्यन्ताभावान्योऽन्याभावैः प्रतियोगिप्रतियोगितावच्छेदकयोरविरोधप्रसङ्गात्। सत्ताभेदमनादृत्य [७]सत्यमिथ्यात्वाभ्याम् एव विरोधपरिहारे आत्माश्रयः। स्वाधिकरणवृत्त्यभावप्रतियोगित्वेनैवाभावसामानाधिकरण्यरूपाविरोधसमर्थनात्। किञ्च क्लृप्तकारणाभावान्न रजतोत्पत्तिसंभवः।

---

[१] ङ - ज्ञाने
[२] क, छ - निवृत्तिबाधः
[३] ख, घ, च, छ - ज्ञाननिवर्त्यस्य
[४] ख, ग, घ, ङ, छ - बुद्धिर्बाधः
[५] ग, ङ - प्रातिभासिकत्वम्
[६] ख - प्रतीत्यात्मकत्वे
[७] ख - सत्यत्वमिथ्यात्वाभ्याम्

२. प्रपञ्चमिथ्यात्वभङ्गः

ननु सत्यरजते यत्कार्यतावच्छेदकं रजतत्वं न तदिहास्तीति कथमसंभव इति चेत्, तर्हि यदेव सत्यरजतगतं रजतत्वं तदवच्छेदेनेष्टसाधनत्वग्रह इति प्रातिभासिकरजते प्रवृत्तिर्न स्यात्। शुक्तिरजते तादृशरजतत्वासंसर्गाग्रहाद्वा [१]रजतत्वयोः भेदाग्रहाद्वा यदि प्रवृत्तिः तर्ह्यनिर्वचनीयख्यातिः दत्तजलाञ्जलिस्स्यात्।

ननु शुक्तिरजतं सत्यरजततादात्म्येनोत्पद्यत इति तत्तादात्म्यग्रहात् तत्र प्रवर्तत इति चेन्न, सत्यरजतावच्छिन्नसदधिष्ठानकत्वाभावेन तादात्म्यासिद्धेः। अभेद एवानिर्वचनीय उत्पद्यत इति चेत्, किं तेन? तस्येष्टसाधनतावच्छेदकत्वेनाग्रहात्, तद्ग्रहेऽपि प्रवृत्त्यनुपपत्तेः।

ननु सादृश्यज्ञानात् प्रवर्तत इति [२]चेत्, तथा सति प्रवृत्तौ कारणान्तरकल्पना गौरवम्। किञ्च [३]सादृश्यज्ञानात् प्रवृत्तौ शुक्ती रजतसदृशीति ज्ञानादपि [४]प्रवृत्त्यापत्तिः। भेदज्ञानान्न प्रवर्तत इति चेत्, तर्हि भेदाग्रहस्सादृश्यज्ञानञ्च प्रवर्त्तकमित्युक्तं स्यात्, तथा च नानिर्वचनीयसिद्धिः, शुक्तावेव रजतसादृश्यज्ञानात् तद्भेदाग्रहाच्च प्रवृत्त्युपपत्तेः।

नन्वनिर्वचनीयमेवेष्टसाधनत्वमुत्पद्यते, तदेवेह ज्ञायते, तज्ज्ञानादेव च प्रवृत्तिरिति चेन्न, तथा सति संप्रतिपन्नेष्टसाधनतायाः[५] यज्ज्ञानं प्रवृत्तिकारणतया संप्रतिपन्नम्, तस्येह कारणत्वं परित्यज्य, कल्प्यस्य ज्ञानं प्रवृत्तिकारणमिति कल्पनीयम्। ततो वरं सन्निकर्ष-कारणतां परित्यज्य क्लृप्तस्यैव दोषस्य भ्रमकारणतारूपधर्मकल्पनम्[६]। अविद्यावृत्तिपक्षे तदपि क्लृप्तमेव, पक्षान्तरेऽपि परोक्ष अन्यथाख्यातौ [७]दोषस्य कारणत्वं क्लृप्तमेव। किञ्चानिर्वचनीयपक्षेऽपूर्वं रजतम्, तत्रेष्टसाधनत्वम्, तज्ज्ञानस्य प्रवर्तकत्वम्, स्वाभाव-सामानाधिकरण्यं सत्ताभेद इत्यादीनि बहूनि परिकल्पनीयानीति।

किञ्च ज्ञानकारणाभावाच्च न प्रत्यक्षभ्रमसंभवः। न हि ज्ञानात् प्रागविद्यमानेनार्थेन सन्निकर्षसंभवः। तदभावे च प्रत्यक्षानुपपत्तिं त्वमेवात्थ।

---

[१] ग, ङ, च - रजतारजतयोः
[२] ग - चेन्न
[३] ख - सादृश्यज्ञानोत्पत्तौ
[४] क, ग - प्रवृत्त्यापत्तेः
[५] ङ - साधनतया
[६] ङ - कल्पना
[७] ङ - दोषान्तरस्य

नन्वविद्यावृत्तिरेव हि भ्रमः, नान्तःकरणवृत्तिः, अतो न संनिकर्षापेक्षेति चेत्, [१]अविद्यावृत्तेः अपि साक्षात्काररूपत्वे तदपेक्षाध्रौव्यात्, तदभावे चान्यथाख्यातिपक्षेऽपि तथा सुवचत्वात्। किञ्चेयमविद्यावृत्तिरन्यथाख्यातिरूपेति कुतो न कल्प्यते, तथा सति अर्थोत्पत्तिकल्पनागौरवं न भविष्यति[२]। अथ स्यात् साक्ष्येव भ्रमः, स चानादिरिति न सन्निकर्षापेक्षेति, तन्न। इदमाकारवृत्त्यवच्छिन्नचैतन्यस्यैव रजतावभासकत्वाभिधानात्, तद्वृत्तेश्च जन्यतया रजतसन्निकर्षावश्यंभावात्।

नन्वभिव्यक्तचैतन्याभेदो हि भासमानता। तस्य चेदमाकारवृत्त्यवच्छिन्नचैतन्याध्यासादेव सिद्धे रजताकारवृत्त्यनपेक्षणात् रजतावभासस्यान्यथासिद्धेः न संनिकर्षापेक्षेति [३]चेन्न। यद्येवं तद्विषयप्रत्यक्षस्य तत्संनिकर्षजन्यत्वमनादृत्यान्यथाख्यातिसिद्धिरवलम्ब्यते तर्हि दोषेणान्यथासिद्धिरस्तु, [४]नियमसंकोचस्य उभयत्रापि तुल्यत्वात्, किञ्च यद्युत्पद्यते रजतं नश्यति च तर्ह्युभयं प्रतीयेत।

ननु प्रतीयत एव रजतज्ञानमुत्पन्नं नष्टमिति। सविशेषणे हीति न्यायेन साक्षिण एवोत्पत्त्यसंभवेन तत्प्रतीतेः रजतविषयत्वादिति चेन्न, प्रतीतेरव्याख्येयत्वादिति प्रागेवाभिधानात्। अन्यथेदं रजतमिति प्रतीतेरबाधितं शुक्तित्वमेव विषय इति गङ्गापदवत् व्याख्यानप्रसङ्गात्। तन्न्यायविषयत्वाङ्गीकारेऽपि स्वर्गी ध्वस्त इत्यपि प्रतीतेस्सत्वात्, इहापि रजतमुत्पन्नं नष्टमित्यपि व्यवह्रियेत। किञ्च चाकचक्यदर्शनानन्तरं व्यासङ्गादिना किञ्चित्कालविलम्बेन रजतभ्रमे सति पूर्वमेवात्र रजतं स्थितमिदानीं मया दृष्टमिति प्रतीतिर्दृश्यते, तत्र कथमर्थोत्पत्तिः प्रतीयेत। अपि चाविद्यावृत्तेरिदमाकारवृत्तेर्वा [५]रजतज्ञानत्वस्याङ्गीकारात् कथं रजतज्ञानानुत्पत्तिः। अपि च तत्र रजतस्योत्पत्तौ तद्रजतं सर्वैरपि गृह्येत। बहूनामिदमाकारवृत्तौ सत्यामनावृतरजतावभासकचैतन्येन प्रमातृचैतन्याभेदस्याविशिष्टत्वात्। इदमवच्छिन्नचैतन्यस्य रजतावच्छिन्नचैतन्यस्य च भेदमङ्गीकृत्य, इतरेषां रजतावच्छिन्नचैतन्यमावृतमित्युक्तौ इदं रजतयोस्तादात्म्यभङ्गः। किञ्च रजते सति कथं तत्र तदभावः।

---

[१] ङ - अविद्यावृत्तिः

[२] ङ - भवति

[३] अन्येषु कोशेषु - चेत्

[४] ग - नियमसंकोचग्रहस्य

[५] ग - रजतज्ञानत्वाङ्गीकारात्; ङ - रजतज्ञानस्याङ्गीकारात्

२. प्रपञ्चमिथ्यात्वभङ्गः

अत्राह नवीनः - रजते सत्यपि व्यधिकरणधर्मावच्छिन्नरजताभावो न विरुद्धः। न चाभावः प्रतियोगिसमानस्वभावः, ससंबन्धिकपदार्थस्य ससंबन्धिसमानस्वभावत्वात्। अतः कथं प्रातिभासिकरजते सति प्रातिभासिकस्तदभाव इति वाच्यम्, अभावस्य प्रतियोगितावच्छेदकसमानस्वभावत्वात्। अन्यथा श्रुतिप्रमितप्रपञ्चाभावस्य वास्तवत्वानुपपत्तेः, श्रुतेश्च तत्वावेदकत्वमौत्सर्गिकम्। अत्र च सत्त्वमेव प्रतियोगितावच्छेदकम्, तादृशाभावानभ्युपगमे यस्य कदापि रजतं नास्त्येव। तस्यानाप्तवाक्यात् मदीयमिदं रजतमिति ज्ञाने, आप्तवाक्यात् मदीयमिदं रजतं न भवतीति ज्ञानं प्रमा न स्यात्। न च तत्र मदीयत्वस्यैव निषेधः, तस्य तत्र सत्त्वात् प्रतियोगिविशेषणत्वानुभवाच्च। अत एव न रजतत्वस्य निषेधः, मदीयत्वाभावाद्वा रजतत्वाभावाद्वा आप्तेनेत्थमुक्तमिति जिज्ञासाभावप्रसङ्गाच्च। यत्र विशिष्टाभावतात्पर्यज्ञानं श्रोतुस्तत्र तस्यैव [१]आवश्यकता। अथवा प्रतियोगितावच्छेदकस्य प्रतियोगिसंबन्धोऽपेक्षितः न तद्धर्मत्वमपि। अन्यथा घटत्वघटरूपादिनिषेधायोगात्। अस्ति च रजतेऽधिष्ठानसत्तावैशिष्ट्यं प्रतियोगिसमानस्वभावम्। अतः प्रतियोगितावच्छेदकसमानस्वभावो रजताभावः परमार्थ इति।

तन्न, तत्र किं प्रमाणमात्रस्य तत्त्वावेदकत्वमुत्सर्गः उत श्रुतेः। नाद्यः, तावता श्रुत्या प्रपञ्चाभावस्य वास्तवत्वासिद्धेः। न द्वितीयः, वेदबाह्यत्वप्रकाशप्रसङ्गात्, श्रुतावपि तत्त्वावेदकत्वबाधोक्तेः।

यदुक्तं रजते सत्यपि सत्त्वावच्छिन्नरजताभावो न विरुद्ध इति, तन्न। घटो नास्ति, घटो [२]न इत्यादौ घटत्वादेरिव, रजतं नास्तीत्यत्रापि रजतत्वस्यैव प्रतियोगितावच्छेदकत्वात्। न च घटो नास्तीत्यादावपि सत्त्वमेव प्रतियोगितावच्छेदकम्, घटवत्यपि [३]निषेधप्रसङ्गात्। न च घटादौ सदभेदप्रतीतेस्तत्र निषेधासंभवः, भिन्नत्वे सत्यभिन्नसत्ताकत्वरूपतादात्म्यप्रतीतेरेव त्वदभिमतत्वेन सद्भेदस्यैव प्रतीत्या अभेदप्रतीतेरसिद्धेः।

यच्चाधिष्ठानात्मकसद्वैशिष्ट्यस्य प्रतियोगिनि सत्वात् सत्त्वावच्छिन्नरजताभावः [४]संसृष्टावच्छिन्नप्रतियोगिक एवेति प्रतियोगितावच्छेदकसत्त्वसमानस्वभावो भावः परमार्थ इत्युक्तम्, तदपि न। सत्त्वावच्छिन्नरजते सति तदभावासंभवात्। न चाभावस्य

---

[१] ङ - आवश्यकत्वात्

[२] ङ - अस्ति

[३] ग - निषिद्धप्रसङ्गात्

[४] ग - सत्त्वावच्छिन्न

प्रतियोगितावच्छेदकसमानस्वभावत्वेन सत्त्वावच्छिन्नरजताभावस्य परमार्थत्वात् न विरोध इति वाच्यम्। लाघवेनाभावस्य प्रतियोगिसमान [१]स्वभावत्वस्य एव वाच्यत्वात्। व्यधिकरणधर्मावच्छिन्नाभावश्चासिद्धः, प्रतियोगिनि विद्यमाने तदभावासंभवात्। न च प्रतियोगितावच्छेदकावच्छिन्नेनाभावस्य विरोधः, गौरवात्। न चापनीतदण्डे देवदत्ते दण्डावच्छिन्नप्रतियोगिकदेवदत्ताभावानुपपत्तिः, इष्टापत्तेः। दण्डी नास्तीति देवदत्ते दण्डाभावस्यैव प्रतीतेः, स्वर्गी ध्वस्त इतिवत्। अस्तु वा विशिष्टाभावो विषयः, तथापि दण्ड्यन्तरप्रतियोगिक एव [२]सः। न चैवं मदीयमिदं रजतं न भवतीति प्रतीत्यनुपपत्तिः, मदीयत्वस्य निश्चये रजतं नेत्येव प्रतीतेः, रजतत्वस्य निश्चये मदीयं नेत्येव प्रतीतेः। उभयसंदेहे मदीयत्वस्य रजतत्वान्यतराभाववानित्येव प्रतीतेः। एतत्प्रतीतिबलादेव मदीयमिदं रजतं न भवतीति व्यवहारः स्वर्गध्वंसज्ञानात् स्वर्गी ध्वस्त इति व्यवहारवत्। अन्यथा तदीयारजतवत्यतदीयरजतवति विद्यमानेऽपीह [३]तदीयरजतवन्नास्तीति बुद्धेः व्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकता कस्याप्यभावस्य सिद्ध्यापत्तेः।

एवमेवोत्तरोत्तरव्यधिकरणधर्मानादाय निषेधेऽनन्ताभाववैजात्यकल्पनाप्रसङ्गः। तथा घटत्वावच्छिन्ने पटे पटत्वं नास्तीति बुद्धेः व्यधिकरणधर्मावच्छिन्नधिकरणताकस्याभावस्य द्रव्यत्वावच्छिन्नपटत्वावच्छिन्ने पटत्वं नास्तीति बुद्धेः व्यधिकरणधर्मावच्छिन्नाधिकरणतावच्छेदकताकाभावस्य च सिद्धिप्रसङ्गः। तत्राप्युत्तरोत्तरव्यधिकरणधर्मानादायाधिकरणनिरूपणे[४] अनन्ताभाववैजात्यकल्पनाप्रसङ्गश्च।

यच्चेदं मतं [५]शुक्तिरजताभावो रजतत्वावच्छिन्नप्रतियोगिक एव। स च परमार्थः। अतः प्रतियोगिसमानसत्ताको नेति न तेन विरोधः। न च घटे सोऽप्यभावो रजतविरोध्येव दृश्यत इति वाच्यम्, रजतसादेश्यतदभावरूपविरुद्धधर्माध्यासेन तदुभयवृत्यभावयोर्भेदात्। एवञ्च घटे रजताभावः प्रातिभासिकः। न च प्रतियोगिनः कल्पितत्वे प्रतियोगिसमानस्वभावत्वादभावस्य सत्यत्वासंभवः, प्रतियोगिविद्यमानतामात्रेण तदुपपत्तेः, प्रतियोगिनः कल्पितत्वस्यैवाभावसत्यतापादकत्वाच्चेति तन्न। प्रतियोगिनोऽभावाद्भिन्नसत्ताकत्वेऽपि

[१] ग, ङ - स्वभावस्य
[२] ङ - अस्तु
[३] क, घ, ङ - मदीय
[४] ङ - निरूपणात्; ग - निरूपणेन
[५] ग, च - शुक्तौ

२. प्रपञ्चमिथ्यात्वभङ्गः

प्रतियोग्यनुपयोगिभावसंबन्धे भावाभावस्वरूपयोः[१] प्रयोजकत्ववद्विरोधेऽपि प्रयोजकत्वस्य दुर्निवारत्वात् विरुद्धधर्माध्यासादभावभेद इत्यपि तुच्छम्। घटस्यापि पटसादेश्यतदभावाभ्यां भेदप्रसङ्गात्, कालभेदेन विरोधपरिहारे देशभेदेनापि सोऽस्तु। अन्यथा घटाभावस्य पटसादेश्यतदभावाभ्यां भेदप्रसङ्गात्। घटादौ शुक्तिरजताभावस्य प्रातिभासिकत्वमपि [२]अबाधात् न युक्तम्। न च समसत्ताकस्यैव विरोधित्वात् तदभावात् प्रतियोगिसत्त्वप्रसङ्गः। तवाप्यभावाप्रतीति दशायां घटे रजतप्रसङ्गात्, कारणाभावादेव न तत्र रजतं तदभावो वा प्रातिभासिक इति चेत्, तर्ह्युभयसत्वप्रसङ्गः परस्पराभावात्मकत्वात्, उभयाभावाभ्युपगमे [३]रजताभावानभ्युपगमाविरोधश्च। किञ्च प्रतियोगिसमानसत्ताकस्यैवाभावस्य विरोधित्वे अविद्यानिवृत्तेरविद्याविरोधाभावप्रसङ्गः।

यच्च मतान्तरं रजताभावो नाधिष्ठानाद्भिद्यते, अधिकरणभिन्नसत्ताकप्रतियोगिकाभावस्यैवाधिकरणाद्भेदात्। न च लाघवादधिकरणभिन्नप्रतियोगिकत्वमेव तत्प्रयोजकमिति वाच्यम्, तत्त्वावेदकाद्वैतश्रुतिविरोधात्। न च भावाद्वैतपरा सा संकोचकाभावात् ब्रह्मणोऽनन्तत्वानुपपत्तेश्च। सत्याभावस्य दृग्विषयत्वे दृश्यत्वस्य व्यभिचारः, न चेत् ब्रह्मा सर्वज्ञं स्यात्, अभावश्च न सिध्येत्। प्रतियोगिसमानस्वभावत्वनियमाच्च[४] न विरहात्माभावः[५] सत्यस्संभवति। प्रतियोगितावच्छेदकं सत्त्वं तत्समानस्वभावोऽभाव इति गौरवम्। रजतमिह नास्तीति स्वरूपतो निषेधधीविरुद्धञ्च। अतो रजतमिदमिति सत्तैक्यानुभवात् सत्ताभेदाननुभवाच्चाधिकरणैकसत्ताकस्याभावोऽधिकरणात्मैव। घटादौ तूक्तभेदप्रयोजकसत्त्वात् प्रतियोगिसमानस्वभावोऽन्य एव रजताभावः।

न चाभावद्वैविध्यानुपपत्तिः यथा घटाभावे घटाद्भेदस्वरूपं पटादौ त्वतिरिक्ताभावः, तथात्रापि संभवात्। एवं ध्वंसोऽपि द्विविधः, अधिष्ठानेऽधिष्ठानात्मान्यत्र त्वधिकरणात् भिन्नः, प्रपञ्चान्योऽन्याभावोऽपि ब्रह्मैव। न चैवमभावसाङ्कर्यदोषः, क्वचित्तस्य प्रामाणिकत्वात्। घटस्य ध्वंसप्रागभावत्वप्रागभावध्वंसत्वात्यन्ताभावात्यन्ताभावत्वानां परैरभ्युपगमात्। न च वाच्यं शुक्तिनिष्ठतया प्रमितो रजताभावो नाधिष्ठानात्मकः। भ्रमत्वे

---

[१] क, ख, च, छ - संबन्धाभावस्वरूपयोः

[२] ग - अभावात्

[३] ग, घ, च - रजताभावानभ्युपगमविरोधश्च; ङ - रजताभावाभ्युपगमविरोधश्च

[४] ख, ङ - स्वभावनियमाच्च

[५] क - विरहात्मकाभावः; ग - विरहात्मभावः

त्वभाव एव न सिद्ध्येदिति, घटाभावे घटो नास्तीति बुद्धिवद्वैशिष्ट्यांशे भ्रमत्वेऽप्यभाव-स्वरूपे भ्रमत्वासिद्धेः।

वस्तुतो भूतलादावपि [१]घटाद्यभावः चैतन्यमेव भेदे मानाभावात्। अन्यथा भूतले घटसत्त्वानुपपत्तेः। तत्कालेऽपि तदभावस्यावश्यकत्वात्। अस्ति हि घटानयनात्पूर्वं भूतले तदभावः, स घटकालेऽपि तत्र वाच्यः, [२]नित्यत्वाक्रियत्वाभ्यां गतिनाशयोरयोगात्। न च संबन्धस्तयोस्तदा नेति वाच्यम्, पूर्वोत्तरकालयोरपि तदभावापातात्। जननविलयशील-स्वभावसंबन्धस्याभावेऽसंभवात्, स्वरूपद्वयस्य सर्वदा सत्त्वात्। एतेन समयविशेषमपेक्ष्य स्वरूपद्वयं संबन्ध इति निरस्तम्, स्वरूपयोस्तत्समयाजन्यत्वात् तदनपेक्षणात्।

न च प्रतियोगिदेशान्यदेशत्वं संबन्ध इति वाच्यम्। तस्याप्यभावात्मकतया कदाचित् सत्त्वे सर्वदा सत्त्वप्रसङ्गाद्घटदेशस्य[३] तद्भेदायोगाच्च। अत एव भूतला-भावयोर्विशिष्टप्रतीतिजननयोग्यत्वं संबन्ध इत्यपास्तम्। घटकालेऽपि यावद्वस्तु भाविन्या योग्यतायास्सत्त्वात् दुर्निरूपं चाभावत्वम्। विरहैकस्वभावत्वे चात्यन्ताभावः प्रागभाववत् प्रतियोगिसमानकालीनो न स्यात्, अनित्यश्च स्यात्। जन्याभावप्रतियोगित्वस्य तत्पदार्थत्वात्, स्वजन्यविशेषणप्रवेशे[४] गौरवात्। नियतानन्यथासिद्धतयात्यन्ताभावस्यापि [५]जनकत्वसंभवात्।

ननु ब्रह्मणोऽप्यभावत्वे प्रतियोगिनो घटादेरपि तदभावत्वाज्जन्यत्वाच्चानित्यता स्यादिति चेन्न, आरोपितस्य जन्याभावप्रतियोगित्वस्य नित्यमात्रे सुलभतया धर्मिसम-सत्ताकस्यैव तस्यानित्यत्वात्मकत्वात्। तस्माद्विरहैकस्वभावशून्यं चैतन्यमेवाभावः नास्तीति बुद्धेरेकब्रह्मविषयत्वे लाघवाच्च, नानन्ताभावाः कल्प्याः। प्रतियोगिसत्त्वाविरोधिनो अभावत्वस्य पारिभाषिकत्वाच्च। यद्यपि [६]रजतवत् घटस्य त्रैकालिकनिषेधः तत्प्रमात्वं प्रतिबन्धके सत्यपि कार्यञ्च प्रसज्यते, तथापि तस्योभयसमाधेयत्वान्न नो दोषः।

---

[१] क - घटात्यन्ताभावः

[२] ङ - नित्यत्वनिष्क्रियत्वाभ्याम्; ग - नित्यत्वाश्रयत्वाभ्याम्

[३] ग - देशभेदस्य

[४] ङ - प्रदेशे; च - प्रवेशेन

[५] क, छ - जनकत्वासंभवात्

[६] क, छ - रजतत्ववत्

२. प्रपञ्चमिथ्यात्वभङ्गः

श्रुतयोऽपि [१]'**प्रपञ्चोपशमश्शिवोऽद्वैतः**' [२]'**स्वप्रकाशमानन्दं शून्यमभवत्**' '**यत्र त्वस्य सर्वमात्मैवाभूत्**' इत्याद्याः ब्रह्मणः [३]प्रपञ्चाभावात्मकत्वम् दर्शयन्ति।

तथा च स्वानधिकरणानधिकरणात्यन्ताभावप्रतियोगित्वम्[४] मिथ्यात्वमुक्तं भवति। न चैतत् पारिभाषिकम्, सतो वृत्तिमतस्वानधिकरणवृत्त्यत्यन्ताभावप्रतियोगित्वात् सत्य-संभावितस्यैव मिथ्याशब्दार्थत्वात्। अत्यन्ताभावप्रतियोगित्वमात्रं [५]सत्यमते अप्यस्तीति द्वितीयानधिकरणविशेषणम्। परमते [६]विभ्वत्यन्ताभावे सिद्धसाधनात् स्वानधिकरणपदम्।

न च स्वानधिकरणं [७]स्वाभावः तदनधिकरणकाभावश्च स एवेति तत्प्रतियोगित्वात् घटादेस्सिद्धसाधनमिति वाच्यम्। स्वानधिकरणाकधिकरणकत्वाभावस्य विवक्षितत्वात्। घटाभावस्य च पटवृत्तित्वात् स्वानधिकरणावृत्तिस्वाभाववृत्तित्वं वा मिथ्यात्वमस्मन्मते ग्राह्यम्। [८]स्वाभाववृत्तित्वं परमते घटाद्यभावे सिद्धमित्यवृत्तिविशेषणम्। परमते गगनाद्यभावे सिद्धसाधनमित्यत स्वानधिकरणेति पृथिवीत्वघटान्यत्वादिव्यावृत्त्यर्थं द्वितीयस्वपदम्। [९]तदनधिकरणपटाधिकरणस्य घटान्यत्वपृथिवीत्वनियमादिति सिद्धान्त-रहस्यम् इति[१०]। तत्तथैव सदस्युक्तौ सद्भिः [११]उपालम्भात्।

---

[१] अमात्रश्चतुर्थोऽव्यवहार्यः **प्रपञ्चोपशमश्शिवोऽद्वैत** एवमोङ्कार आत्मैव संविशत्यात्मनात्मानं य एवं वेद। (मा.उ.१२)

अमात्रश्चतुर्थोऽव्यवहार्यः **प्रपञ्चोपशमश्शिवोऽद्वैत** ओङ्कार आत्मैव संविशत्यात्मनात्मानं य एवं वेद। (नृ.उ.ता.उ.२)

[२] इममेवोङ्काराग्रविद्योतं तुरीयतुरीयमातमानमनुष्टुभान्विष्य प्रणवेनैव तस्मिन्नवस्थिताः तेभ्यस्तज्ज्योतिरस्य सर्वस्य पुरतः सुविभातमविभातमद्वैतमचिन्त्यमलिङ्गं **स्वप्रकाशमानन्दघनं शून्यमभवत्**, एवंवित्स्वप्रकाशं परमेव ब्रह्म भवति। (नृ.उ.ता.उ.६)

[३] क, घ, च, छ - प्रपञ्चाभावात्मत्वम्

[४] ख - प्रतियोगित्वमात्रम्

[५] ख - सत्यवन्ते; ग - सत्यमेते; च - सत्यमात्रे

[६] ग, च - वियदत्यन्ताभावे

[७] ख, घ - स्वभावः

[८] क, ग - स्वभाववृत्तित्वम्

[९] क, ग, घ, ङ - तदधिकरणपटाधिकरणस्य; ख - तदनधिकरणघटानधिकरणस्य

[१०] ङ - सिद्धान्तापास्यम्

[११] ङ - उपालम्भापातात्; ग - उपालम्भनात्

तथा हि [१]"**नेह नानास्ति**" इत्यभावाधिकरणतया ब्रह्मणः प्रतीतेर्नाधिष्ठानमभावः। न चाद्वितीयश्रुतेः संकोचो दोषः। एतच्छ्रुत्यनुरोधात् तत्संकोचस्य न्याय्यत्वात् सप्तम्यर्थ-बाधादपि हि[२] संकोचमात्रं न्याय्यम्। वस्तुतस्तु न संकोचः। न द्वितीयो यस्मिन्निति सप्तमीबहुव्रीह्याश्रयणे ब्रह्मणि द्वितीयं नास्तीति द्वितीयनिषेधे एकसत्वाविरोधात्, प्रत्युत तदाक्षेपात् षष्ठीबहुव्रीहिर्वा किमपेक्षया द्वितीयन्निषिध्यत इति द्वितीयावध्यपेक्षायां [३]"**एकमेव**" इति, "**नेह नाना**" इति च विहितस्याभावस्यैव प्रतियोगितयान्वयात्।

न चानन्त्यश्रुतिविरोधः, तस्या देशकालवस्त्वपरिच्छेदविषयत्वात्। वस्तुना परिच्छेदश्चान्यस्मात् [४]निष्कर्षः। अन्तशब्दस्य भेदवाचित्वाभावान्न तदभावोऽनन्तशब्दार्थः। अनृतजडपरिच्छिन्नव्यावृत्तिः[५] सत्यादिवाक्यार्थ इति वदतो भेदनिषेधपरत्वोक्तिः कथमिव संगच्छते।

सत्यप्रतियोगिकभेदनिषेधपरत्वाभिधानात्[६] संगच्छत इति चेन्न, सत्यपदाभावात्। तदभावेऽपि ब्रह्मण्यनृतव्यावृत्तेः सत्यपदेनाभिधानादनृतप्रतियोगिकभेदनिषेधासंभवात् सत्य-प्रतियोगिकभेद एव निषेध्य[७] इति चेन्न, देशापरिच्छिन्नभेदनिषेधसंभवात्[८]।

यच्च विरहैकस्वभावो भावः प्रतियोगिसमानस्वभावः स्यात् प्रतियोग्यभावे तत्प्रतियोगिकस्वरूपालाभात्, अतोऽधिष्ठानमेवाभाव इति तन्न, ब्रह्मणोऽप्येवं प्रपञ्च-विरहत्वानुपपत्तेः। यो हि विरहस्वभावोऽन्यस्वभावश्च तस्य कथं प्रतियोग्यभावे तत्प्रतियोगिकस्वरूपलाभः।

---

[१] मनसैवानु द्रष्टव्यं **नेह नानास्ति** किञ्चन।
मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति।। (बृ.उ.६.४.१९; कठ.उ.४.११)

[२] ख, ङ - वा

[३] तस्मात् **एकमेव** चरेत्प्राण्याच्चैवापान्याच्च नेन्मा पाप्मा मृत्युराप्नुवदिति यद्यु चरेत् समापिपयिषेत्तेनो एतस्यै देवतायै सायुज्यं स लोक्तां जयति। (बृ.उ.३.५.२३)
तस्मात् परमेश्वर **एवैकमेव** तद्भवत्येतदमृतमभयमेतद्ब्रह्माभयं वै ब्रह्माभयं हि वै ब्रह्म भवति य एवं वेदेति। (नृ.उ.ता.उ.८)

[४] अन्येषु कोशेषु - निकर्षः

[५] ग - परिच्छिन्नत्वव्यावृत्तेः

[६] ग - निषेधकत्वाभिधानात्

[७] घ, ङ - निषिध्यत

[८] ख - भेदे निषेधासंभवात्; ङ - भेदनिषेधासंभवात्

२. प्रपञ्चमिथ्यात्वभङ्गः

न हि स्वभावान्तरमात्रेण तत्स्वभावोपपत्तिः। तथा सति देवदत्तस्य द्रव्यत्वादि-स्वभावत्वात् वन्ध्यासुतपुत्रत्वस्यापि प्रसङ्गात्। तस्मात् प्रतियोगिनो विद्यमानतामात्रेण विरहैकस्वभावस्यापि सत्यत्वं वा स्यात्, प्रतियोगिनस्सत्वाभावेन ब्रह्मणः प्रपञ्च-विरहत्वाभावो वा स्यात्। किञ्च ब्रह्मणो विरहत्वाङ्गीकारे तदेकस्वभावमेव ब्रह्म स्यात्। निर्धर्मकत्वेन स्वभावान्तराभावात् स्वरूपभेदाभावाच्च। एतेन प्रतियोगिस्वरूपाधीन-स्वरूपसत्ताकोऽभावः प्रतियोगिसमानस्वभाव इति निरस्तम्।

अभावसमानस्वभावप्रतियोगिस्वरूपस्याभावस्वरूपसत्ताप्रयोजकत्वे ह्ययं नियमः स्यात्। न च तथा, लाघवेन प्रतियोगिस्वरूपमात्रस्याभावस्वरूपलाभप्रयोजकत्वात्। तस्मात् [१]रजतत्वावच्छिन्नाभावः पारमार्थिक एवाधिकरणाद्भिन्नोऽङ्गीक्रियताम्। एवं सति अपरमपि लाघवम्, अधिष्ठानतदितरयोरेकत्वादभावस्य 'इह रजतं नास्ति' इत्यधिष्ठाने प्रतीतिसत्वे तदनुग्रहश्च। तदभावे तु नाधिष्ठानस्वरूपस्यापि [२]अत्यन्ताभावत्वसिद्धिः।

यच्चोक्तम् - अधिकरणभिन्नसत्ताकप्रतियोगिकाभावोऽधिकरणाद्भिद्यते, अन्यस्तु अधिकरणात्मेति, तन्न। भूतले रजतं नास्तीति बाधावतारकालीनज्ञानविषयाभावस्य भूतलभिन्नसत्ताकरजतप्रतियोगिकतया भूतलाद्भिन्नस्य विरहैकस्वभावतया प्रतियोगिसमान-स्वभावस्य प्रातिभासिकत्वापत्त्या भूतले रजततदभावबुद्ध्योः भ्रमत्वप्रमात्वविभागाभाव-प्रसङ्गात्। किञ्च शङ्खे [३]श्वैत्याभावभ्रमे तस्याभावस्य [४]शङ्खात्मकत्वप्रसङ्गात् गुणगुणिनोरभिन्नसत्तात्मकत्वात्[५]।

किञ्च घटे घटाभावाभावो घटाद्भिद्येत। घटे घटाभावो नास्तीति हि त्वदीय-प्रलापः। घटाभावेऽपि घटाभावोऽधिकरणात् भिद्येत। गौरवादेव न ध्वंसद्वैविध्यमपि। प्रतियोगिसमानकालीनत्वाच्च नाधिष्ठानं ध्वंसः प्रपञ्चनिवृत्तेः यत्नसाध्यत्वाच्च, अभाव-द्वयकल्पनागौरवादेव नाधिष्ठानमन्योऽन्याभावः। सर्वत्राभावश्चैतन्यमेवेत्यपि तुच्छम्।

---

[१] ख - रजतत्वाभावः

[२] क - अत्यन्ताभावस्य सिद्धिः; ङ - अत्यन्ताभावसिद्धिः

[३] ग, ङ - श्वैत्याभावस्य भ्रमे

[४] घ, ङ - शङ्खासत्वप्रसङ्गात्

[५] अन्येषु कोशेषु - सत्ताकत्वात्

घटाधिकरणे घटाभावबुद्धेरभ्रमत्वप्रसङ्गात्, अविरुद्धस्य[१] चाभावत्वं वदन् कथमनुन्मादी भवेत्।

ननु घटकालेऽपि तत्र घटाभावस्य[२] आवश्यकत्वात् तस्य च ब्रह्मातिरिक्तत्वे समानसत्ताकत्वेन घटासिद्धिप्रसङ्गात्, ब्रह्मस्वरूपमेवाभाव इति चेन्न, घटदशायां तद्देशे घटाभावसत्त्वे मानाभावात् विपरीतमानसद्भावाच्च। न च [३]प्राक् तत्र स्थितस्य पश्चादप्यावश्यकता। अभावान्तरपक्षे कालविशेषादिरूपाभावसंबन्धाभावस्य भावान्तरपक्षे कालविशेषसंबन्धरूपाभावाभावस्य[४] वक्तुं शक्यत्वात्।

न च विरहैकस्वभावत्वे प्रागभाववत् प्रतियोगिकालीनत्वानुपपत्तिः विरहस्वभावत्वे अपि तुल्यत्वात् तद्विरहत्वमेव हि लाघवात्तत्र प्रयोजकम्। प्रमाणबलात् तत्परित्यागे तत एव विरहैकस्वभावत्वमपि न प्रयोजकम्। अत्र घटस्तत्र नेत्यबाधितप्रतीतेः। नापि विरहैकस्वभावत्वे प्रागभाववत् [५]अनित्यत्वप्रसङ्गः, सर्वकालसत्त्वरूपनित्यत्वस्य बाधाभावात्। पारिभाषिकानित्यत्वेऽप्यविरोधात्। स्वजन्याभावप्रतियोगित्वस्यैवानित्यत्व-रूपत्वाच्च लोकानुसाराच्च गौरवं न दोषाय, प्रामाणिकत्वात्। गन्धं प्रति रूपप्राग-भाववदन्यथासिद्धत्वात् नात्यन्ताभावः प्रतियोगिजनकः।

[६]‘**प्रपञ्चोपशमः शिव**’ इत्यत्रोपशमशब्दस्य लोकव्युत्पत्त्यनुसारेऽन्यपरत्वमेव। कार्यासमानकालीनकार्योत्तरकालीनाभावे व्युत्पत्तेः ब्रह्मणि तदभावात्। तदनुसारे चाभावत्वमेव न सिध्येत्। कोऽर्थस्तर्ह्यस्य वाक्यस्येति चेत्, तद्व्याख्यानेनावाभ्यां

---

[१] क - घटविरुद्धस्य

[२] अस्मिन् कोशे ‘घटाभावस्य’ इत्यस्य ‘घटाभावसंबन्धाभावस्य’ इत्यर्थः दृश्यते।

[३] ङ - प्राक्तन प्रस्थितस्य

[४] ङ - रूपाभावस्य

[५] ङ - अन्यथासिद्धत्वानित्यत्वप्रसङ्गः

[६] अमात्रश्चतुर्थोऽव्यवहार्यः **प्रपञ्चोपशमः शिवोद्वैत** एवमोङ्कार आत्मैव संविशत्यात्मनात्मानं य एवं वेद य एवं वेद। (मा.उ.४.१; नृ.उ.ता.उ.२)

यतितव्यम्, श्रुत्यैव व्याख्यानात्। यथात्रैव माण्डूक्योपनिषद्युपक्रमे [१]‘**प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते**’ इत्युक्त्वा तद्विवरणाकाङ्क्षायामुक्तम्। तत्रैते श्लोका भवन्ति -

[२]‘**निवृत्तेस्सर्वदुःखानामीशानः प्रभुरव्ययः।**
अद्वैतस्सर्वभावानां देवस्तुर्यो विभुः स्मृत’ इति।

अत्र ‘**निवृत्तेस्सर्वदुःखानामीशान**’ इत्यनेन प्रपञ्चोपशमशिवशब्दो व्याख्यातः ‘**प्रभुरव्यय**’ इति। शिवशब्दः स्वयं मङ्गलरूपत्वं मङ्गलप्रदत्वञ्च हि, शिवशब्दार्थः तदुभयमाभ्यां प्रदर्शितम्। एवं प्रपञ्चोपशमशिवशब्दाभ्यामनिष्टनिवर्तकत्वमिष्टप्रापकत्वं चोक्तम्। किमन्योऽप्येवंविध इति शङ्कानिराकरणार्थं तृतीयपदमित्यभिप्रायेण तद्व्याचष्टे। ‘**अद्वैतः सर्वभावानाम्**’ इत्यत्र षष्ठी निर्धारणे सर्वभावानां मध्ये उत्तमार्थविषयेऽयमद्वितीय इत्यर्थः। **चतुर्थम्** पदं विवृणोति - ‘**तुर्य**’ इत्यनेन उपसंहारस्थमुदाहृत-वाक्यं तापनीयादिगतान्यपि, एवं जातीयकानि वाक्यानि व्याख्यातानि।

शंकरस्तु - **प्रपञ्चोपशमम्** - प्रपञ्चस्य कार्यकारणात्मकस्योपशमोऽभावो यस्मिन् तत्, प्रपञ्चोपशमं, **शिवम्** - स्वयंप्रकाशमानानन्दात्मस्वरूपत्वान्मङ्गलमित्याह। इयञ्चोपनिषत् [३]‘**सर्वं जनयति प्राणश्चेतोंशून् पुरुषः पृथक्**’ इत्युपक्रमे एव तुरीये पुरुषपदश्रवणात् भगवत्परा।

यत्तु स्वानधिकरणानधिकरणात्यन्ताभावप्रतियोगित्वं मिथ्यात्वमिति निर्वचनम्। तत्राकाश अत्यन्ताभावस्य [४]स्वानधिकरणस्वावृत्त्याकाशरूपात्यन्ताभावस्य[५] सत्यत्व-वादिभिरप्यङ्गीकारात् तदविरोधित्वात् [६]अर्थान्तरम्। संयोगसंबन्धावच्छिन्नघटात्यन्ताभावे चातिव्याप्तिः। तादृशाभाववत एव घटाधिकरणत्वात्। घटे घटनास्तिताबुद्धेः त्वन्मते

---

[१] नान्तः प्रज्ञं न बहिः प्रज्ञं नोभयतः प्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम्। अदृष्टमव्यहार्यमग्राह्यम् अलक्षणमचिन्त्यम् अव्यपदेश्यमेकात्मप्रत्ययसारं **प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते** स आत्मा स विज्ञेयः।। (मा.उ.२.५)

[२] मा.उ.का.२.५.१०

[३] प्रभवः सर्वभावानां सतामिति विनिश्चयः।
सर्वं जनयति प्राणः चेतोंशून् पुरुषः पृथक्।। (मा.उ.का.२.४.६)

[४] ग - स्वानधिकरणानधिकरण

[५] घ, ङ - रूपात्यन्ताभावप्रतियोगित्वस्य

[६] ग - पदार्थान्तरम्

[१]घटालम्बनत्वात् स्वानधिकरणं स्वयं तदवृत्ति स्वयमेवेति तत्प्रतियोगित्वात् घटादावतिव्याप्तिरवृत्त्यभावमादायार्थान्तरञ्च।

ननु ब्रह्मव्यतिरिक्तोऽभावो वृत्तिमानेवेति न तमादायार्थान्तरम्। ब्रह्मस्वरूपाभावप्रतियोगित्वसिद्धौ चेष्टसिद्धिरेवेति चेन्न। ब्रह्मातिरिक्ताभावस्य वृत्तिमत्त्वनियमः कुतः? न च संसर्गाभावत्वस्य वृत्तिमत्त्वव्याप्तिबलात्तन्नियमः, ब्रह्मणोऽप्येवमत्यन्ताभावत्वासिद्धिप्रसङ्गात।

ननु ब्रह्माधिकरणतयैव ब्रह्मातिरिक्तस्य कृत्स्नस्य श्रुत्यावगमात् ब्रह्मातिरिक्तावृत्त्यभावसिद्धिर्बाधादेव न संभवतीति चेत् तर्ह्यनुमानमेव बाधितं स्यात्। ब्रह्मरूपाभावप्रतियोगित्वसिद्धौ न बाध इति चेत्, तर्हि तत एवार्थान्तरता, तत्सिद्धावपि सत्यत्वाविरोधात्। अप्रतियोगिनो भावरूपस्य ब्रह्मणः प्रपञ्चाध्यासाधिष्ठानत्वेनैवाभावत्वसिद्धिः, नान्यथेति चेन्न, अधिष्ठानताया अभावत्वानुपपादकत्वात्। शुक्तौ रजताभावत्वं दृष्टमिति चेत्, काऽसौ दृष्टिः? बाधदशायां नेह रजतमिति प्रतीतिरिति चेन्न, बाधदशायां नेह रजतमिति प्रतीतेरसिद्धेः। नेदं रजतमिति हि बाधो दृश्यते। अस्याः भ्रमदशायां नेह रजतमिति प्रतीतेर्विशेषाभावाच्च। यदपि स्वानधिकरणावृत्तिस्वाभाववृत्तित्वं मिथ्यात्वमिति लक्षणम्, तदप्युक्तरीत्यार्थान्तरेणैव [२]निरस्तम्। अवृत्तिस्वाभावस्य ब्रह्मातिरिक्तत्वे ब्रह्मरूपत्वेऽपि सत्यत्वाविरोधात्। किञ्च परैर्द्रव्यात्यन्ताभावस्य स्वानधिकरणतन्तुकपालाद्यवृत्तिगगनात्मकस्वाभाववृत्तित्वाङ्गीकारात् सत्यत्वाविरोधादर्थान्तरम्। एवञ्च अनिर्वचनीयोत्पत्त्यसंभवात् साध्यविकलो दृष्टान्तः। स्वाभावसामानाधिकरण्यासंभवस्य उपपादितत्वात् बाधश्च। दृश्यत्वञ्च ब्रह्मणि व्यभिचारि।

यदाह नवीनः - चिद्विषयत्वं दृश्यत्वम्। तच्च ब्रह्मणि नास्त्येव। विषयत्वस्य भेदाधीनत्वात् मानाभावाच्च। ब्रह्म जानामीत्यनुभवस्यावश्यक [३]वृत्तिविषयतया उपपत्तेः। व्यवहारस्य च स्वरूपात्मकप्रकाशात्[४] उपपत्तेः। अविद्यानिवृत्तेरपि स्वप्रकाशमात्रादुपपत्तेः। अविद्यासमानविषयप्रकाशाभावेऽपि समानविषयकापरोक्षवृत्तेः सहकारित्वेनातिप्रसङ्गनिरासात्, आत्मविषयकसंस्कारस्यापि वृत्त्यादिविशिष्टात्मरूपप्रकाशस्य वृत्तिविनाशे

---

[१] क, ख - घटावलम्बनत्वात्

[२] ग, घ - निवृत्तम्

[३] क, ख, च, छ - वृत्तिविषयता

[४] ग - प्रकाशेनापि ; घ - प्रकाशादपि

विशिष्टरूपेण विनाशादेवोपपत्तेः। [१]"**विज्ञातारमरे केन विजानीयात्**' इति श्रुतिः स्फुटं साटोपमाह स्म। तस्मान्नात्मा स्वगोचर इति, तन्न, अभेदेऽपि विषयत्वस्य समर्थनात्। स्वप्रकाशस्यापि ज्ञानान्तरविषयत्वाच्च[२]।

न च संविद्भेदोऽसिद्धः संविन्नानात्वकल्पने गौरवादिति वाच्यम्, भेदस्याबाधितानुभवसिद्धत्वात्। न च गौरवभयात् भेदप्रतीतेः वृत्तिरूपोपाधिविषयत्वकल्पना, गौरवाविमुक्तेः तदवच्छेदकक्कल्पनं भेदप्रतीतेः तद्विषयत्वकल्पनं संविद्वृत्त्योर्घटविषयत्वकल्पनमुभयत्र विजातीयविषयताकल्पनञ्चाधिकम्।

किञ्च घटादौ प्रतीयमानं ज्ञानविषयत्वं किं चैतन्यविषयत्वमुत वृत्तिविषयत्वम्? आद्ये वृत्तेर्निर्विषयत्वापत्तिः। द्वितीये चैतन्यविषयत्वे मानाभावेन स्वरूपासिद्धिः। न च ब्रह्मणश्चिद्विषयत्वे मानाभावः, ब्रह्म जानामीति प्रतीतेरेव मानत्वात्। न च सा वृत्तिविषया, घटादावपि तथा प्रसङ्गात्। विज्ञातारमिति श्रुतौ विज्ञातारमिति ज्ञानाश्रयत्वप्रतीतेः ज्ञानाश्रयत्वज्ञानभेदोत्पत्तिविनाशानां प्रत्यक्षसिद्धत्वात्। केनेति ज्ञानकरणव्युदासस्वारस्यात् विशुद्धमनोग्राह्यत्वोक्तेश्च [३]दुष्टकारणग्राह्यत्वनिरासपरत्वमर्थान्तरपरत्वं वा प्रतीयेतेति भेदमिथ्यात्वसमर्थनमन्तरेण श्रुतितोऽपि न [४]ब्रह्मणोऽज्ञानाविषयत्वसिद्धिः। कल्पितभेदमादाय ज्ञानविषयत्वसत्वाच्च ब्रह्मणि व्यभिचारः।

तत्र यदुक्तम् - 'स्वसमानसत्ताकभेदप्रतियोगिज्ञानविषयत्वं दृश्यत्वम्' इति। तत्र किं ब्रह्मणि ज्ञानप्रतियोगिकभेदस्य मिथ्यात्वं सिद्धम् उतासिद्धम्? आद्येऽपि प्रपञ्चमिथ्यात्वेन सहैव तन्मिथ्यात्वं सिद्धमिति सिद्धसाधनम्। द्वितीये ब्रह्मणि संदिग्धानैकान्त्यम्। अत एव स्वसमानसत्ताकवृत्तिविषयत्वं दृश्यत्वमिति निरस्तम्,

---

[१] यत्र हि द्वैतमिव भवति - तदितर इतरं पश्यति, तदितर इतरं जिघ्रति, तदितर इतरमभिवदति, तदितर इतरँ शृणोति, तदितर इतरं मनुते, तदितर इतरं विजानाति। यत्र त्वस्य सर्वमात्मैवाभूत् - तत् केन कं पश्येत्, तत् केन कं जिघ्रेत्, तत् केन कमभिवदेत्, तत् केन कं शृणुयात्, तत् केन कं मन्वीत, तत् केन कं विजानीयात्। येनेदँ सर्वं विजानाति, तं केन विजानीयात्। **विज्ञातारमरे केन विजानीयादिति**। उक्तानुशासनासि मैत्रेयी एतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्य विजहार। (बृ.उ.४.४.१४; बृ.उ.६.५.१५)

[२] ग - विषयत्वस्य समर्थनात्

[३] ख - दुष्टकरण; क,छ - दुष्कारण

[४] क, घ - ब्रह्मणो ज्ञानविषयत्वसिद्धिः

साधनवैकल्यञ्च। रजतविषयवृत्तेः त्वयानङ्गीकारात् शुक्तिगोचरेदमाकारवृत्त्यवच्छिन्न-चैतन्यमेव रजतप्रकाश इति हि त्वत्प्रलापः। किञ्च वृत्तौ न किञ्चिन्मानं पश्यामः।

ननूत्पत्तिप्रतीतिर्मानं ज्ञानस्य नित्यतया, इदानीं घटं जानामीति प्रतीतेर्ज्ञान-विषयत्वासंभवात्। तस्मात् ज्ञानाभिन्नतया प्रतीयमानवृत्तिविषयैव[१] उत्पत्तिप्रतीतिः। एवं ब्रह्म जानामीत्यनुभवोऽपि तत्र मानम्, ज्ञानाभिन्नस्य ब्रह्मणो भेदघटितविषयत्वासंभवात्। मैवम्। इदानीं घटं जानामीति प्रतीतेर्ज्ञाने [२]घटविषयिता उत्पत्तिविषयत्वेऽप्युपपत्तेः। एतेन 'ब्रह्म जानामि' इत्यनुभवोऽपि निर्व्यूढः। अभेदेऽप्याविद्यकभेदविषयता[३] उत्पत्तेरविरोधात्, [४]विषयितया एवाविद्यानिवृत्तिसंभवेन तदर्थमपि [५]वृत्तिकल्पना।

नन्वपरोक्षज्ञानेनैव ह्यविद्यानिवृत्तिः वृत्तिपक्षे च करणविशेषेणापरोक्षवृत्तिरुपपद्यते। विषयितापक्षे कथं परोक्षापरोक्षविभागः। न च करणविशेषजन्यविषयिताविशेष एवापरोक्ष्य-मिति वाच्यम्, ब्रह्मज्ञानस्य [६]अज्ञाननिवर्तकत्वाभावप्रसङ्गात्। तत्र विषयितायाश्शब्द-जन्यतया इन्द्रियजन्यत्वाभावेनापरोक्ष्यरूपत्वाभावात् वृत्तिपक्षे त्वपरोक्षार्थविषयत्वमेव वृत्तेः, आपरोक्ष्यमर्थापरोक्ष्यञ्चापरोक्षसंविदभेदात्। अतश्शब्दजन्यायाः ब्रह्मगोचरवृत्तेरपरोक्ष-विषयत्वादापरोक्ष्योपपत्तिरिति।

उच्यते - अपरोक्षज्ञानमज्ञाननिवर्तकमिति परिभाषाङ्गीकारेऽपि ज्ञानस्य तु स्वनिरूपितमापरोक्ष्यं स्वत इत्यस्तु, अन्यनिरूपितं त्वापरोक्ष्यमिन्द्रियाधीनमित्यस्तु। ब्रह्मापरोक्ष्ये स्वाभाविके सत्यप्यविद्यानिवृत्तेरदर्शनात् तत्करणाधीनाविषयिता सहकारित्वेन इष्यताम्। किञ्च यद्यपरोक्षसंविदभेदेनार्थस्यापरोक्ष्यात् तद्विषयतया वृत्तेरापरोक्ष्यात् [७]ब्रह्म-विषयकापरोक्षवृत्तिः संभवतीति वृत्तिकल्पनं तदात्माश्रयः, संविदभेदस्य मिथ्यात्वाधीनत्वात्।

---

[१] ङ - विषयिक
[२] ख - घटविषयता; ग - घटविषय
[३] ङ, च - भेदविषयिता
[४] ग, ङ - विषयतया
[५] ङ - निवृत्तिकल्पना
[६] ङ - अविद्या
[७] ख - ब्रह्मविषयपरोक्षवृत्तिः; ग, ङ - ब्रह्मविषयापरोक्षवृत्तिः

२. प्रपञ्चमिथ्यात्वभङ्गः

यच्चोक्तम् - ज्ञानपदवाच्यत्वार्थं वृत्तिः कल्प्या, स्वरूपज्ञानमात्रस्य ज्ञानपदवत् सत्यादिवाक्यार्थस्य तदेकदेशज्ञानपदवाच्यत्वायोगादिति तन्न, निर्विशेषवाक्यार्थस्य निरसिष्यमाणत्वात्। किञ्च वृत्तिविशिष्टं वृत्त्युपहितं वा चैतन्यं ज्ञानपदार्थ इति हि [१]त्वत्प्रक्रिया। तत्र पदार्थस्य वाक्यार्थत्वमसहमानः पदार्थैकदेशस्य वाक्यार्थत्वं कथमनुमन्यसे। अपि च ज्ञानत्वविशिष्टे ज्ञानपदशक्तिसंभवात् किं वृत्तिकल्पनया।

यदप्युक्तम् - जानामीति विशेषणविशेष्यभावोऽनुभूयते। तच्चैकस्य न संभवतीति वृत्तिकल्पनमिति तन्न, विषयिताविशिष्टस्य स्वरूपं प्रत्यन्तःकरणावच्छिन्नं प्रति वा विशेषणत्वात्। यदा अहं घटं जानामीति ज्ञानस्य विषयता प्रतीयते, स्वस्य स्वविषयत्वासंभवादन्यं प्रति विषयता वाच्या। यदेवान्यत् सैव वृत्तिरिति, नैतत्। घटं जानामीति घटस्य हि ज्ञानविषयतानुभूयते, न ज्ञानस्य।

ननु ज्ञानविषयकव्यवहारस्य समानविषयकज्ञानाभावेऽसंभवादवश्यं ज्ञानविषयता वाच्येति चेन्न। समानविषयकज्ञानस्य व्यवहारहेतुत्वं क्व [२]दृष्टम्? घटज्ञाने इति चेत्तर्हि यथा दर्शनं ज्ञानमेव कल्पनीयम्। किञ्च वृत्तेर्हि घटादिगोचराया [३]ज्ञानावच्छेदकत्वं तव सिद्धान्तः। तस्याः कथं ज्ञानगोचरत्वम्? तथात्वेऽपि वा 'इच्छां जानामि' 'सुखं जानामि' 'दुःखं जानामि' इति कथं व्यवहारः? इच्छादिगोचरवृत्तेरभावात् तत्र स्वप्रकाशादेव ज्ञान-व्यवहारे घटज्ञानेन किमपराद्धम्। अप्रयोजकश्चायं हेतुः।

अत्र केचिन्मायिभिक्षवः आत्मख्यातिवादिभिरार्जितं ग्राह्यलक्षणायोगाख्यं तर्कं भिक्षित्वा वैदिकवञ्चनाय[४] दृग्दृश्ययोः संबन्धानुपपत्तिरिति नामान्तरेण पठन्ति - कोऽसौ दृग्दृश्ययोस्संबन्धः? न तावत् संयोगः, दृशेरद्रव्यत्वात्, तद्द्रव्यत्वेऽपि गुणादिषु तदसंभवात्, तत्र संयुक्तसमवायाङ्गीकारेऽननुगमात्, चक्षुस्संनिकर्षानन्तरं [५]रूपवत् स्पर्शस्यापि व्यवहारप्रसङ्गाच्च। नापि समवायः, आत्मधर्मस्यार्थेषु तदयोगात्। न चार्थानामेव ज्ञाने समवायः, व्यवहितदेशोपलम्भात्। न चाभेदः, जडाजडयोः

---

[१] ङ - त्वत्प्रतिक्रिया

[२] क - द्रष्टव्यम्

[३] क - ज्ञानावच्छेदकम्

[४] ङ - वञ्चनया; ख - वञ्चनायाः

[५] ग - रूपादिव

[१]तदसंभवात्। नापि ज्ञानस्वरूपम्, स्वस्य स्वसंबन्धत्वायोगात्, किञ्चातिप्रसङ्गाच्च। न हि तत् कञ्चित् प्रति अज्ञानमस्वरूपं वा। न च विषयविषयिभावाख्योऽयमपरस्संबन्धः, तस्यापि नियामकान्तराभावे सार्वत्रिकत्वप्रसङ्गात्, अतीतादेरविषयत्वप्रसङ्गाच्च, निराधारस्य संबन्धस्यासंभवात्।

किञ्चायं संबन्धो द्विनिष्ठ एकनिष्ठो वा। नाद्यः, विषयत्वविषयित्वव्यवस्थाया असिद्धेः। किञ्चासौ संबन्धः येनात्मना क्वचिद्वर्तते ततोऽन्यस्मिन्नपि तेनैवात्मना, उतान्यात्मना वा। नाद्यः, द्वयोरपि विषयत्वस्य विषयित्वस्य वा प्रसङ्गात्। न द्वितीयः, एकस्य द्व्यात्मकत्वायोगात् संबन्धस्य विषये विषयित्वात्मना, विषयिणि च [२]विषयत्वात्मना वृत्त्यभावस्य विषयत्वविषयित्वयोर्भेदं विना असिद्धेः। न द्वितीयः, संबन्धत्वव्याघातात्। अतो दृग्दृश्ययोस्संबन्धान्तरासंभवात् [३]दृगध्यस्तत्वस्य एव दृश्य-संबन्धत्वस्य वाच्यतया हेतूच्छित्तिरेव, विपक्षे बाधिकेति।

अत्रोच्यते - एवं वदतश्चैतन्यव्यवहारे किं निबन्धनमभिमतमायुष्मतः, तत्स्वरूपं वृत्त्युपहितं तत्स्वरूपं [४]वा इति चेन्न। तस्य तदध्यस्तत्वाभावात् क्वचित् स्वरूपं व्यवहारहेतुः, क्वचित् तदध्यस्तत्वमित्युक्तावननुगमः।

ननु चैतन्याभेद एव व्यवहारकारणम्। स च ब्रह्मणि तात्त्विकः, प्रपञ्चस्य चिदभेदेनाध्यासात् तत्राध्यासिक इति तन्न, न हि [५]सत्याभेदः अव्यवहारकारण-मित्याध्यासिकोऽपि तथा। तथा सति सत्यवह्नेरिवाध्यासिकवह्नेरपि दाहकत्वप्रसङ्गात्। किञ्च भिन्नत्वे सत्यभिन्नसत्ताकत्वमेवाध्यस्तस्येष्यते। अत्र कथम् [६]आध्यासिकः अप्यभेदः, अधिष्ठानसद्भेदो भासत इति [७]ह्यात्थ, न ह्यभेदे व्युत्पन्नं तादात्म्यपदमाच्छिद्य तस्य भेदे त्वदीयप्रयोगमात्रेण भेदोऽभेद स्यात्। किञ्चातीतानागतादौ व्यवहाराभावश्च स्यात्। तदानीं

[१] ग - तदयोग्यात्
[२] ख - विषयित्वात्मना
[३] ङ - दृगध्यवस्थस्तत्वस्य
[४] ग - एव; च - वा स्वरूपमेव
[५] ग - सत्ताभेदः
[६] ख - आध्यासिकसंबन्धः
[७] क, ख - ह्यार्त्थः; ग - अर्थः

२. प्रपञ्चमिथ्यात्वभङ्गः

[१]तज्ज्ञानाध्यस्तत्वासिद्धेः यदाकदाचित् [२]तदवच्छिन्नचैतन्याध्यासमात्रात् व्यवहारे सर्वेषां सर्वदा सर्वव्यवहारप्रसङ्गः, रूपव्यवहारदशायां रसादिव्यवहारप्रसङ्गश्चासकृदुक्तः। किञ्च वृत्तिविषयत्वमपि वृत्त्यध्यस्तत्वमिति स्यात्। तथा च ब्रह्मणोऽपि वृत्त्यध्यासप्रसङ्गः। किञ्चैवं सर्वेषां विद्यमानसर्वप्रकाशो वर्जनीयः।

न चान्तःकरणोपाधिभेदात् व्यवस्था, तथा सति ह्यन्तःकरणतद्वृत्तिघटावच्छिन्न-चैतन्यानामौपाधिकभेदाविशेषेण कस्यापि कदाचिदपि किञ्चित् प्रकाशोऽपि न स्यात्। अनतिप्रसक्तिमात्रेण प्रकाशाप्रयोजकस्यापि कस्यचित् [३]तत्प्रयोजकतया कल्पने इन्द्रियसन्निकर्षादेरेव तत्प्रयोजकत्वं कल्प्यताम्। किञ्चान्तःकरणोपाधेः प्रयोजकत्वे भावरूपाज्ञानस्य प्रकाशोऽनुपपन्नः, अविद्याकारवृत्त्यभावात्। किञ्च न किञ्चिदवेदिषम्, त्वदुक्तमर्थं न जानामि, संख्यां न जानामि, शास्त्रार्थं न जानामीत्यादौ प्रतियोगिप्रकाशः साक्षीति खलु उच्यते। स च तत्तत् घटाद्यधिष्ठानचैतन्यस्वरूप एव, स चान्तः-करणावच्छिन्नाद्भिन्न इति प्रतियोगिप्रकाशाभावेन देवदत्तादीनामज्ञानप्रकाश एवानुपपन्नः।

नन्वनिर्वचनीयः कश्चित् दृग्दृश्यसंबन्धः नाध्यस्तत्वमेव संबन्ध इति चेन्न, तर्ह्ययमपि प्रपञ्चमिथ्यात्वे[४] अनुकूलतर्कः प्रतियोगिसत्यत्वेऽपि [५]संबन्धमिथ्यात्वोपपत्तेः, दूरस्थवनस्पत्योस्संबन्धवत्। कस्तर्हि दृग्दृश्ययोस्संबन्धः? किं [६]काकदन्तपरीक्षया। न हि तव तन्निरूपणासामर्थ्यमात्रेण [७]इक्षुक्षीरादिमाधुर्यवत् सार्वलौकिकवैदिकानुभवसिद्धं कथञ्चिदप्यपह्नवमर्हति।

'सुहृद्भावेन तु प्रश्ने विषयित्वं मतौ मतम्[८]।
अतत्कालीनरूपञ्च यथामानं मनीषिणाम्।।'

---

[१] ग - तज्ज्ञानाध्यासत्वासिद्धेः

[२] क, ख, घ, च, छ - तदभिन्न

[३] ग - प्रकाशतया

[४] ग, ङ - मिथ्यात्वेन

[५] ङ - संबन्धमिथ्यात्वापत्तेः

[६] काकदन्तपरीक्षा - निष्प्रयोजनविचारे एवं व्यवह्रियते।

[७] **इक्षुक्षीरादिमाधुर्यवत्** - (लौकिकन्यायविशेषः) 'इक्षुक्षीरगुडादीनां माधुयर्स्यान्तरं महत्। तथापि न तदाख्यातुं सरस्वत्यापि शक्यते' इति दण्डिनः वचनमिति वेदान्ताचार्यस्य न्यायपरिशुद्धौ अनुमानाध्याये प्रथमाह्निके दृश्यते।

[८] ख - मतामतौ ; ग - हि संमतम्

यश्च स्वरूपसंबन्धे दोष उक्तो नवीनेन। यदि स्वरूपमेव संबन्धस्तदा घटज्ञाने विश्वमेव प्रकाशेत, अविशेषात्। न च प्रतीयमानघटस्वरूपमेव संबन्धः, प्रतीयमानत्वस्यैवा-निरूपणात्। न च घटस्वरूपं संबन्धः [१]पटज्ञाने पटस्याविषयत्वप्रसङ्गात्। न च घटज्ञाने घटस्वरूपमेव संबन्धः, घटज्ञानत्वस्यैव संबन्धं विना दुर्निरूपत्वादिति, सोऽनुपपन्नः। आध्यासिकेन वा तात्विकेन वा यज्ज्ञानं घटज्ञानत्वेनोभयसिद्धं तत्स्वरूपस्य घटस्वरूपस्य च संबन्धत्वात्। तच्च स्वरूपद्वयम्, तदेव स्वरूपद्वयं प्रति संबन्ध इति नातिप्रसङ्गः। न च पटज्ञाने पटस्याविषयत्वप्रसङ्ग इति। तदुभयस्वरूपस्यापि तदुभयस्वरूपं प्रति [२]संबन्धत्वात्, एवमन्यत्रापि। एतेन व्यावर्तमानत्वादिहेतवोऽपि निरस्ताः।

किञ्च किमिदं व्यावर्तमानत्वं यतः कुतश्चिदन्यत्वम्। अथ यत्र कुत्रचित् देशादावेव सत्त्वम्, यद्वा [३]प्रध्वंसवत्त्वम्, उत प्रतिपन्नोपाधौ निषेधप्रतियोगित्वम्, किं वा कदाचित् क्वचिदेव प्रकाशमानत्वम्। नाद्यः, ब्रह्मण्यनैकान्त्यात् तस्य युष्मदर्थान्यत्वात्। न द्वितीयः, तस्य मिथ्यात्वं प्रत्यप्रयोजकत्वात्। न हि शुक्तिरजतादेः देशान्तरादावभावात् मिथ्यात्वम्, किन्तु प्रतिपन्नदेशादावभावात्।

नन्वेकस्यैव सत्त्वासत्त्वे विरुद्धे कथमुपपद्येते इति चेन्न, कालभेदेन विरोध-परिहारात्। यदाह नवीनः-सत्त्वासत्त्वेऽपि पदार्थधर्मौ स्वरूपं वा। नाद्यः, असत्त्वकालेऽपि पदार्थसद्भावप्रसङ्गात्। अनित्यधर्मस्याश्रयादृतेऽनवस्थानात्, सत्त्वधर्मित्वेऽसत्त्वात् व्याघाताच्च। न द्वितीयः, एकस्य [४]सदसदात्मकत्वविरोधात्।

ननु कालभेदादविरोध इति चेन्न। धर्मस्य हेतुसमाजात् व्यत्ययः, न तु स्वरूपस्य। तथा सति स्वरूपभेदापत्तेः। न ह्यभावः कालभेदेन भावो भवति। इतः पूर्वमसदित्य-सतोऽवध्यनुपपत्तेश्च। तस्य निःस्वभावस्यावच्छेदककालासंबन्धात्। तस्मात् यत्किञ्चित् कालमसत्, तत्सर्वदा असदेव। यत्सत् तत्सर्वदा सदेव, न तूभयात्मकं किञ्चिदस्तीति।

[१] क, छ - घटज्ञाने

[२] ख - संबन्धात्

[३] ख - प्रध्वंसत्त्वम्

[४] ख, ग - सदसदात्मकविरोधात्; क - सदसदात्मत्वविरोधात्

२. प्रपञ्चमिथ्यात्वभङ्गः

अत्र ब्रूमः - सत्त्वासत्त्वे पदार्थधर्मौ स्वरूपमेव वा। पक्षद्वयेऽपि न कश्चित् दोषः। तत्कालासत्त्वं हि तत्कालीनाभावप्रतियोगित्वमभावप्रतियोगिनोरेव [१]भिन्नकालता, न सत्त्वासत्त्वयोः। कालभेदव्यवहारो सत्त्वनिरूपकाभावस्य भिन्नकालत्वादौपचारिकः, अभाव एव वा असत्त्वमिति व्यपदिश्यते। अन्यथा विद्यमानत्वाविद्यमानत्वयोरेवं विकल्पदूषणयोः प्रवृत्तौ कस्ते निस्तारः।

यद्वा कालान्तरीयसत्त्वस्याभावः कालान्तरीयसदन्यत्वं वा असत्त्वम्। किञ्च निःस्वभावस्य कालासंबन्धादिति वदन् यत्किञ्चित्कालेऽसत्, तत्सर्वदा असदेवेति वक्तुं कथं न लज्जसे। न तृतीयः, तस्य देशकालविशेषसत्त्वव्याप्ततया विपरीतसाधकत्वात्। न चतुर्थः, [२]साध्याविशेषात्। नापि पञ्चमः, अप्रयोजकत्वादेव, कालान्तरादौ प्रकाशानुत्पत्तेः तत्सामग्र्यभावप्रयुक्तत्वात्। एतेन परिच्छिन्नत्वहेतुरपि निरस्तः, उक्तविकल्पेष्वेवान्तर्भावात्। जडत्वमपि हि ज्ञानान्यत्वं विवक्षितम्। तत्र ज्ञानपदेन ज्ञानपदमुख्यार्थविवक्षायां ब्रह्मणि व्यभिचारः। तल्लक्ष्यार्थविवक्षायां स्वरूपासिद्धिः, ज्ञानपदेन विषये लक्षणासंभवात्। नापि ज्ञाननिवर्त्यत्वान्यथानुपपत्त्या मिथ्यात्वसिद्धिः त्वया अज्ञानस्यैव ज्ञाननिवर्त्यत्वाङ्गीकारात्।

न च ज्ञाननिवर्त्यत्वान्यथानुपपत्त्या अज्ञानस्य मिथ्यात्वे सिद्धे, तदुपादानकतया प्रपञ्चस्य [३]मिथ्यात्वं सिद्धं इति वाच्यम्, प्रपञ्चस्याज्ञानोपादानकत्वासिद्धेः। अज्ञानस्य ज्ञाननिवर्त्यत्वञ्चासिद्धम्। ज्ञानेनाज्ञानं निवृत्तमिति त्वत्कल्पितप्रतीतेरसिद्धेः। सिद्धावपि न शुक्तिज्ञाननिवर्त्यस्य शुक्त्यज्ञानस्य मिथ्यात्वं लोकसिद्धं, किन्तु रजतस्यैवेति।

अस्तु तर्हि श्रुतिबलात् प्रपञ्चमिथ्यात्वसिद्धिः [४]'**सदेव सोम्येदमग्र आसीत्**' इत्यादिश्रुतेरुदाहताद्वैतश्रुतीनाञ्च तत्र [५]मानत्वात् इति चेन्न, '**सदेव**' इति वाक्यस्य '**सद्विद्याविजये**' निरूपितत्वात्। उदाहताद्वैतवाक्येषु [६]'**मृत्योस्स मृत्युमाप्नोति य इह**

---

[१] ग - भिन्नकालीनत्वात्

[२] ख, ग - साध्यविशेषात्

[३] अन्येषु कोशेषु - मिथ्यात्वसिद्धिः

[४] **सदेव सोम्येदमग्र आसीत्** एकमेवाद्वितीयम्।
तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयं तस्मादसतः सज्जायत।। (छा.उ.६.२.१)

[५] ङ - प्रमाणत्वात्

[६] यदेवेह तदमुत्र यदमुत्र तदन्विह।
मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति।। (कठ.उ.२.१.१०)

नानेव पश्यति' इति वाक्यं तावन्न प्रपञ्चमिथ्यात्वे मानम्। [1]तस्य नियन्तृप्राप्यभेदनिषेध-परत्व एव स्वारस्यस्योपपादितत्वात्। [2]'**मनसैवेदमाप्तव्यम् नेह नानास्ति किञ्चन**' इत्यस्याप्यर्थ उक्त एव। तस्य प्रपञ्चस्य निषेधपरत्वमनुपपन्नम्। एकसत्वस्याप्रतिषेधात् किञ्चन पदवैयर्थ्याच्च। पूर्वत्र [3]'**न ततो विजुगुप्सत**' इति मिथ्यात्वे जुगुप्सा निषेधानुपपत्तेश्च। [4]'**यत्र हि द्वैतमिव भवति**' इत्यादिश्रुतेरपि स्वारसिकार्थः [5]परोक्तार्थस्य संभवः चोक्त एव। [6]'**न द्वितीयोऽस्ति कश्चित्**' इत्येतदपि न प्रपञ्चनिषेधपरम्। [7]तथात्वे नपुंसकान्तप्रयोगप्रसङ्गात्, तत्तुल्यपुरुषान्तरनिषेधपरत्व एव हि पुंलिङ्ग-स्वारस्यम्। नित्यत्वसर्वनियन्तृत्वदोषराहित्यविशिष्टवस्तुप्रतिपादनपूर्वकस्यास्य निषेधस्य तादृशद्वितीय निषेध एव स्वारस्याच्च। [8]'**न ह्यस्ति द्वैतसिद्धिरात्मैव सिद्धोऽद्वितीय**' इत्यत्रापि पूर्वं '**अविकारो ह्युपलब्धः**, **नृसिंहः चिद्रूप एव**' इत्यत्र संकोचविकास-रहितोपलब्ध्याश्रयत्वमुक्तम्। पूर्वत्र '**उपद्रष्टानुमन्तैष आत्मा**' इति सर्वस्य

मनसैवानुद्रष्टव्यं नेह नानास्ति किञ्चन।
मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति।। (बृ.उ.६.४.१९)
सर्वभूतस्थमेकं नारायणं कारणपुरुषमकारणं परं ब्रह्मोम्। शोकमोहविनिर्मुक्तो विष्णुं ध्यायन्न सीदति। द्वैताद्वैतमभयं भवति। **मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति**। (आ.प्र.उ.१)

[1] ग, घ, ङ - तस्याः

[2] **मनसैवेदमाप्तव्यम् नेह नानास्ति किञ्चन**।
मृत्योस्स मृत्युं गच्छति य इह नानेव पश्यति।। (कठ.उ.२.१.११)

[3] अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति।
ईशानो भूतभव्यस्य **न ततो विजुगुप्सते** एतद्वै तत्।। (कठ.उ.२.१.१२)

[4] बृ.उ.४.४.१४; बृ.उ.६.५.१५

[5] क, ग, ङ, च, छ - परोक्तार्थासंभवः; ख - परोक्तार्थसंभवः; घ - परोक्तार्थानुपपत्तिः

[6] ब्रह्मा नारायणः शिवश्च नरायणश्शक्रश्च नारायणः कालश्च नारायणो दिशश्च नारायण ऊर्ध्वंश्च नारायणोऽधश्च नारायणोऽन्तर्बहिश्च नारायणो नारायण एवेदँ सर्वं यद्भूतं यच्च भव्यम्। निष्कलङ्को निरञ्जनो निर्विकल्पो निराख्यातश्शुद्धो देव एको नारायणो **न द्वितीयोऽस्ति कश्चित्**। (ना.अ.शि.उ.२)

[7] ङ - तथा सति

[8] देवो ह वै प्रजापतिमब्रुवन्निममेव नो भगवन्नोङ्कारमात्मानमुपदिशेति तथेति **उपद्रष्टानुमन्तैष आत्मा**, **नृसिंहः चिद्रूप एव**, **अविकारो ह्युपलब्धः** सर्वस्य सर्वत्र **न ह्यस्ति द्वैतसिद्धिरात्मैव सिद्धोऽद्वितीयो** मायया ह्यन्यदिव स वा एष आत्मा पर एषैव सर्वम्। (नृ.उ.ता.९)

तादधीन्यश्रवणेनोपलब्धेरनन्याधीनत्वं सिद्धम्। किमेवमनन्याधीनासंकुचितज्ञानवानन्योऽपि अस्तीत्यत्राह - '**न ह्यस्ति**' इत्येवं जातीयकद्वितीयं नास्तीत्यर्थः। '**आत्मैव सिद्धोऽद्वितीय**' इत्युपसंहारः। देवतान्तरस्यापि सार्वज्ञ्यं प्रसिद्धमित्यत्राह - [1]'**मायया ह्यन्यदिव**' इति। लीलापरवशस्य भगवतो मायया देवतान्तरस्य सार्वज्ञ्यप्रसिद्धिरिति भावः। यद्वा '**अविकारो ह्युपलब्धा**' इति नृसिंहस्यासाधारणं रूपमुक्त्वा किं तदतिरिक्तस्य कृत्स्नस्याप्यचित्त्वमचेनत्वं चेत्यत्राह '**न ह्यस्ति द्वैतसिद्धिः**' इति **द्वैतम्** - वैजात्यं नास्तीत्यर्थः। चित्त्वचेतनत्वे सर्वसाधारणे इति भावः। किं तर्ह्यचिद्रूपमचेतनञ्च किमपि नेत्यत्राह - '**आत्मैव सिद्धोऽद्वितीय**' इति। अचिदात्मकाचेतनदेहात्माध्यासे निमित्तमाह - '**मायया**' इति। किञ्च पूर्वभागेनोत्तरभागेऽपि कारणवाक्यप्रभृतिद्वैतवाक्यैश्च प्रपञ्चस्यैव [2]प्रपञ्चनात् कथं तन्निषेधः, प्रामाण्याविशेषात्। न च क्वचित् तद्वति तत्प्रकारकज्ञान-जनकत्वम्, क्वचित् तत्त्वावेदकत्वमिति वैषम्यं संभवति, अपौरुषेयत्वस्वतः प्रामाण्याभ्यामेकरूपप्रामाण्यस्यैव समर्थनात्।

ननु प्रपञ्चविधिनिषेधयोः परस्परविप्रतिषेधेन तुल्यरूपप्रामाण्यासंभवात् [3]'**अपच्छेदन्यायेन**' अद्वैतवाक्यानामेव प्राबल्यात् तत्त्वावेदकत्वं वाच्यमिति चेन्न। [4]तद्वत्त्वे तदभावानुपपत्त्या प्रपञ्चप्रतिपादकस्यापि तत्त्वावेदकत्वस्यैव वाच्यत्वात्। विप्रतिषेधः चाद्वैतश्रुतीनां विशिष्टाद्वैतस्वारस्यादेव परिहृतः। अपि च नायमपच्छेदन्यायस्य विषयः।

तथा हि - अयमपच्छेदन्यायः किं क्लृप्तप्रामाण्याविरोधेन[5] एव प्रवर्तितुं क्षमते, उत तद्विरोधेनापि। आद्ये, नात्रापच्छेदन्यायप्रवृत्तिसंभवः, शुक्तिरजतवाक्यव्यावृत्तस्य तत्त्वा-वेदकत्वलक्षणप्रामाण्यस्य वेदमात्रे प्रागवगमेन तद्बाधप्रसङ्गात्। द्वितीये निरधिष्ठान-

---

[1] नृ.उ.ता.उ.९

[2] क, ख - प्रपञ्चात्

[3] **अपच्छेदन्यायः** - तदिदं शास्त्रद्वयं विषयः। अत्र उद्गातृप्रतिहर्त्रोः प्रयोगभेदेनापच्छेदे स्वं स्वं प्रायश्चित्तशास्त्रं प्रवर्तते। एकस्मिन् प्रयोगे यौगपद्येनापच्छेदे सति उद्गातुः प्रायश्चित्तं प्रवर्तते, तस्य वर्गप्रधानत्वात्। प्रधानापच्छेदस्यैव समाधेयत्वात्, विकल्पेनानुष्ठानं वा। एकस्मिन्नेव पौर्वापर्येणापच्छेदे पूर्वस्य प्रायश्चित्तशास्त्रस्य दौर्बल्यं परस्य प्राबल्यं च कर्ममीमांसायामुक्तम्। 'पौर्वापर्ये पूर्वदौर्बल्ये प्रकृतिवत्' इति। (श्रु.प्र.१-८६; वि.को.१)

[4] ङ - तद्वत्त्वेन

[5] ख, ङ - प्रामाण्यविरोधेन

वादस्य[1] एव प्राबल्यप्रसङ्गात्। किञ्च भेदवाक्यजन्यज्ञानस्यातात्विकार्थविषयत्वं दोषजन्यत्वादेव[2] वाच्यम्।

न च वेदवाक्ये वाक्यदोषतया क्लृप्तभ्रमादिमूलत्वमस्ति, अपौरुषेयत्वात्। अतोऽपच्छेदन्यायसहस्रेणापि कथमतत्त्वविषयत्वापादनम्? अपि च क्रमेणापच्छेदे [3]'**उपक्रमन्यायः**' कथं न प्रवर्तते? परत्वात् प्राबल्ये कथमुपक्रमन्यायानुत्सादः? अतो न्यायद्वयस्य मिथो व्याघाते सतीत्थमिह निर्णयः कार्यः अनुपसंजातविरोधितया पूर्वस्मादर्थ-प्रतीतौ सत्यामुपसंहारस्योत्पत्तिदशायामेव संदेहावष्टब्धत्वात् पूर्वनिर्णयानुसारेणोत्तरार्थ-निर्णयः कार्य इति अयमुपक्रमन्यायः। नैमित्तिकशास्त्रद्वयार्थबोधदशायां तच्छास्त्रयोः पौर्वापर्याभावात् नोपक्रमन्यायस्य तत्र प्रवृत्तिः। ततश्च प्रयोगविशेषपर्यालोचनया विरुद्धयोर्नैमित्तिकयोः किमनुष्ठेयमिति विशये नैमित्तिकानुष्ठानकालं प्रति संनिहितत्वात् द्वितीयनिमित्तहेतुकमेव कर्तव्यम्। अत उत्तरकाले प्रतिहर्त्रपच्छेदाभावे उद्गात्रपच्छेदे इत्थं कर्तव्यम्, उत्तरकाले उद्गात्रपच्छेदाभावे प्रतिहर्त्रपच्छेदे इत्थं कर्तव्यमिति प्रायश्चित्त-शास्त्रार्थ इष्यते।

---

[1] ङ - वाक्यस्य

[2] ग, ङ - विषयत्वे दोषजन्यत्वम्

[3] **उपक्रमः उपसंहारात् प्रबलः** - (प्रथमातिक्रमणे मानाभावः इति न्यायमूलोऽयम्) उपक्रमः उपसंहारात् प्रबलः, असंजातविरोधित्वात्। उपक्रमस्य यत्र नाकाङ्क्षा, तत्र तद्विरुद्धार्थो-पस्थापकोपसंहारप्रसंगानुसरणं न क्रियते। उपक्रमस्य वेदविषयत्वेन निश्चित्वात् उपसंहार-गतानां ऋगादिशब्दानां तदनुरोधवृत्तिता युक्ता। उपक्रमस्य सन्देहजनकत्वे उपसंहारो निर्णयहेतुः। (मी.को; वि.को.७)

२. प्रपञ्चमिथ्यात्वभङ्गः

अयमपच्छेदन्यायः [१]पूर्वाबाधेनेत्यत्र पूर्वनैमित्तिककर्तव्यताबुद्धिः नैमित्तिकानुष्ठान-कालयोर्मध्ये द्वितीयनैमित्तिककर्तव्यताबुद्ध्युत्पत्या पूर्वकर्तव्यताबुद्धेः व्यवधानम्, इतोऽतिरिक्तबाधानिरूपणात् [२]उपक्रमन्यायानवष्टम्भसिद्धेः च। यद्युत्तरस्य पूर्वनाशकत्वं तत्प्रकृतेऽसंभवि पूर्वज्ञानस्यान्यत एव निवृत्तेः। तमसश्चालोकानिवर्तकस्यैवोत्पत्तिर्दृश्यते। यदि भाविज्ञानप्रतिबन्धः, तदा पूर्वेणोत्तरस्य प्रतिबन्धप्रसङ्गः। यदि पूर्वज्ञानं प्रत्युत्तर-ज्ञानस्याप्रामाण्यापादकत्वं बाधकत्वं तदा चन्द्रैकत्वज्ञानोत्तरभाविनोऽङ्गुल्यवष्टम्भजनित-द्विचन्द्रज्ञानस्य बाधकत्वप्रसङ्गः। तस्मादनुष्ठानपर्यालोचनानिमित्तवाक्यार्थनिर्णयस्थल एवापच्छेदन्यायः प्रवर्तत इति नेह तत्प्रवृत्तिः। अत उपक्रमन्याय एवात्र प्रवर्तते। एतेन सगुणवाक्यानां निर्गुणवाक्यैर्बाध इत्यपि निरस्तम्।

यदाह - कश्चिदुपक्रमन्याय एकवाक्यविषय[३] एवेति, तन्न। न हि मीमांसायाश्चरणौ कश्चिन्निगलयितुं समर्थः, तर्ह्यपच्छेदन्यायविषये कथमुपक्रमन्यायो न [४]संगच्छति इति चेन्न, तत्रोपक्रमोपसंहारभावासिद्धेः। न हि प्रायश्चित्तशास्त्रस्य पाठक्रमस्तन्निबन्धनविरोधशङ्का [५]च अस्ति। यश्च क्रमेण निमित्तोत्पत्तौ नैमित्तिकशास्त्रोत्पत्तिक्रमः, सोऽप्यनियतः, निमित्तयोः क्रमस्य वैकल्पिकत्वात्।

---

[१] **पूर्वाबाधेन नोत्पत्तिरुत्तरस्य हि सिद्ध्यति** - (शास्त्रीयन्यायविशेषः) एकस्मिन्नेव पौर्वापर्येणापच्छेदे पूर्वस्य प्रायश्चित्तशास्त्रस्य दौर्बल्यं परस्य प्राबल्यञ्च कर्ममीमांसायामुक्तम्, 'पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्' इति। अत्रासञ्जातविरोधित्वेन पूर्वमुदयात् पूर्वस्य प्राबल्यं, परस्य सप्रतिपक्षतयैवोदयात् दौर्बल्यमिति पूर्वपक्षः। राद्धान्तस्तु - पूर्वस्योत्पत्तिकाले विरोध्यभावात् तदबाधेनाप्युदयः संभवति, उत्तरस्य तु स्वोत्पत्तिकाले विरोधिसद्भावात् तदबाधेनोत्पत्त्युपपत्त्या पूर्वं बाधित्वैवोत्पन्नं इत्यनन्यथासिद्धत्वादुत्तरस्य प्राबल्यमिति। पूर्ववाक्येन नोत्पत्तिरुत्तरस्य हि सिद्ध्यति इति हि न्यायविदः। अनेनैव वाक्येन सगुणवाक्यानां बलीयस्त्वं सिद्ध्यति। (श्रु.प्र.१.प्र.भा.१.८३; श्रीभाष्यदशव्याख्या.पृ.५००/६७; वि.को-७)

च - कोशे - पूर्वम् परमजातत्वादबाधित्वैव जायते, परस्परान्यथोत्पादात् पूर्वबाधेन संभव इत्यधिकः पाठः।

[२] ग -उपक्रमस्यावष्टम्भासिद्धेः; ङ - उपक्रमन्यायानवष्टम्भासिद्धेः;

च, ज - उपक्रमन्यायविषयस्यापच्छेदन्यायावनष्टम्भासिद्धिप्रसंगात्

[३] ग - वाक्यताविषयः

[४] क, ख, ग, घ, च, छ - संगच्छेत्; ङ - गच्छति

[५] ग, ङ - वा

ननु तर्हि सगुणनिर्गुणवाक्ययोः कथमुपक्रमन्यायप्रवृत्तिः? पाठक्रमाभावादिति चेत् उच्यते - परेण प्रसक्तिपूर्वकत्वान्निषेधस्य सगुणवाक्यानां प्रसञ्जकत्वस्य [१]अनुवादाभावेन निषेधासंभवेनानुवादकत्वस्य वाङ्गीकारेण तदुक्तनियतपौर्वापर्यानुसारेणोपक्रमन्याय-प्रवृत्तिरुक्ता। पाठक्रमोऽपि नियतपौर्वापर्यहेतुतयैव प्रयोजकः। एकवाक्यविषयत्वेऽपि भेद-वाक्यानां निषेधप्रतियोग्युपस्थापनार्थतायाः परैरेवाङ्गीकारेणैकवाक्यतासिद्धेरुपक्रमन्यायः प्रवर्तत एव। कथं तर्हि सगुणनिर्गुणवाक्यानां [२]मिथो विरोधपरिहारः? [३]उत्सर्गापवादन्यायेन सामान्यनिषेधस्य विहितगुणविशेषव्यतिरिक्तविषयत्वादिति ब्रूमः।

ननु निर्गुणवाक्यस्य संकोचे यस्मात् संकोचस्तत्र न कथञ्चिदपि प्रामाण्यम्। निर्गुणवाक्येन सगुणवाक्यबाधे सगुणवाक्यानां व्यावहारिकविषयतया प्रामाण्यात् निर्गुण-वाक्यस्य संकोचात् सगुणवाक्यस्य बाध एव न्याय्यः। [४]अहिंसावाक्यस्य तु बाधे न कथञ्चिदपि प्रामाण्यम्, अतो [५]न निषेधसंकोच इति चेन्न, सगुणवाक्यानां बाधे उत्सर्ग-प्राप्ततत्त्वावेदकत्वाभावप्रसङ्गात्। निर्गुणवाक्यानां संकोचे तु यस्मात् संकोचः तदन्यनिषेधे तत्त्वावेदकत्वमेव। तत्त्वावेदकत्वं यदि न औत्सर्गिकम्[६] तदा निर्गुणवाक्यानां कुतस्तत्त्वावेदकता। अतस्सर्ववाक्यानां तत्त्वावेदकत्वाङ्गीकार एव ज्यायान्। तस्मात् सर्वप्रामाण्यसिद्धये किञ्चित् पदमात्रस्य संकोचस्सोढव्यः।

यच्चेदमुच्यते - सगुणवाक्यानामुपासनार्थत्वात् [७]न निर्गुण वाक्यसंकोचो युक्त इति, तन्न। [८]'**तमेवं विद्वानमृत इह भवति**' इति [९]सगुणोपासनस्य मोक्षसाधनत्वश्रवणेन[१०]

---

[१] ग, ङ - अनुवादाभावे

[२] ज - परस्पर

[३] उत्सर्गापवादन्यायः - उपात्तविशेषव्यतिरिक्तविषये सामान्यशब्दस्य विरोधपरिहाराय संकोचपरः (श्रु.प्र; वि.को.३)

[४] ग, घ, ङ - हिंसा

[५] ख, ग, च - निषेधसंकोच

[६] ख - औत्सर्गिकत्वम्

[७] क - न गुण ; ग, ङ - निर्गुण

[८] पु.सू.१७

[९] ख - सगुणोपासकस्य

[१०] ग - साधनताश्रवणेन

२. प्रपञ्चमिथ्यात्वभङ्गः

[१]‘**स्वाभाविकी ज्ञानबलक्रिया च**’ इति श्रुत्या च [२]गुणानां तात्त्विकत्वावगमात्। अतात्विकोपासनेनापि मोक्षसिद्धौ निर्गुणवाक्यस्यैवातात्विकोपासनपरता किं न स्यात्।

यदुक्तमत्रापि - [३]‘**पुरुष एवेदम्**’ इति प्रस्तुतसार्वात्म्यमेवं शब्दार्थः, विराडादि प्रपञ्चसृष्टेस्तदर्थमेवाभिधानात्। तच्च सार्वात्म्यं [४]जडप्रपञ्चस्य परमार्थत्वे चिद्रूपात्मनो वस्तुतः [५]तादात्म्यत्वायोगात् मिथ्याप्रपञ्चस्याधिष्ठान ब्रह्ममात्रतया परिशेषादेव भवति। अन्यथा प्रस्तुतपृथिव्यादिज्ञानस्यापि मुक्तिहेतुत्वाभिधाने ‘तमेव’ इति एवकारविरोधादिति, तन्न। किं पुरुष एवेति [६]अधिष्ठानत्वप्रयुक्तं सर्वतादात्म्यमेव प्रतिपाद्यते? किं वा सार्वात्म्योपपादकं [७]सर्वाधिष्ठानत्वसिद्धं सर्वाभावस्वरूपम्? आद्ये तत्त्वावेदकत्वं न स्यात्। तस्यैव [८]‘**एवं विद्वान्**’ इति परामर्शात्, अतत्त्वज्ञानान्मोक्षश्च। द्वितीयेऽनेन वाक्येन ब्रह्मस्वरूपे कस्यचित् विशेषणस्य अप्रतिपन्नत्वे[९] एवमिति परामर्शासंभवः। स्वरूपमात्र-परामर्शश्च तमित्येव सिद्धः। अशक्यश्च प्रकारवाचिनैवंशब्देन स्वरूपपरामर्शः। किञ्चैवं-शब्देन न सार्वात्म्यमात्रपरामर्शो युक्तः, कारणत्वज्यायस्त्वादीनामपि [१०]प्रकृततया परामर्शस्यावश्यकत्वात्। न च कारणत्वादीनां सार्वात्म्यशेषतयोपदेशेन तस्यैव प्राधान्यात् तन्मात्रपरामर्शो युक्त एवेति वाच्यम्, कारणत्वस्य सार्वात्म्यशेषत्वासिद्धेः। न हि सर्वोपदेशस्सर्वाभावरूपतादात्म्योपपादकः। यत्तु श्रुत्यन्तरे [११]‘**तमेव विदित्वातिमृत्युमेति**’ इत्यत्र एवकारविरोध इति, तन्न।

---

[१] न तस्य कार्यं करणञ्च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते।
परास्य शक्तिर्विविधैव श्रूयते **स्वाभाविकी ज्ञानबलक्रिया च**।। (श्वे.उ.६.८)

[२] ख - सगुणानाम्

[३] **पुरुष एवेदँ सर्वं** यद्भूतं यच्च भव्यम्। उतामृतत्वस्येशानो यदन्नेनातिरोहति।। (श्वे.उ.३.१५)

[४] ङ - जडस्यापरमार्थत्वेन

[५] क, घ - तदात्मत्वायोगात्; ग - तादात्मकत्वायोगात्

[६] क, ग - अधिष्ठानप्रयुक्तम्

[७] ग, ङ - सर्वाधिष्ठानसिद्धम्; ज - सर्वाधिष्ठानत्वम्

[८] धाता पुरस्ताद्यमुदाजहार। शक्रः प्रविद्वान् प्रदिशश्चतस्रः।
तमेवं विद्वानमृत इह भवति, नान्यः पन्था अयनाय विद्यते।। (पु.सू.१७; नृ.पू.ता.उ१.६)

[९] घ, ङ - अप्रतिपन्नत्वेन

[१०] ग - प्रकृतितया

[११] वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्।
तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय।। (श्वे.उ.३.८)

सजातीयदेवतान्तरस्यैव निषेधात् प्रकृतकारणत्वादिगुण-विशिष्टस्यैव ब्रह्मणस्तत्र तच्छब्देन परामर्शात्।

यदपीदमुच्यते - निर्गुणवाक्येन गुणनिषेधार्थं गुणानां सगुणवाक्यैरनुवाद इति। तदपि न, घटो नास्तीत्यादौ घटपदस्यैव निषेधार्थानुवादकत्वाप्रतीतेः। तदप्रतीतावपि निषेधार्थानुवादकत्वाङ्गीकारे ब्रह्मस्वरूपपरवाक्यानामपि नेति नेतीति [१]निषेधार्थानुवादता किं न स्यात्। न च ब्रह्मणोऽप्राप्तत्वादनुवादासंभवः, सार्वज्ञ्यादावपि तथात्वात्। कारणत्वोपदेशाक्षिप्तसार्वज्ञ्यादेरनुवादे[२] क्षित्यादिकार्यत्वाक्षिप्तब्रह्मस्वरूपानुवाद इति किं न स्यात्? अन्यथा कारणत्वश्रुतेर्निषेधार्थानुवादत्वासंभवात्।

ननु मा भूत् गुणश्रुतिरनुवादः, किन्तु विधिरेव। एवञ्च निषेधस्य प्रसङ्ग-साकाङ्क्षतया[३] गुणविधायकानामपि निषेध्य गुणप्रसञ्जनमुखेन निषेधतात्पर्यकतया निषेधकवाक्यैकवाक्यत्वेन तत्त्वावेदकत्वमिति चेन्न, पश्वालम्भनवाक्यस्यापि प्रसञ्जकत्व-प्रसङ्गात्। प्रसञ्जकान्तरसद्भावस्तूभयत्र तुल्यः। व्यर्थहिंसाया इवात्रापि हेयगुणानां प्रसक्तत्वात्। हेयगुणप्रसक्तिः[४] च [५]आत्मत्वादिसाधारणधर्मात् सार्वज्ञ्यादीनामप्रसक्तत्वात्, तत्प्रसक्त्यर्थं सगुणवाक्यमिति। यदि तदाग्नीषोमीयपश्वालम्भनस्य[६] अप्रसक्तत्वात् तत्प्रसक्त्यर्थं तद्वाक्यमित्यपि तुल्यम्। सार्वज्ञ्यादिकं कारणत्वेन प्रसक्तमिति त्वयैवाभि-हितञ्च। किञ्च यदि सार्वज्ञ्यादिकमप्रसक्तं तर्हि [७]'**प्रक्षालनाद्धि**' इति न्यायेनाप्रसञ्जनमेव वरम्। तस्मान्न निषेधैकवाक्यत्वसंभव इति।।

इति अद्वैतविद्याविजये प्रपञ्चमिथ्यात्वभङ्गः

---

[१] ज - निषेधार्थानुवादकता

[२] ग, ङ, च, ज - सार्वज्ञादेरिव

[३] ज - सापेक्षतया

[४] ग - प्रसक्तेः; ङ - प्रसक्तः

[५] ख - आत्मगुणत्वादि

[६] ख, घ, च, छ - पश्वालम्भस्य

[७] **प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्** (लौकिकन्यायः) यथा पङ्कोपलेपतत्क्षालनादपि तदस्पर्शो वरम्, तथा अपूर्वभ्रमान्तरारोपणतन्निषेधादपि मौनमेव वरम्। न हि पङ्कोपलेप-तत्क्षालनाऽऽयासस्य प्रयोजनं विद्यते। एवं अपूर्वभ्रमारोपणतन्निषेधाऽऽयासस्याप्रयोजनत्वात्, शास्त्रस्य प्रयोजनपर्यवसायित्वं न स्यादिति, बुभुत्सितग्राह्यं शास्त्रमनारम्भणीयमिति भावः। (वेदार्थ-संग्रहे तात्पर्यदीपिकायाम् - श्रुतप्रकाशिकाचार्यसुदर्शनभट्टकृता (पृ.७८-७९; पञ्चतन्त्रे.२.१५.७)

३. जीवेश्वरैक्यभङ्गः

यच्च जीवब्रह्मणोरभेदेन ब्रह्मव्यतिरिक्तमिथ्यात्वोपपादनम्, तन्न, अभेदे प्रमाणाभावात्, ननूक्तमनुमानम्। श्रुतिश्च बृहदारण्यके चतुर्थेऽध्याये चतुर्थे ब्राह्मणे [1]'**इदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमानि भूतानीदं सर्वं यदयमात्मा**' इति। पञ्चमे ब्राह्मणे - [2]'**तेजोमयोऽमृतमयः पुरुषः अयमेव सः योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्वम्**' इति। कैवल्योपनिषदि -

[3]'**स एव मायापरिमोहितात्मा शरीरमास्थाय करोति सर्वम्**
स्त्र्यन्नपानादिविविक्तभोगैस्स एव जाग्रत्परितृप्तिमेति।
स्वप्ने स जीवः सुखदुःखभोक्ता स्वमायया कल्पितजीवलोके।
सुषुप्तिकाले सकले विलीने तमोऽभिभूतः सुखरूपमेति।
पुनश्च जन्मान्तरकर्मयोगात् स एव जीवः स्वपिति प्रबुद्धः।
पुरत्रये क्रीडति यस्स जीवः ततस्सुजातं सकलं विचित्रम्।।
आधारमानन्दमखण्डबोधं यस्मिल्लयं याति पुरत्रयञ्च।।
एतस्माज्जायते विश्वं मनः सर्वेन्द्रियाणि च।
खं वायुर्ज्योतिरापश्च भूमिः विश्वस्य धारिणी।।
यत्परं ब्रह्म विश्वात्मा विश्वस्यायतनं महत्।
सूक्ष्मात् सूक्ष्मतरं नित्यं तत्त्वमेव त्वमेव तत्' इति ।

माण्डूक्योनिषदि -

[4]'**अनादिमायया सुप्तो यदा जीवः प्रबुध्यते।**

---

[1] ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद। क्षत्रं तं परादाद्योऽन्यत्रात्मनः क्षत्रं वेद। लोकास्तं परादुर्योऽन्यत्रात्मनो लोकान् वेद। देवास्तं परादुर्योऽन्यत्रात्मनो देवान् वेद। भूतानि तं परादुर्योऽन्यत्रात्मनो भूतानि वेद। सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद। **इदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमानि भूतानीदं सर्वं यदयमात्मा**। (बृ.उ.४.४.६; बृ.उ.६.५.७)

[2] बृ.उ.४.५.१-१४

[3] कै.उ.१२-१६

[4] मा.उ.२.५.१६-१८.

अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा।।
प्रपञ्चो यदि विद्येत निवर्तेत न संशयः।
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः।।
विकल्पो विनिवर्तेत कल्पितो यदि केनचित्।
उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते'

इति भेदे च न किञ्चित्प्रमाणम्। तथाहि - न तावत् प्रत्यक्षं प्रमाणं, चक्षुरादेरसंभवात्। मन इति चेत्,

[१]'**न प्रमाणं [२]मनोऽस्माकं अयोग्यानुपलब्धिकम्।**
सोपाधिकस्थो भेदोऽयं नाध्यक्षमिति गोचरः।।'

मनो न प्रमाणम्, प्रमाणसहकारित्वादालोकवत्। विपक्षे सर्वत्र मानसत्वापत्तिः, एकप्रमाण-परिशेषापत्तिश्च। सन्निकर्षाभावाच्च भेदे न मनः प्रमाणम्। संयुक्तविशेषणता सन्निकर्ष इति चेन्न, निरवयवात्मनस्संयोगाभावात्, तस्याव्याप्यवृत्तित्वात्।

न चात्र प्रत्यक्षसहकारिणी योग्यानुपलब्धिरस्ति, प्रत्यक्षयोग्यस्यानुपलब्धिर्हि सा। प्रतियोगितद्व्याप्येतरसकलप्रतियोग्युपलम्भकसमवधानस्थलीयानुपलब्धिः सेति चेत्, सापि प्रत्यक्षयोग्यस्यैव संभवति, यतः प्रतियोग्युपलम्भकं प्रतियोगिप्रत्यक्षजनकमेव वाच्यम्। न च नाहमीश्वर इति प्रतीतिसमये प्रतियोग्युपलम्भकसमवधानमस्ति। तत्कालीनमनादेः तदयोग्यत्वात्।

न च यत्र यत्सत्त्वमनुपलब्धिविरोधीत्यादियोग्यानुपलब्धिनिर्वचनं युक्तम्, असता प्रतियोगिसत्त्वेन विरोधानिरूपणात्। अत एव तर्कितं यत्र यत्सत्त्वमनुपलब्धिविरोधीत्यादि अपि निरस्तम्। न च यत्र यत्सत्त्वापादनेनानुपलम्भाभावापादयितुं शक्यते तत्र तदभावः प्रत्यक्ष इति वाच्यम्, आपादनशक्तिर्हि व्याप्तिज्ञानसाहित्यमेव प्रतियोगिसत्त्वापादनस्य वाच्यम्। तथा चाभावधीपूर्वं नियमेन तत्सत्त्वे व्यतिरेकव्याप्तिज्ञानादनुमितिरेव स्यात्।

अस्तु वेयं सहकारिणी, न सातीन्द्रियभावे संभवति। मनस्त्वादेर्घटे तर्कितस्य तद्व्यापकाणुत्वापादनेनानुपलम्भाविरोधित्वात्। [३]'**श्रोतव्यो मन्तव्यः**' [१]'**आचार्यवान्**

---

[१] ग, ङ, च - अप्रमाणम् (नृसिंहाश्रममुनेः भेदधिक्कारे.६,पृ.१२,१३)

[२] च - मनोऽसक्तम्

[३] आत्मा वा अरे द्रष्टव्यः **श्रोतव्यो मन्तव्यो** निदिध्यासितव्यः।
मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदँ सर्वं विदितम्।। (बृ.उ.४.४.५)

पुरुषो वेद' इत्याद्युपदिष्टसहकार्यभावाद्वा [2]'**अनृतेन हि प्रत्यूढा**' इत्युपदिष्टप्रतिबन्धकाद्वा अनुपलम्भसंभवान्नोक्तयोग्यानुपलब्धिः। किञ्च [3]'**यन्मनसा न मनुते**, [4]'**तं त्वौपनिषदम्**' इत्यादिश्रुत्या वेदैकगम्यं ब्रह्मेति न मनसानुपलम्भाद्धर्मवत् तदभावसिद्धिः। किञ्च किमिदम् ईश्वरत्वम्? यद्विशिष्टाभेदानुपलम्भात् भेद उच्यते। न तावत् द्व्यणुकादिकर्तृत्वम्, तद्विशिष्टस्यातीन्द्रियत्वेन सतोऽपि तदभेदस्यानुपलम्भसंभवात्। नापि सर्वज्ञत्वम्, योगिनां स्वज्ञाने [5]सर्वविषयकत्वभ्रमवतश्च ईश्वरभेदप्रतीत्यनुपपत्तेः। नापि नित्यसर्वज्ञानवत्त्वम्, स्वनित्यताया इव ज्ञाननित्यताया अप्ययोग्यत्वेन तद्विशिष्टाभेदे योग्यानुपलब्ध्यसिद्धेः। किञ्चाणुत्वे आत्मनस्सर्वशरीरव्यापि सुखानुपपत्तेः, मध्यमपरिमाणत्वे चानित्यत्वापत्तेः, आत्मा विभुः, तस्य चाहमिह एवेति [6]भासमानः परिच्छेदः औपाधिको वाच्य इत्युपाधि-संसर्गे सिद्धे, भेदोऽप्यौपाधिक इति न तस्य सत्यत्वम्। नापि श्रुतिः - तथाहि,

[7]'**मानान्तरप्रसिद्धत्वान्मिथ्यात्वादप्रयोजनात्।**
श्रुत्यन्तरविरोधाच्च न श्रुतिर्भेदगोचरा।।'

आत्मा वा अरे द्रष्टव्यः **श्रोतव्यो मन्तव्यो** निदिध्यासितव्यः।
मैत्रेय्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदँ सर्वं विदितम्।। (बृ.उ.६.५.६)

[1] तस्य यथाभिनहनं प्रमुच्य प्रब्रूयादेतां दिशं गन्धारा एतां दिशं व्रजेति स ग्रामाद्ग्रामं पृच्छन् पण्डितो मेधावी गन्धारानेवोपसंद्येतैवमेवेह **आचार्यवान् पुरुषो वेद** तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इति। (छा.उ.६.१४.२)

[2] अथ ये चास्येह जीवा ये च प्रेता यच्चान्यदिच्छन्न लभते सर्वं तदत्र गत्वा विन्दते अत्र ह्यस्यैते सत्याः कामा अनृतापिधानास्तद्यथापि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि सञ्चरन्तो न विन्देयुरेवमेव इमाः सर्वाः प्रजाः अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति, **अनृतेन हि प्रत्यूढाः**। (छा.उ.८.३.२)

[3] **यन्मनसा न मनुते** येनाहुर्मनो मतम्। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते।। (के.उ.१.५)

[4] स एष नेति नेत्यात्मा। अगृह्यो न हि गृह्यते। अशीर्यो न हि शीर्यते। असङ्गो न हि सज्यते। असितो न व्यथते न रिष्यति। एतान्यष्टावायतनान्यष्टौ लोका अष्टौ देवा अष्टौ पुरुषाः, स यस्तान्पुरुषान्निरुह्य प्रत्युह्यात्यक्रामत्, **तं त्वौपनिषदं** पुरुषं पृच्छामि, तं चेन्मे न विवक्ष्यसि मूर्धा ते विपतिष्यतीति। तस्य ह मूर्धा विपपात। (बृ.उ.५.९.२६)

[5] ग, ङ - सर्वविषयत्व

[6] ङ - प्रतीयमानः

[7] नृसिंहाश्रममुनेः भेदधिक्कारे.१०,पृ.४८

अस्ति हि पामराणामपि नाहमीश्वर इति भेदप्रत्यक्षमनुभवसिद्धेऽर्थे च न श्रुतितात्पर्यम्। किञ्चाहमर्थे प्रतीयमाने भेदस्योक्तरीत्या परिच्छिन्नत्वप्रतिभासानुरोधेन सोपाधिकतया मिथ्यात्वेन न तत्र तत्त्वावेदकश्रुतितात्पर्यम्।

किञ्च[१] भेदज्ञानात् अनवद्यपुमर्थाभावेन[२] तस्य तत्परश्रुतिजन्यत्वायोगश्च। प्रत्युत [३]'**उदरमन्तरं कुरुते, अथ तस्य भयं भवति**' इत्यादिना विपरीतफलमेव श्रूयते। किञ्च [४]'**नान्योऽतोऽस्ति द्रष्टा**' इत्यादिश्रुतिभिरनधिगताबाधितप्रयोजनवद्भेदाभावस्य जीवे प्रतिपादितत्वाच्च, न भेदस्सत्यो न वा श्रुत्यर्थः। यदुच्यते - [५]'**द्वा सुपर्णा**' इति श्रुतिः जीवेश्वरभेदे प्रमाणमिति, तन्न, तस्याः श्रुतेस्सत्वक्षेत्रज्ञपरत्वेन पैङ्गिरहस्ये[६] व्याख्यातत्वात् इति। अत्रोच्यते न तावदात्मत्वहेतुरभेदे प्रमाणमप्रयोजकत्वात्।

ननु भेदस्तावत् दुर्वचः, यदाह नवीनः - किमन्योऽन्याभावो भेदः, उत वैलक्षण्यमथवा स्वरूपम्। नाद्यः, तत्प्रतियोगिधर्मिज्ञानानामसंभवात्। तत्र न तावत् घटः प्रतियोगि, घटात्यन्ताभावघटान्योऽन्याभावयोरभेदप्रसङ्गात्। संबन्धिनिरूप्यस्वभावानां समानकालीनानां संयोगादीनां संबन्धिभेदेनैव भेददर्शनात्। किञ्च भेदो ह्यभेदविरोधी। तस्मात् भेदोऽभेदस्यैव अभावः स्यात् न घटस्य। न च घटादिरेवाभेदः, घटाधिकरणे घटभेदाभावप्रसङ्गात्। नापि तादात्म्यं प्रतियोगि। तद्धि घटस्वरूपं वा, घटत्वं वा अभेदो

---

[१] ग - किञ्चाहमर्थे प्रतीयमानभेदस्य

[२] ख, ग - अनवद्यपुरुषार्थाभावेन

[३] यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते अथ सोऽभयं गतो भवति। यदा ह्येवैष एतस्मिन् **उदरमन्तरं कुरुते, अथ तस्य भयं भवति** तत्त्वेव भयं विदुषो मन्वानस्य तदप्येष श्लोको भवति। (तै.उ.२.७)

[४] यो रेतसि तिष्ठन् रेतसोऽन्तरो यँ रेतो न वेद, यस्य रेतश्शरीरं यो रेतोऽन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः। अदृष्टो द्रष्टा अश्रुतश्श्रोता अमतो मन्ता अविज्ञातो विज्ञाता **नान्योऽतोऽस्ति द्रष्टा**, नान्योऽतोऽस्ति श्रोता, नान्योऽतोऽस्ति मन्ता, नान्योऽतोऽस्ति विज्ञाता। (बृ.उ.५.७.२७)

[५] **द्वा सुपर्णा** सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति।। (श्वे.उ.४.६; मु.उ.३.१.१)

[६] **पैङ्गिरहस्ये** 'तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्त्वम्। अनश्नन्नन्योऽभिचाकशीति ज्ञः। तावेतौ सत्व-क्षेत्रज्ञौ' इति। ननु तत्रापि सत्त्वशब्दो जीवं क्षेत्रज्ञशब्दः परमात्मानमभिदधातीति चेत्, 'तदेतत् सत्वम्। येन स्वप्नं पश्यति, अथ योऽयं शारीर उपद्रष्टा स क्षेत्रज्ञ' इति सत्वक्षेत्रज्ञपदयोरन्तःकरण-शारीरपरतया व्याख्यातत्वात्।

वा अखण्डधर्मो[१] वा। नाद्यः, परमते घटेऽपि तद्भेदप्रसङ्गात्, भेदस्य प्रतियोगि-सामानाधिकरण्यानुपपत्तेश्च।

न द्वितीयः, [२]तद्भिन्नस्य तादात्म्यत्वानुपपत्तेः, एतेन [३]घटात्यन्ताभाव एव घटभेद इति निरस्तम्। घटत्वस्य स्वाभावानधिकरणतया घटत्वे घटभेदानुपपत्तेश्च। अभावस्येव भावस्यापि विरुद्धत्वेन स्वाभावानधिकरणत्वात्। न च विरुद्धयोरैकाधिकरण्यमेव विरुद्धम्, न त्वाधाराधेयत्वमिति वाच्यम्, अभावे तदभावस्यापि क्लृप्तत्वात्। किञ्च अभावाधिकरणत्वयोग्यभूतलस्य घटाधारतादशायां तदभावानाधारत्वं [४]तदधिकरणत्वायोग्य घटाधारत्वप्रयुक्तमेव। घटत्वस्य भेदप्रतियोगित्वे घटत्वमिह नास्ति, अयं घटो नेति प्रतीत्योर्वैलक्षण्यानुपपत्तेश्च, भेदस्य घटप्रतियोगिकत्वानुपपत्तेश्च। अन्यप्रतियोगिकस्य अभावस्यान्यप्रतियोगिकत्वानुपपत्तेः। किञ्च यो यस्य यदभेदविरोधी स तस्य तस्माद्भेदः। तथा च घटधर्मिकपटाभेदविरोधी घटस्य पटाद्भेदः। स चाभेदो न वास्तव[५] इति तर्कितो वाच्यः। तथा च यत्र यदभेदे तर्किते यस्यानुपपत्तिः प्रसज्यते स तस्य तस्माद्भेदः। न च पटे घटत्वाभावः, पटे घटतादात्म्यस्य तर्कितस्य विरोधि। वृक्षस्याग्रत्वाभाव इव [६]तदधिकरणाभेदे अपि पटे घटत्वाभाव उपपत्तेः।

न तृतीयः, भेदतादात्म्ययोरन्योऽन्यज्ञानाधीनज्ञानतयान्योऽन्याश्रयात्। न चतुर्थः, शाब्दघटज्ञानाद्भेदज्ञानाभावप्रसङ्गात् तादात्म्यस्य च शब्दादनुपस्थितेः। जात्यतिरिक्ता-खण्डधर्माभ्युपगमे[७] तेनैव सर्वव्यवहारोपपत्तौ जातिविलोपप्रसङ्गाच्च। तादृशाखण्ड-तादात्म्यप्रतियोगिकाभावस्य घटाद्यप्रतियोगिकतया तद्भेदत्त्वानुपपत्तेश्च। न हि [८]अन्याभावः अन्यप्रतियोगिकः, एवं धर्म्यपि दुर्निरूपः। तथाहि -

---

[१] ग - भेदः

[२] अस्मिन् कोशे '**तद्भिन्नस्य**' इत्यस्य '**तद्भिन्नघटत्वस्य**' इत्यर्थः दृश्यते

[३] ग, घ - घटत्वात्यन्ताभाव

[४] ख - तदधिकरणयोग्य

[५] घ, ङ - वास्तविक

[६] ग, ङ - तदधिकरणभेदे; घ - तत्तत्प्रकरणाभेदे

[७] ङ - धर्माङ्गीकारे

[८] ङ - अन्यप्रतियोगिकाभावः

'यत्र प्रतीयते भेदः तदेव [१]अस्यास्पदं यदि।
अप्रतीतौ सुषुप्त्यादौ विश्वमेकं भवेत्तदा।
यदा कदाचिद्धिषणा तस्य स्थाननियामिका।
इति चेत् पुरुषेऽपि स्यात् तद्भेदस्तत्प्रतीतितः।
यत्र प्रमीयते भेदस्तदेवास्यास्पदं मतम्।
इति चेन्नूनमायातो दुष्टात्मान्योऽन्यसंश्रयः।।
यत्र यस्यास्ति सत्ता तज्ज्ञानं तत्र भवेत् प्रमा।
प्रमाधीनार्थसत्तायां नान्योऽन्याश्रयता कथम्।।'

अपि चैवं यदत्रास्ति तत्तत्रास्तीत्युक्तं स्यात्। क्वास्तीति प्रश्ने किमुत्तरम्। तथा चात्माश्रयः। किञ्च घटेऽपि घटभेदज्ञानं प्रमैव स्यात्, अबाधात्। न हि घटस्य [२]तस्य वा स्वरूपं कश्चित् [३]बाधते।

ननु तादात्म्यभेदज्ञानयोरुभयोरपि कथमबाधितत्वमिति चेदेवं सति भेदबाध एव अप्रमा अविनिगमो वा। ननु पटे घटभेदसंबन्धस्याबाधात् तत्र तद्धीः प्रमा। घटे तु घटभेदसंबन्धस्य बाधादप्रमेति चेन्न, पटेऽपि संबन्धान्तराभावात्, पटस्वरूपमेव संबन्धो न घटस्वरूपम्। अतो नाविनिगम इति चेत् तर्हि कुड्यादौ घटभेदो न स्यात्। तत्रापि कुड्यादिस्वरूपमेव संबन्धोऽस्तीति चेत्, तर्हि भेदप्रमाविषयवैशिष्ट्यस्याननुगतपटादि स्वरूपत्वे घटेऽपि [४]यथा ज्ञानं तदबाधितम्, इदं स्वरूपं संबन्ध इदं नेति नियामकाभावात्।

न च घटातिरिक्तस्वरूपमेव तत्संबन्धः। किमतिरेक स्वयं संबन्धबहिर्भूतः संबन्धात्मकं स्वरूपमुपलक्षयति। किं वा स्वयमपि संबन्धान्तर्गतः संबन्धात्मकस्वरूप-विशेषणं भवति। आद्ये घटस्वरूपमपि तद्भेदसंबन्ध स्यात्। नन्वतिरेकस्वसंबन्धिनमेवोप-लक्षयति, न च घटस्तत्संबन्धीति चेन्न, संबन्धस्यैवाद्याप्यनिरूपणात्, विशेषणत्वे च न स्वयमेव संसर्गः। घटेऽपि तत्प्रतीतेरबाधप्रसङ्गात्। द्वितीयश्चेत् तस्यापि नियताधिकरण-संसर्गो न स्वयमुक्तदोषात्। न च प्रथमः, नियाम्यस्य नियामकत्वायोगात्। तृतीयश्चेत्

---

[१] ख - अस्यास्पदम्; ग - अन्यास्पदम्
[२] अस्मिन् कोशे '**तस्य**' इत्यस्य '**तद्भेदस्य**' इत्यर्थः दृश्यते
[३] ख - बाध्यते
[४] ख - यदा

भेदेनानन्त्यम्। तत्र च प्रथमस्य कस्यचित् संसर्गाभावे तदधीनसंसर्गाणामन्येषां न संसर्ग इति, असंसर्गा एव सर्वे स्युरिति, [१]तद्विशिष्टज्ञानं घटे इव सर्वत्र भ्रान्तिस्तस्यापि वा प्रमा स्यात् सर्वेषां [२]तुल्यत्वात्।

ननु नान्योऽन्याश्रयादिः दोषः। न हि भेदो अभेदेन जन्यते न वा ज्ञायते। न च तदाश्रयत्वे [३]धर्मिणः [४]तदपेक्षा अनादिभेदाश्रयत्वस्यापि [५]अनपेक्षत्वात्। न च भेदाश्रयत्वज्ञाने पूर्वं भेदाश्रयत्वज्ञानं [६]अपेक्षते इत्यन्योऽन्याश्रय इति वाच्यम्, घटादेः घटभेदाश्रयत्वज्ञानाभावेऽपि तन्निष्ठस्य भेदस्य [७]प्रमितत्वात्।

न हि घटभेदज्ञाने [८]घटनिष्ठतदाश्रयत्वज्ञानं हेतुरिति चेन्न, भेदधर्मित्वस्यानिरूपणे इदमस्माद्भिन्नमिदं नेति व्यवस्थाया आकस्मिकत्वप्रसङ्गात्। भेदाश्रयानिरूपणप्रयुक्तभेदज्ञानप्रमात्वविप्रतिपत्तिर्हि भेदाश्रयनिरूपणेन निरसनीया। तदनिरासे इदमस्माद्भिन्नमिदं नेति व्यवस्थाया अयोगात्। तथा च भेदाश्रयस्य प्रतियोग्यतिरिक्तत्वनिश्चये सत्याश्रयानिरूपणाभावादेव भेदज्ञानस्य प्रमात्वनिश्चयः। [९]तन्निश्चये च भेदाश्रयतया प्रतीतस्य प्रतियोग्यतिरिक्तत्वनिश्चय इति परस्पराश्रयप्रसङ्गात्, भेदस्य प्रामाणिकत्वासिद्धेः इति।

किञ्च यदि प्रतियोगितावच्छेदकात्यन्ताभाववत्वमन्योऽन्याभावेन प्रयोजकम् तदा नियामकाभावात् भेदाधिकरणस्येदमित्यनिरूपणात् तत्प्रमात्वाप्रमात्वयोर्व्यवस्थाया अयोगात्। सर्वं सर्वतो भिद्येत, न हि भिद्येत वा। अथ तत्प्रयोजकं तदा घटे भेदसत्तां

---

[१] अस्मिन् कोशे '**तद्विशिष्टज्ञानम्**' इत्यस्य '**भेदविशिष्टज्ञानम्**' इत्यर्थः दृश्यते।
[२] अस्मिन् कोशे '**तुल्यत्वात्**' इत्यस्य '**संबन्धाभावात्**' इत्यर्थः दृश्यते।
[३] ख - धर्मिणि
[४] अस्मिन् कोशे '**तदपेक्षा**' इत्यस्य '**भेदाश्रयाद्वापेक्षा**' इत्यर्थः दृश्यते।
[५] ङ - अनपेक्षणात्
[६] क, ख, ग, घ, छ - अपेक्ष्यते
[७] च - प्रतीतत्वात्
[८] अस्मिन् कोशे '**घटनिष्ठतदाश्रयत्वज्ञानम्**' इत्यस्य '**घटभेदाश्रयत्वज्ञानम्**' इत्यर्थः दृश्यते।
[९] ग, ङ - तन्निश्चयेन

विना अलभमानसत्ताकस्य प्रतियोगितावच्छेदकात्यन्ताभावस्य, [1]तत्र भेदसत्ताप्रयोजकत्वायोगात्, येन विना यस्य सत्ता नास्ति तस्य तत्सत्ताप्रयोजकत्वेऽन्योन्याश्रयात्। उत्पत्त्यन्योऽन्याश्रयस्याप्यनेनैव प्रकारेण दोषत्वात्।

ननु माऽभूत् भेदस्याश्रयः, आत्मवदनाश्रित एव सत्योऽस्त्विति चेन्न, श्रुत्या तादृशभेदस्य क्वाप्यसिद्धेः। प्रत्यक्षादिना तु साश्रयस्यैव तस्य प्रतीतेः। ननूक्तरीत्या, आश्रयानिरूपणादेव स्वातन्त्र्यसिद्धिः [2]सत्तावत् इति चेन्न, तस्याश्रिततत्ववत् स्वरूपस्याप्यपारमार्थिकत्वेऽपि प्रत्यक्षादितः प्रतीत्युपपत्तेः। स्वतन्त्रभेदस्य जीवब्रह्मैक्याविरोधाच्च। भेदस्य स्वाश्रय एव स्वप्रतियोग्यभेदविरुद्धत्वात्। किञ्चाभेदविरोधिन एव भेदत्वात्, भेदत्वमस्य पारिभाषिकमेव स्यात्।

किञ्च भेदज्ञानमपि न संभवति। किमेतौ परस्परभिन्नाविति वा, इदमिदं न भवतीति वा, इदमस्माद्भिन्नमिति वा, सर्वथाप्यन्योऽन्याश्रयः। प्रथमे द्वित्वज्ञानस्य [3]भेदज्ञानाधीनज्ञानत्वाच्च, अन्यथा दूरस्थवनस्पत्योरपि द्वित्वज्ञानप्रसङ्गात्। अभेदग्रहस्य प्रतिबन्धकत्वे [4]'**यत्संशय'** इति न्यायेन भेदग्रहस्यापि हेतुत्वात्, परस्पराभावस्यापि भेदरूपत्वाच्च। न द्वितीयः, भेदभेदत्वज्ञानं विना तद्विशिष्टज्ञानानुपपत्तेः। अत एव न तृतीयः। अपि च घटे पटाभेदानुपलब्धेरनन्यथासिद्धत्वनिश्चयं विना न तदभावरूपभेदधीः[5]। तन्निश्चयश्च यदि घटः पटः स्यात् तद्वदेवोपलभ्येतेति तर्कावतारे तद्वदिति सादृश्यगर्भस्तर्कश्च भेदज्ञानादित्यन्योऽन्याश्रयः। अनुपलब्धिमात्रजन्यज्ञानस्य सत्तानिश्चय-

---

[1] अस्मिन् कोशे '**तत्र**' इत्यस्य '**घटादौ घट**' इत्यर्थः दृश्यते।

[2] अस्मिन् कोशे '**सत्तावत्**' इत्यस्य '**ब्रह्मसत्तावत्**' इत्यर्थः दृश्यते। ग - सत्तादिवत्

[3] ग - भेदज्ञानार्थित्वाच्च; ङ, च - भेदज्ञानाधीनत्वात्

[4] **यत्संशयव्यतिरेकनिश्चयौ यत्प्रतिबन्धकौ तन्निश्चयस्तद्धेतुः** - (न्यायविशेषः) कर्मविचारस्य हेतुत्वं च - ब्रह्मविचारस्य कर्मविचारसिद्धन्यायोपजीवकत्वात् यत्संशयव्यतिरेकनिश्चयौ यत्प्रतिबन्धकौ तन्निश्चयस्तद्धेतुरिति न्यायेन कर्मणामल्पास्थिरफलत्वव्यतिरेकरूपानन्तस्थिरफलत्व-संशयनिश्चययोः ब्रह्मविचारं प्रति प्रतिबन्धकतयाल्पास्थिरफलत्वनिश्चयस्य तत्र हेतुत्वात् विशिष्टवैशिष्ट्यावगाहिबुद्धौ विशेषणतावच्छेदकप्रकारकनिर्णयस्य कारणतया यज्ञेन विविदिषन्तीत्यखण्डवाक्यार्थबोधं प्रति यज्ञपदार्थज्ञानस्य कारणत्वात्, दृष्टान्तदार्ष्टान्तिकभावज्ञानस्य दृष्टान्तज्ञानसापेक्षत्वादङ्गिज्ञानस्याङ्गज्ञानपूर्वकत्वादित्यादिविधया बोद्धव्यम्। (वि.को.८)

[5] घ, ङ - भेदसिद्धिः

रूपत्वे करतलामलकादिज्ञान इव क्वचिदपि प्रामाण्यसंशयस्य तत् [१]भेदज्ञानेऽनुपपत्तेः सत्तानिश्चयार्थं तर्क आवश्यक इति दुस्तरोऽयमन्योऽन्याश्रयः।

किञ्च तस्यैतस्माद्भेदसंशयव्यतिरेकनिश्चयदशायामस्य ततो भेदनिश्चयो नेति सार्वजनीनमिति। [२]तस्यैतद्भेदनिश्चयोऽस्य ततो भेदनिश्चये कारणम्, '**यत्संशय**' इति न्यायात्। एवमितरत्रापि भेदनिश्चये स एव हेतुरित्यन्योऽन्याश्रयः। न च घटधर्मिकभेदः परमते तत्प्रतियोगिको भवति, येन तस्य भेदस्य ग्राह्यतया तत्संशयादितरप्रतिबन्धकः स्यात्। अयं स न भवतीति ज्ञानस्य विशेषणतया विशेष्यतया वा तद्गतभेद-विषयकत्वायोगाच्च तस्येन्द्रियासन्निकर्षात्।

न च प्रतियोगिनि धर्मितावच्छेदकाभावनिश्चय एव [३]तद्धेतुः। विनिगमकाभावात् मूलेऽग्रत्वाभावनिश्चयेऽप्यग्रवृक्षे मूलवृक्षाभेदनिश्चयेन मूलेऽग्राभेदभ्रमदशायां तस्मिन् सत्यपि तद्दर्शनात्। धर्मितावच्छेदकीभूतघटत्वाद्यभावनिश्चयस्यापि घटादिभेदज्ञानाधीन-त्वात् [४]घटत्वत्वनिरूपणस्य घटभेदनिरूपणाधीनत्वात् प्रतियोगितावच्छेदकस्यैतद्वृत्तित्व-निश्चयदशायां प्रतियोगिनि [५]धर्मितावच्छेदकस्याभावानिश्चयात् च तत्राप्यन्योऽन्याश्रयात्।

किञ्च [६]घटात् पटो भिन्न इत्यत्र मत्वर्थो भाति। घटस्य भेद इत्यत्र षष्ठ्यर्थः तदुभयज्ञानञ्च घटाद्भेदज्ञानाधीनम्। तदज्ञानदशायां नियमेन [७]तदप्रतीतेः। न च वस्तुसद्भेदसत्तैवापेक्षिता[८], तदभावेऽपि [९]तज्ज्ञानदशायां संबन्धप्रतीतेः। [१]तत्सत्त्वेऽपि

---

[१] ग - भेदज्ञानानुपपत्तेः

[२] ग - तस्यैतस्मात्

[३] अस्मिन् कोशे '**तद्धेतुः**' इत्यस्य '**भेदनिश्चयहेतुः**' इत्यर्थः दृश्यते।

[४] ख, ग, ङ - घटत्वनिरूपणस्य

[५] ख - धर्मितावच्छेदकाभावनिश्चयात्

[६] क, च, छ - पटात् घटः

[७] अस्मिन् कोशे '**तदप्रतीतेः**' इत्यस्य '**संबन्धाप्रतीतेः**' इत्यर्थः दृश्यते।

[८] अस्मिन् कोशे '**सत्तैवापेक्षिता**' इत्यस्य '**संबन्धज्ञाने स्वरूपसत्तैवापेक्षिता न ज्ञानम्**' इत्यर्थः दृश्यते।

[९] अस्मिन् कोशे '**तज्ज्ञानदशायाम्**' इत्यस्य '**भेदज्ञानदशायाम्**' इत्यर्थः दृश्यते।

तदज्ञानदशायां [२]'यमलयोः' तदप्रतीतेश्च तदज्ञानातिरिक्तस्य च दोषस्याभावात्। एवं भेदं प्रति घटभिन्नः पट इत्यत्र घटो विशेषणत्वेन भाति, पटो विशेष्यतया भाति। इदं भेदप्रतियोगिधर्मिणोः विशेषणविशेष्यत्वज्ञानम्[३] अपि भेदज्ञानाधीनम्। [४]अन्यथा एकत्र विरुद्धयोर्ज्ञानासंभवात्। तथा च भेदज्ञानेऽपि [५]भेदज्ञानान्तरम् अपेक्षणीयम्। तत्रापि [६]तज्ज्ञानान्तरमित्यनवस्था। एवञ्च [७]क्लृप्तकारणाभावे कार्यं स्वप्नरथादिवन्मायिकमेव।

किञ्चास्य प्रतियोगिनः स्वयं न भेदः, स्वावृत्तित्वात्, अभेदस्य चासंबन्धत्वात् भेदः, भेदो भिन्न इति प्रतीत्योरवैलक्षण्यापाताच्च। स्वस्यैव स्वं प्रति विशेषणविशेष्यत्वायोगाच्च। भेदान्तरञ्चाधिकरणभेदमात्रादनुपपन्नम्। तथात्वे वा अबाधाविनिगमाभ्यां घटेऽपि स स्यादिति, एकत्रैकस्य भेदद्वयं स्यात्, एवं तृतीयोऽपि। अन्यथा द्वितीयस्य घटात् भेदायोगात्। प्रथमस्य च स्ववृत्तिवृत्तित्वानुपपत्तेः। अन्यथा एतौ भेदौ घटात् भिन्नाविति प्रथमद्वितीयभेदयोः प्रतीत्ययोगात्। न हि युगपत् [८]स्वाविशेष्यं प्रति स्वयं विशेषणं भवति। अयमप्यबाधाविनिगमाभ्यां प्रथमे ततश्चतुर्थादिरप्यखिलवृत्तिः स्यादित्येकस्यानन्ताः प्रामाणिकभेदाः। एवं तेषामप्यन्योऽन्यं द्रष्टव्यम्।

नापि वैलक्षण्यं भेदः। तद्धि विविधलक्षणकत्वं वा, विरुद्धलक्षणयोगित्वं वा। नाद्यः, एकस्याप्यात्मनः परमते बुद्ध्याद्यनेकलक्षणकत्वात्। द्वितीये यदि परस्परात्यन्ताभावसमानाधिकरणत्वं[९] विरोधः, तर्हि सुखादावपि समानम्। अथ परस्परात्यन्ताभावेनैव समानाधिकरणत्वं सुखादिकञ्च परस्परेणापि समानाधिकरणमिति चेन्न, तस्यापि धर्मिभेदाधीनत्वात्। अथ परस्पराश्रयभेदसमानाधिकरणत्वं परस्पराश्रयात् नापि स्वरूपं

---

[१] अस्मिन् कोशे '**तत्सत्त्वेऽपि** ' इत्यस्य '**भेदसत्त्वेऽपि** ' इत्यर्थः दृश्यते।

[२] **यमः** - सर्वाणि भूतानि अन्तस्थः सन् स्वेषु स्वेषु व्यापारेषु यमयतति - प्रेरयतीति, यमः, अन्तर्यामीत्यर्थः। **लयः** -पूर्वावस्थाप्रहाणेन कारणसंसर्गो लयः। (वि.को.८)

[३] क - विशेष्यज्ञानत्वम्

[४] अस्मिन् कोशे '**अन्यथा**' इत्यस्य '**भेदाज्ञानाभावे**' इत्यर्थः दृश्यते।

[५] ख - भेदज्ञानानन्तरम्

[६] ख - तज्ज्ञानानन्तरमित्यनवस्था; ङ - तज्ज्ञानानन्तरानवस्था

[७] क, छ - क्लृप्तकरणाभावे

[८] क, ख, घ, छ - स्वविशेष्यम्; ग - सविशेष्यम्

[९] ख - सामानाधिकरण्यत्वम्

भेदः, भेदस्य विशेषणतयैव प्रतीतेः। एकत्र च विशेषणविशेष्यभावायोगात्। अपि चाभेदविरोधी भेदः, तस्मिन् सति तदप्रतीतेः।

न च घटादिस्वरूपं भेदः, [1]पटादिमात्रात्मतदभेदविरोधी तदुभयसामानाधिकरण्यधर्मधर्मिभावयोस्सत्त्वात्। न च पटस्य पटस्वरूपतोऽन्यः कश्चिदभेदोऽस्ति, सप्रतियोगि भेदस्य निष्प्रतियोगिस्वरूपत्वानुपपत्तेश्च घटभेदयोर्धर्मधर्मिभावानुपपत्तेश्च।

तस्मात् वास्तवभेदमते भेदप्रतीतिर्निर्विषयैव। मिथ्यामते तु कथञ्चित् सा सविषया। तथा हि इदमिदं नेति प्रतीतिस्तदुभयनिरूपिताभेदाभावं विषयीकरोति। पदद्वयसामानाधिकरण्ये अर्थाभेदस्यैव नञर्थप्रतियोगित्वानुभवात् संभवति च तदुभयाभेदः। अस्ति हि घटपटयोः सदिदं सदिदमित्यनुवृत्तसत्स्वरूपावभासः। सच्च घटाद्यधिष्ठानमात्रम्, [2]'**आत्मैवेदं सर्वम्**' इति श्रुतिप्रसिद्धात्मस्वरूपम्। न च सत्ता [3]तद्विषयो नात्मेति वाच्यम्। [4]'**सदेव सोम्य**' इत्यादिश्रुतेरात्मस्वरूपातिरिक्तनिषेधात् [5]सर्वत्र अधिष्ठानसदात्मानुगमादेवानुगतसद्बुद्ध्युपपत्तेः तदन्यसत्तायां मानाभावात्। तस्यैवानुगततया भावप्रत्ययान्तशब्दार्थत्वाच्च। तदेव च सन् घट इत्यादौ घटाद्यात्मकतया भासमानं घटादेः पारमार्थिकं स्वरूपम्। स्वरूपमेव चाभेदः, परैरपि तथाभ्युपगमात्। अयञ्च स्वरूपाभेदो वास्तवः। एवञ्च घटपटादि निरूपिताभेदात्यन्ताभावोऽविद्यया क्लृप्तो धर्मिप्रतियोग्याश्रितो घटः पटो न भवतीति प्रतीयते। इमौ भिन्नाविति च इमौ विभक्ताविति व-

---

[1] क, घ, छ - घटादि

[2] स एवाधस्तात् स उपरिष्ठात् स पश्चात् स पुरस्तात् स दक्षिणतः स उत्तरतः स एवेदँ सर्वमिति। अथातोऽहंकारादेश एव - अहमेवाधस्तादहमुपरिष्ठादहं पश्चादहं पुरस्तादहं दक्षिणतः अहम् उत्तरतः अहमेवेदं सर्वमिति। (छा.उ.७.२५.१)

[3] ख - सद्विषयः

[4] **सदेव सोम्येदमग्र** आसीदेकमेवाद्वितीयम्।
तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयं तस्मादसतः सज्जायत। (छा.उ.६.२.१)

[5] ङ - सर्वदा

दुभयाश्रितत्वेऽप्ययमस्माद्विभक्त [१]इतिवत् अयमस्माद्भिन्न इति प्रतीतिः। स च भेदः [२]साक्षिभास्य इति न तत्र प्रतियोग्यादि ज्ञानापेक्षा।

न चैवं सर्वदा भेदप्रतिभासप्रसङ्गः साक्षिमात्रभास्यस्य[३] अप्याकाशस्य स्वावच्छेदकालोक [४]आकारवृत्त्यभिव्यक्तसाक्षिणा प्रतिभासवत् भेदप्रतियोग्यभेदनिरूपक-घटपटाद्यसाधारणस्वरूपोपस्थितावेव भेदस्य साक्षिभास्यतया कदाचित् प्रतिभासोपपत्तेः। भेदप्रतियोग्यभेदनिरूपकत्वेन च घटादेः प्रतिभासः न भेदप्रतियोगित्वेनेति, न घटादि प्रतियोगिकत्वानुभवविरोधोऽपीति। अत्रोच्यते -

'**कथञ्जिह्वा न जिह्वेति ब्रह्मभिन्नं जडादितः।**
इत्येवं वदतो भेदनिरासे ब्रूहि दुष्करे।।
एतावदेव पर्याप्तं भेदसिद्धौ किमन्यतः।
अथापि तत्कुचोद्यानां निरासमपि कुर्महे।।'

यदुक्तम् - अन्योऽन्याभावस्य घटप्रतियोगिकत्वे घटात्यन्ताभावाद्भेदो न स्यादिति, तन्न। किमेकजातीयानामेककालीनानां संबन्धिनिरूप्यस्वभावानां संबन्धिभेदादेव भेद इति विवक्षितम्। किं वा समानकालीनानां संबन्धिनिरूप्यस्वभावानां संबन्धिभेदो वैजात्य-प्रयोजक इति। नाद्यः, एकघटगोचरनानापुरुषज्ञानानां भेददर्शनात्। एकस्य शरीरस्य चरणादिनानावयवावच्छेदेन घटेन नानासंयोगदर्शनाच्चैकावच्छेदेन विद्यमानानां भेदो न स्यादित्यापादनं विवक्षितमिति चेत्तर्हि भिन्नावच्छेदेन विद्यमानानां भेदः कुत इष्यते। ऐक्यासंभवादिति चेत् तर्हि भिन्नाधिकरणे विद्यमानयोरत्यन्तान्योऽन्याभावयोरैक्यं सुतरां न संभवतीति तयोरपि भेद इष्यताम्। न हि घटाधिकरणे विद्यमानस्य घटान्योऽन्याभावस्य तत्राविद्यमानेनात्यन्ताभावेनैक्यसंभवः। यदि [५]अधिकरणभेदेन वृत्त्यभाव एवापाद्येत, तर्हि संबन्धिभेदाभावे भिन्नावच्छेदेन वृत्त्यभावः कथं न स्यात्। भिन्नावच्छेदेन वृत्तेरूपलम्भादिति चेदिहापि [६]भिन्नाधिकरणे वृत्तेरुपलम्भादिति तुल्यम्।

---

[१] अस्मिन् कोशे '**इतिवत्**' इत्यस्य '**इति प्रतीतिवत्**' इत्यर्थः दृश्यते।

[२] छ - साक्षिभास्य मिथ्यामते

[३] ख - भासस्य

[४] ख -आकारवृत्तिभिर्व्यक्तसाक्षिणा; ग - अन्तरवृत्त्यभिव्यक्तसाक्षिणा

[५] ख, ग, घ, ङ - भिन्नाधिकरणभेदेन

[६] क, ख - भिन्नाधिकरणेन

३. जीवेश्वरैक्यभङ्गः

किञ्चैवमत्यन्ताभावान्योऽन्याभावयोः ऐकजात्याभाव[१] एव सिध्येत्। कामं सिध्यतु, न काचित् क्षतिः। न द्वितीयः, एककालीनयोर्भिन्नाधिकरणयोः घटगोचरज्ञानेच्छयोर्ज्ञान-द्वेषयोश्च दर्शनात्। किञ्चैवमत्यन्ताभावान्योऽन्याभावयोः वैजात्याभाव एव स्यात्, न तु भेदस्वरूपस्यैवोत्सादः, तत्र किमनिष्टम्। अधिकरणभेदव्यतिरेकेण वैजात्यादर्शनात्, [२]संबन्धिभेदाभावे वैजात्येन विनाधिकरणभेद एव न संभवतीति चेन्न, देवदत्तयज्ञ-दत्तयोरेकघटगोचरज्ञानदर्शनात्।

वस्तुतस्तु इदमिह नेदमिदं नेति प्रतीतिसिद्धं वैजात्यं दुरपह्नवम्। [३]एकप्रति-संबन्धिकत्वे वैजात्यसंभवश्च ज्ञानेच्छादिदृष्टान्तेन[४] उपपादितः। प्रतियोगिभेदाभावेऽभाव-भेदो न संभवतीति चेन्न, त्वया व्यधिकरणधर्मावच्छिन्नाभाववादिनैकप्रतियोगिसमानाधिकरण-व्यधिकरणधर्मावच्छिन्नाभावद्वयाङ्गीकारात् प्रतीतिबलन्त्विहाप्यविशिष्टम्।

यदुक्तम् - अभेदस्यैव भेदोऽभावः स्यात् न घटस्येति। तत्र किं घटभेदस्य घटात्यन्ताभावत्वं [५]निरस्यते उत घटान्योऽन्याभावत्वम्। नाद्यः, इष्टत्वात्। न द्वितीयः, हेत्वभावात्। प्रतियोगिविरोधित्वाभावेऽभावत्वमेव हीयेत इति चेत्, प्रतियोगिविरोधिनो वा अभावत्वं कुतः? प्रतियोगिविरोधादेव[६] इति चेदिहापि प्रतियोग्यविरोधादेवाभावत्वम्। प्रतियोगिविरोधिनोऽभावत्वेनोपलम्भादिति चेदिहापि प्रतियोग्यविरोधिनोऽभावत्वेनोपलम्भा-दिति तुल्यम्। अत एव प्रतियोगिसमानाधिकरणस्याव्याप्यवृत्तेरत्यन्ताभावत्वसिद्धिः। त्वन्मते व्यधिकरणधर्मावच्छिन्नाभावसिद्धिश्च[७]।

न च तत्र प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिविरोधोऽस्त्येवेति वाच्यम्, तादृश-प्रतियोगिनोऽप्रसिद्धेः।

---

[१] क, छ - वैजात्याभाव; ग - एकजात्यभाव

[२] ख - संबन्धभेदाभावे; ग - संबन्धाभावे

[३] क - एकप्रतिसंबन्धित्वे; ग - एकप्रतिसंबन्धिनत्वे; ङ - एकप्रतीतिसंबन्धित्वे

[४] ङ - अभेदस्यैव भेदोऽभावः

[५] ग - निरसिष्यते

[६] ख - विरोधित्वाभावात्

[७] ख - धर्मावच्छिन्नाभावत्वसिद्धिश्च; ङ - धर्मावच्छिन्नाभावसिद्धेश्च

ननु व्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगितावच्छेदकेनैव विरोधः। विरोधश्च प्रतियोगितावच्छेदकस्य प्रतियोगिन्यवृत्तिरेवेति चेत्, यद्येवं प्रतियोगितावच्छेदकविरोधात् [१]घटाभावत्वं कथं तर्हि तादृशविरोधवतोऽन्योऽन्याभावस्य घटप्रतियोगिकत्वासंभवः, प्रत्युतात्यन्ताभावान्तरे क्लृप्तप्रतियोगिसामानाधिकरण्याभावलक्षणविरोधस्य परित्यागात् व्यधिकरणधर्मावच्छिन्नाभावस्यैवासंभवः। अन्योऽन्याभावस्य तु प्रतियोगितावच्छेदक-सामानाधिकरण्याभाव[२] लक्षण एव विरोधः। अभावान्तरे प्रसिद्धं प्रतियोगिविरोधित्वं विरोधस्यासामानाधिकरण्यलक्षणत्वञ्चोभयं व्यधिकरणधर्मावच्छिन्नाभावे त्यक्तम्। अन्योऽन्याभावे तु प्रतियोगिविरोधित्वमात्रं[३] त्यक्तम्। प्रतियोगितावच्छेदकविरोधित्वं तु व्यधिकरणधर्मावच्छिन्नाभावे त्वदङ्गीकृतमेवान्योऽन्याभावे स्वीकृतम्। त्वदङ्गीकृतं प्रतियोग्यवृत्तित्वलक्षणं विरोधित्वमप्यन्योऽन्याभावेऽप्यस्त्येव। अभेदेन विरोधादभेदः तत्प्रतियोगीत्येतच्चासंगतम्, तथा सति गोत्वाश्वत्वयोः परस्परप्रतियोगित्वापत्तेः। तथाननुभवात् तयोः परस्परप्रतियोगित्वाभावे च तत एव भेदो नाभेदप्रतियोगिकः, घटप्रतियोगिकत्वेनैवानुभवादभेदाभाव इत्यपि [४]प्रतीयत इति [५]चेन्न, [६]घटभेदातिरिक्त-घटाभेदात्यन्ताभावस्यैव तत्प्रतीतिविषयत्वात्। भेदस्यैव तत्प्रतीतिविषयत्वेऽपि घटभेदः घटाभेदाभाव इति प्रतीतिभ्यां घटं प्रति भेदत्वस्य घटाभेदं प्रत्यत्यन्ताभावत्वस्य च सिद्धेः।

किञ्चाभेदाभावः स्यादिति यदुक्तं तत्र किम् [७]अन्योऽन्याभावत्वापादनं विवक्षितम्, उतात्यन्ताभावत्वापादनम्? नाद्यः, प्रतियोगिविरोधिनोऽन्योन्याभावस्य क्वाप्यदर्शनात्। द्वितीये इष्टापादनवादिनं प्रति किमुत्तरम्? एतेन तादात्म्यं प्रतियोगीति पक्षोऽपि निर्व्यूढः। एक एवाभावस्तादाम्यघटप्रतियोगिकः तादात्म्यस्यायमत्यन्ताभावः घटस्य त्वयमन्योऽन्या-भाव इति।

---

[१] ङ - घटाभावाभावत्वम्

[२] ङ - सामानाधिकरण्यभाव

[३] क, छ - विरोधित्वम्

[४] ङ - प्रतीयेत

[५] ग, ङ - चेत्

[६] घ, ङ - घटभेदातिरिक्तस्य; ग - घटाभावातिरिक्तस्य

[७] ङ - अन्योऽन्याभावत्वप्रतिपादनम्; ग - अन्योऽन्याभावत्वं त्वापादनम्

३. जीवेश्वरैक्यभङ्गः

संभवति हि देवदत्तो यज्ञदत्तस्य पुत्रो विष्णुमित्रस्य पितेति। तच्च तादात्म्यं घटत्वमेवास्तु, तादात्म्यं हि तदात्मनो धर्मः। अतस्तादात्म्यं धर्मिणो [१]भिन्नम् एव वाच्यमिति [२]तद्भिन्नस्य तादात्म्यत्वानुपपत्तेः इति वचनं व्याहतार्थम्। स्वाभावानधिकरणत्वनिबन्धनदोषश्च स्वाभावभावानधिकरणत्वादेव निरस्तः।

तथा हि किमिदं विरुद्धत्वं विवक्षितम्? किं वैयधिकरण्यं किं वा नाश्यनाशकभावोऽथवा तदात्मत्वाभावः। यद्वा उभयोरन्यतरस्यान्यतरानधिकरणत्वम्, तदभावात्मकत्वं वा। नाद्यः, व्यधिकरणयोर्गुणगुणिनोर्गुणतज्जात्योश्चाश्रयाश्रयीभावदर्शनात्। न द्वितीयः, असिद्धेः। न तृतीयः, आश्रयाश्रयीभावस्य [३]तदधीनत्वात्। न तुरीयः, घटाभावस्य घटानधिकरणत्वात्। घटस्य घटाभावानधिकरणत्वं साध्यते, उत घटस्य घटाभावानधिकरणत्वादेव। नाद्यः, जातेर्व्यक्त्यधिकरणत्वाभावेऽपि व्यक्तेर्जात्यधिकरणत्वदर्शनात्। न द्वितीयः, आत्माश्रयात्। न पञ्चमः, अभावे प्रतियोग्यनधिकरणताया भावान्यत्वनिबन्धनत्वात्।

न च भावाभावसाधारणमभावत्वमेव [४]प्रतियोग्यनधिकरणत्वे प्रयोजकम्। क्वचित् सहचारदर्शनमात्रेण [५]प्रतीतिबाधं अविचार्य प्रयोजकत्वकल्पने अतिप्रसङ्गात्। दृश्यते हि घटे घटो नास्तीति प्रतीतिः। किञ्च [६]भावाभावसाधारणमभावत्वम् किमनधिकरणत्वमात्रे प्रयोजकम्? उत प्रतियोग्यनधिकरणत्वे। नाद्यः, घटादेः रूपाद्यनधिकरणत्वप्रसङ्गात्। न द्वितीयः, तथा सत्यभावस्य प्रतियोग्यतिरिक्ताधिकरणत्वप्रसङ्गात्।

---

[१] ग - भिन्नत्वम्

[२] क - चेत् भिन्नस्य

[३] ख -तादधीनत्वात्

[४] ङ - प्रतियोग्यधिकरणत्वे

[५] ख - प्रतीतिश्चायम्

[६] क, घ, ङ, च - भावाभावसाधारणाभावत्वम्

नन्वभावत्वमनधिकरणताप्रयोजकं भावाभावसाधारणमभावत्वन्तु प्रतियोग्यनधिकरणता प्रयोजकमिति चेन्न, अवश्यंकल्प्येनानधिकरणता प्रयोजकेनैवाभावे प्रतियोग्यनधिकरणत्वस्यापि सिद्धौ [१]प्रयोजकान्तरस्य गौरवेणाकल्पनीयत्वात्।

यच्च किञ्चाभावाधिकरणत्वयोग्येत्यादि तन्न, तद्योग्यतायाः [२]तदभावाविरोधित्वात्। न हि दण्डो घटजननयोग्योऽपि सर्वदा घटं जनयति।

किञ्चैवमत्यन्ताभावस्य नित्यतया घटसन्निधानदशायामपि घटात्यन्ताभावस्य तत्र सत्त्वेन तद्दशायां घटाभावानधिकरणत्वासंभवात् तत्प्रतीतेश्च। घटाभावानधिकरणत्वं घटोपाधिकम्। यथा स्फटिके रक्तिमा [३]जपोपाधिक इति कल्प्यते। अथवा रुमागतकाष्ठे लवणसंबन्धाल्लवणत्ववत् घटाभावानधिकरणे घटसंबन्धात् भूतले साक्षादेव घटाभावानधिकरणत्वं संभवतीति। नाद्यः, एवमपि घटाभावस्य घटदशायां तत्र सत्त्वे तद्दशायां घटाभावप्रतीतिप्रसङ्गात्। यदि स्फटिकशुक्लताया इवोपाधिसंसर्गादप्रतीतिः कल्प्यते, तथापि घटदशायां घटाभावाधिकरणत्वप्रतीतिः भ्रमो न स्यात्। तस्मादभावस्योत्पत्तिविनाशाङ्गीकारेण वाऽभावसंबन्धस्य कादाचित्कत्वाङ्गीकारेण वा घटदशायां घटाभावानधिकरणत्वप्रतीतेर्निर्वाहः कार्यः, न तूपाधिसंसर्गेण। अत एव न द्वितीयः, घटसंसर्गात् घटाभावानधिकरणत्वे सत्यपि घटाभावस्यापि विद्यमानतया घटदशायां [४]घटाभावप्रतीति प्रसङ्गादेव।

किञ्च घटाभावे विद्यमाने तदनधिकरणत्वं ब्रह्मणापि [५]दुस्संपादम्। दारुत्वविगम[६] एव हि लवणत्वसंपादनम्। घटेन घटाभावविगमाङ्गीकारे[७] अभावनाशः संबन्धनाशो वा। किञ्चैवं सति तृणादौ [८]दाह्यत्वानधिकरणे वह्निसंबन्धात् दाह्यत्वदर्शनात् तत्र हेतुतया वह्नेरपि दाह्यत्वप्रसङ्गः।

---

[१] ख - प्रयोजकान्तरत्वस्य

[२] ग - तदभावविरोधित्वात्

[३] क - जपाकुसुमोपाधिकः

[४] ख - घटाभावाप्रतीति

[५] ङ - दुस्संपाद्यम्

[६] ग - विनिगमः

[७] ग - विनिगमाङ्गीकारे

[८] ग - लोहितत्वानधिकरणे

३. जीवेश्वरैक्यभङ्गः

किञ्च घटाभावाधिकरणे भूतले [१]घटाधिकरणत्वे किं निबन्धनमभिमतमायुष्मतः। यदि तदानीं घटाभावस्य घटाधिकरणत्वं तदुपाधिकभूतले घटाधिकरणत्वञ्च मन्यसे, तर्हि घटाधिकरणत्वयोग्यस्य घटाभावस्य कदाचित् तदनधिकरणत्वं कुतः। यदि घटसामग्र्यां सत्यां घटाधिकरणत्वमसत्यां तस्यां घटानधिकरणत्वमिति तर्हि तत एव घटाभावानधिकरणत्वमिति पश्य। यच्च प्रतीत्यवैलक्षिण्यमुक्तं तन्न, प्रतियोगिवैलक्षण्यात्। अन्यथा [२]देवदत्तपुत्रत्वयज्ञदत्तपितृत्व बुद्ध्योरेकविष्णुमित्रविषययोः [३]अवैलक्षण्यप्रसङ्गात्।

न चैकस्योभयप्रतियोगिकत्वानुपपत्तिः लाघवेनैकस्योभयप्रतियोगिकत्वे क्लृप्ते क्वचिद्दर्शनमात्रस्याकिञ्चित्करत्वात्।

यच्च किञ्च यो यस्येत्यादि, तन्न, घटत्वात्यन्ताभावस्य [४]घटाभेदविरोधित्वेन घटभेदत्वात् त्वदीयभेदप्रयोजकनिर्बन्धस्तु व्यर्थः। अभेदः प्रतियोगीति पक्षोऽपि निर्व्यूढः, घटत्वस्यैवाभेदत्वात्। तत्र च नान्योऽन्याश्रयशङ्कावकाशः। एवं प्रतियोगी निरूपितः, एवम् धर्म्यपि सुनिरूपः। भेदः कुत्र वर्तत इति प्रश्ने कुत्रचिदित्युत्तरस्य सुवचत्वात्, भावेऽपि हि तथैव वाच्यम्। यदि क्वचित् वर्तत इति ज्ञात्वैवायं प्रश्नः, अतः कथं तदेवोत्तरं स्यादित्युत्तरानुपपत्तिरुद्भाव्येत, तर्हि प्रश्न एवानुपपन्नः, प्रयोजनाभावात्। अधिकरणतावच्छेदकनियमस्य भावेऽदर्शनात्, अभावे तन्निर्बन्धो निर्निबन्धन एव। 'यत्र प्रतीयते तत्र' इत्युक्तावपि न विरोधः, ईश्वरेण यत्र प्रतीयते तत्रेत्युक्तेः। 'यत्र प्रमीयते तत्र' इत्युक्तावपि न विरोधः, ईश्वरस्य यत्र तदभावप्रत्ययो नास्ति तत्र तदिति विवक्षितत्वात्। मास्तु वाधिकरणनिरूपणं न हानिः। किमधिकरणमिति पृष्टे, तत्रोत्तरं वक्तव्यमिति चेत् किमयं लौकिकानां सुखेन [५]वस्तुममाङ्गल्ययोगिदेशात् भिन्नदेशः क इति प्रश्नः, तदा सुदर्शनाधिष्ठितदेश इत्युत्तरम्। यदि च '**बाध्यादन्यस्स को देशो व्याधिदुर्भिक्षतस्करैः**' इति प्रश्नः, तदा '**यत्राष्टाक्षरसंसिद्धो महाभागो महीयत**' इत्युत्तरम्। न हि

---

[१] क, ख, ङ, छ - घटाधिकरणतायाम्; घ - घटाभावाधिकरणतायाम्; ग - घटाधिकरणतादशायाम्

[२] ङ - देवदत्तपितृत्वयज्ञदत्तपुत्रत्व

[३] ग - वैलक्षण्य

[४] ग, घ - घटाभाव

[५] ख - वस्तुं माङ्गल्ययोगिदेशात्; ङ - वस्तुममाङ्गल्यं योगिदेशात्; ग - वस्तुममाङ्गल्ये देशात्

विशेषानाश्लिष्टो व्यर्थप्रश्नो लौकिकानामप्यस्ति। यदि वादिप्रश्नः तदा घटः कुत्रास्ते, [१]कियत्परिमाण्वारब्धः, कियत्पलपरिमित[२] इति प्रश्नस्योत्तरादानेऽपि घटसिद्धिवदिहापि उत्तरादानेऽपि भेदसिद्ध्यवैकल्प्यात्।

यच्चोक्तम् - घटेऽपि घटभेदज्ञानं प्रमैव स्यादिति, तन्न, तत्र तत्संबन्धस्यैव बाधिततत्वात्। न च स्वरूपस्यैव संबन्धत्वात् सर्वेषां स्वरूपाविशेषात् इदं स्वरूपं संबन्ध, इदं स्वरूपं नेति नियामकाभाव इति वाच्यम्। संबन्धान्तराङ्गीकारेऽप्यत्रायं संबन्धो नात्रेति नियामकाभावात् नायं स्वरूपसंबन्धपक्ष एव दोषः। इदं घटस्वरूपम्, इदं पटस्वरूपम्, इदं ब्रह्मस्वरूपमित्यत्रापि नियामकाभावात् तत्तत् स्वरूपाणामप्यसिद्धि-प्रसङ्गात्। प्रतीतिश्च सर्वत्र समाना। यच्चोक्तं भेदधर्मित्वस्यानिरूपणे इदमस्मात् भिन्नमिदं नेति व्यवस्थाया आकस्मिकत्वप्रसङ्ग इति, तन्न, निरूपणं यदि ज्ञानं सिद्धमेव तत्, यद्यवच्छेदकोक्तिस्तदात्यन्ताभावस्य घटादेरप्यसिद्धिप्रसङ्गः। तत्राप्यवच्छेदकानुक्तेः। अत एव तेषामपि मिथ्यात्वमिति चेत्, तर्हि सत्यस्य वस्तुनोऽनुगतधर्मनियाम्यत्वं कुत्र दृष्टमायुष्मता, प्रतीतिरपि सुनिरूपा। एतौ परस्परभिन्नौ, इदमिदं न भवति, अयमस्मात् भिन्न इत्यादीनां तत्प्रतीतित्वात्।

तत्र यदुक्तमाद्ये द्वित्वज्ञानं भेदज्ञानाधीनमिति, तन्न, द्वित्वभेदयोरेकज्ञानविषयतया तज्ज्ञानयोः परस्परकार्यकारणभावासिद्धेः।

न च दूरस्थवनस्पत्योः द्वित्वज्ञानप्रसङ्गः, दूरस्थत्वादेव भेदज्ञानाभाववत् द्वित्व-ज्ञानाभावस्याप्युपपत्तेः। यच्च परस्परभावस्यापि भेदरूपत्वादिति, तन्न। घटप्रतियोगिक-भेदवान् पटः, पटप्रतियोगिकभेदवान् घट इति हि तस्यार्थः। तत्र भेदज्ञानस्य भेदज्ञानाधीनत्वाभावात्।

यदुक्तम् - द्वितीये भेदभेदत्वज्ञानं विना तद्विशिष्टज्ञानानुपपत्तिरिति। तत्र किं भेदभेदत्वज्ञानयोः भेदविशिष्टज्ञानहेतुत्वमभिप्रेतमुत तयोर्भेदविशिष्टज्ञानविषयत्वम्। नाद्यः, असिद्धेः। द्वितीयस्त्विष्ट एव, तत्र दोषाभावात्। अत एव तृतीयोऽप्युपपन्नः, यच्च भेदज्ञानस्य [३]तर्करूपभेदज्ञानाधीनतया अन्योऽन्याश्रय उक्तः, सोऽपि तर्कस्याभावग्रह-

---

[१] क, ख - किञ्चित्परिमाण्वारब्धः

[२] ङ - परिमाण

[३] क - तर्करूपज्ञानाभावाधीनतया; ख, घ, ङ - तर्करूपज्ञानाधीनतया

हेतुत्वाभावादेव निरस्तः। सत्तानिश्चयार्थं तर्कापेक्षायां घटज्ञानादावपि तर्कसापेक्षत्वप्रसङ्गः।

किञ्चानवधारणात्मकज्ञानस्य प्रागुत्पत्तौ पश्चात् तर्कावतारे सति, अवधारणात्मक ज्ञानस्योत्पत्तौ को विरोधः।

यच्च तस्यैतस्माद्भेदसंशये व्यतिरेकनिश्चये च सति एतस्य तस्मात् भेदनिश्चयो नेति सार्वजनीनम्। अतस्तस्यैतस्माद्भेदनिश्चय एतस्य तस्मात् भेदनिश्चये हेतुर्वाच्यः। तथा चान्योऽन्याश्रय इति।

तन्न। तत्र संशयस्याप्रतिबन्धकत्वात् व्यतिरेकनिश्चयोऽपि न तत्र प्रतिबन्धकः। अयं तस्माद्भिन्नो नेति ज्ञाने सति समानसंवित्संवेद्यतया स एतस्माद्भिन्नो नेति प्रतीतौ सत्यां सैव ग्राह्यव्यतिरेकनिश्चयत्वात् तस्यैतस्माद्भेदग्रहं प्रतिबध्नाति। ससंबन्धिकपदार्थेषु सर्वत्रायमेव न्यायो निर्वाहः। अत एव देवदत्तस्य पुत्रो यज्ञदत्त इति ज्ञाने सति देवदत्तो यज्ञदत्तपितेति ज्ञानम्। अन्यथा भूतले घटात्यन्ताभावनिश्चये[१] घटे भूतलवृत्तित्वाभावव्यतिरेकनिश्चयप्रतिबन्ध[२] इति तत्राप्यन्योऽन्याश्रयादत्यन्ताभावस्यापि साक्षिवेद्यत्वापत्तिः।

न चेष्टापत्तिः, षष्ठप्रमाणविलोपापत्तेः। भिन्न इत्यत्र तु मत्वर्थसंबन्धप्रतीतावपि न तस्य भेदज्ञानसाध्यता, अन्वयव्यतिरेकासिद्धेः। यद्यन्वयव्यतिरेकौ स्यातां तत्कारणत्वं त्वयाप्येष्टव्यमेव। साक्षिणा युगपदेव भेदसंबन्धयोर्भानाङ्गीकारे जन्यज्ञानेनैव तथा भानमङ्गीक्रियताम्। या च घटभिन्नः पट इत्यत्रानवस्थोक्ता सापि नास्त्येव, विरुद्धधर्मज्ञानस्य भेदज्ञानसाध्यत्वे 'स्थूलोऽहं' 'चन्द्रः प्रादेशिकपरिमाण' इत्यादिज्ञानानामनुदयप्रसङ्गात्। यश्च भेदज्ञानस्य विरुद्धधर्मज्ञानहेतुत्वे हेतूपन्यासः विरुद्धयोरेकत्रज्ञानासंभवादिति, स चात्यन्तासंगतः। घटः पटाद्भिन्न इत्यत्र घटपटयोरेव विशेषणविशेष्यभावज्ञानात्। विरुद्धयोरेकतया ज्ञायमानयोः ज्ञानासंभवविवक्षायामप्यसंगतिरेव, घटपटयोरेकतया ज्ञानासिद्धेः। भेदे भेदव्यवहारस्य च स्वरूपमेव विषयः।

---

[१] क, ग, ङ, च, छ - निश्चयः

[२] ख, च, छ - प्रतिबध्यः

न च स्वेन संबन्धासंभवः, तथा सति घटपटस्वरूपमित्यादिव्यवहारासंभवात्। आश्रयाश्रयीभावो भिन्न इत्यत्र न विषयः, किन्त्वन्य एव संबन्धः। स चाभेदेऽपीति न विरोधः, भेदान्तराङ्गीकारे वा किं बाधकम्। यावत् प्रतीतिवस्त्वङ्गीकारे बाधकाभावात्, [१]घटे पटाद्यनेकप्रतियोगिकानन्तभेदवदेकप्रतियोगिकानेकभेदसत्त्वेऽपि विरोधाभावाच्च।

प्रामाणिकस्यार्थस्य मिथ्यात्वकल्पनादपि हि तदनुसार्यर्थान्तरकल्पनमेव युक्तम्। अन्यथा पीनत्वेन रात्रिभोजनं न कल्प्येत। तस्मादन्योऽन्याभावो भेद इत्यत्र न काचिदनुपपत्तिरिति। वैलक्षण्यं वा भेदः, यत्र भेदप्रतीतिरबाधिता तत्तत्संबन्धि किञ्चित् वैलक्षण्यं स्वरूपमेव वा भेदः। अभेदेऽपि विशेषणविशेष्यभावः घटस्य स्वरूपमित्यादाविव नानुपपन्नः।

यदुक्तम् - पटात्मकपटाभेदविरोधित्वाभावाद्घटस्य घटः पटभेदो न भवतीति, तत्र भेदस्याभेदविरोधित्वं कुत्र दृष्टमायुष्मता, येनैवं ब्रवीषि। विरोधस्य भवद्भिरेवाङ्गीकारात्। अभेद इत्यत्र नञा[२] विरोधप्रतीतेश्च विरोधो वाच्य इति चेत्, तर्हि यथा प्रतीतिविरोधोऽङ्गीकार्यः। यस्य यस्मादभेदः तस्य तस्माद्भेदो विरुद्धो दृश्यते। पटस्वरूपं पटस्य [३]पटाभेदः, घटस्तु यद्यपि पटात् भेदः, [४]अथापि घटस्यैव भेदः न तु पटस्य। अतः पटस्य घटाविरोधित्वेऽपि न दोषः।

ननु यस्य यस्मादभेदः तस्य तस्मात् [५]भेदो विरुद्ध इत्युक्तेरसंभव एव। यस्य यस्मादभेदस्तस्य तस्माद्भेदस्य [६]अप्रसिद्धेः विरोधाश्रयानिरूपणादिति चेन्न। तस्य तस्मादभेदे, तस्मात् भेदस्य तत्प्रतियोगिकत्वाभावस्यैव विरोधरूपतया विवक्षितत्वात्। अतः पटाद्भेदरूपे घटे पटप्रतियोगिकत्वाभावलक्षणविरोधोऽस्त्येवेति न दोषः।

ननु कथं पटप्रतियोगिकत्वाभावः पटाद्भेद इति प्रतियोगित्वस्यैवाभिधानादिति चेन्न, अस्यैतस्माद्भेद इत्यत्र यः षष्ठ्यर्थः सप्रतियोगितेति विवक्षिततत्वात्।

---

[१] ख, ग - घटे घटः

[२] क, ग - नञः

[३] क, छ - पटादभेदः

[४] ग, ङ - तथापि

[५] ख - विरोधः

[६] ङ - अप्रतीतेः

३. जीवेश्वरैक्यभङ्गः

न च सप्रतियोगिभेदस्य निष्प्रतियोगिस्वरूपत्वानुपपत्तिः, सप्रतियोगिपुत्रस्य निष्प्रतियोगिदेवदत्तत्वानुपपत्तिप्रसङ्गात्।

न च धर्मधर्मिभावानुपपत्तिर्दोषः, अनृतजडपरिच्छिन्नव्यावृत्तं ब्रह्मेत्यत्र [१]एव उपपत्तेः। यच्च स्वमतोपपादनं [२]तत्परमतस्य एव साधकम्। तथाहि अधिष्ठानसत्तैवाभेद इति यदुक्तं तेन घटत्वस्य घटात् भिन्नतया तत्तादात्म्यरूपत्वं न संभवतीत्येतद्दूषणमुद्धृतम्। अभेदात्यन्ताभावस्यैव घटपटोभयनिरूपितभेदत्वाङ्गीकारेण घटत्वात्यन्ताभावस्यैव घटान्योऽन्याभावत्वसंभवस्समर्थितः। भेदो विभागवदुभयनिष्ठ इति यदुक्तमस्तु तत्सर्वोऽभेद एक एव वास्तु। किं नश्छिन्नम्, भेदस्यैवोपपादनात्।

किञ्च घटत्वात्यन्ताभाव एव घटान्योऽन्याभाव इति व्यावहारिकमर्यादामनङ्गी-कृत्य दुरध्वगमनं बुद्धिविध्वंसात्[३] एव। एवञ्च भेदोऽप्यभेदमेव साधयतीत्यसंगतम्। यच्चाधिष्ठानमेव घटादेः पारमार्थिकं स्वरूपम् इत्युक्तं तन्न, किमत्र षष्ठी मुख्या, उतामुख्या। मुख्यत्वे [४]घटत्वादिकम् अपि स्वरूपं स्यादिति, तदभावः कुतोऽपि भेदो न स्यात्। [५]तदपरमार्थ इति चेत्, अपरमार्थस्वरूपप्रतियोगिक एव भेदोऽस्तु। किं तव छिद्यते। पदद्वयसामानाधिकरण्यार्थाभेदस्यैव नञर्थप्रतियोगित्वमनुभूयत इति यदुक्तम्, तन्न, तथा सति निषेधाधिकरणप्रतीतिप्रसङ्गात्। घटः पटो नेत्यत्र घटः पट इत्यंशस्य घट-पटाभेदोपस्थापनपरत्वेन घट इत्यंशस्य निषेधाधिकरणानुपस्थापकत्वात्।

किञ्च इह घटो नेत्यत्रापि इह घट इति [६]घटभूतलसंसर्गम् प्रतिपाद्य तन्निषेधः क्रियत इति स्यात्। तथा च वायौ रूपं नास्तीत्यादावप्रसिद्धसंसर्गनिषेध स्यात्।

---

[१] क, ख, घ, च, छ - इव

[२] ङ - तत्परस्य

[३] ङ - ध्वंसात्

[४] ख, ग - घटादिकम्

[५] ङ - तदापरमार्थः

[६] ङ - भूतलघटसंसर्गम्

निरधिकरणनिषेधश्चानुवृत्तसदात्मस्वरूपमेवाभेद इत्यप्यसङ्गतम्। घटस्सन् पटस्सन् इत्यभेदज्ञानाविरोधिनो[१] घटपटौ भिन्नाविति ज्ञानस्य तदभावगोचरत्वानुपपत्तेः।

नन्वियमनुवृत्तसत्तैवाभेद इति लौकिकानां ज्ञानाभावादभेदाभावप्रतीतिरुपपद्यते। यथा त्वन्मते घटकलशयोर्घटत्वमभेद इति ज्ञानाभावात् [२]घटस्वरूपाभेदे [३]ज्ञाते अपि घटकलशौ भिन्नाविति भ्रम इति चेन्न। त्वादृशमप्यनुवृत्तसत्तैवाभेद इति [४]ज्ञातवतां घटपटयोर्भेदज्ञानदर्शनात्। घटत्वमेव घटकलशाभेद इति [५]ज्ञातवतां तु घटत्वज्ञाने सति घटकलशभेदज्ञानं न भवत्येव।

किञ्च दूरस्थवनस्पत्योरभेदव्यवहारस्य को विषयः। आत्मसत्तैव चेत् तयोरभेदज्ञानं प्रमा। सा च दूरत्वदोषजन्या समीपंगतस्य भेदज्ञानं भ्रमः, स च दोषनिवृत्तौ जायत इति तु परिहास्यम्। दूरस्थवनस्पत्योरभेदव्यवहारस्य मिथ्याभूतवनस्पतिस्वरूपमेवाभेदो विषयश्चेत्, सर्वत्र स एवाभेदो अस्तु[६]। अतः भेदस्य [७]सुनिरूपत्वात् अभेदानुमानमप्रयोजकम्।

नापि श्रुतिः। तथाहि - [८]'**इदं ब्रह्म**' इत्यादि वाक्यं न तत्र प्रमाणम्। '**इदं सर्वं यदयमात्मा**' इत्यस्य बाधार्थसामानाधिकरण्यरूपत्वे '**इमे देवा**' इति निर्दिष्टजीवे बाध-प्रसङ्गात्। अभेदार्थत्वे '**भूतानि**' इति निर्दिष्टाचितोऽप्यभेदप्रसङ्गात्। तस्मात् चिदचित् वाचकपदानां तत्प्रकारकपरमात्मपर्यन्ततयैव परमात्मवाचिपदसामानाधिकरण्यं सर्वशब्दानां भगवत्पर्यन्तव्युत्पत्तिविधुराणां विदुषां 'स राष्ट्रं नाभवत्' 'स राष्ट्रमभवत्' 'स इदं भविष्यति' इत्यादि श्रुतिशैल्यनुरोधात् स्वस्वामिभावसंबन्धादिभिरुपचारतः सामानाधि-

---

[१] ङ - ज्ञानविरोधेन

[२] घ, ङ - घटत्वरूपाभेदे

[३] ख, च - ज्ञाने

[४] ग, च - ज्ञानवताम्

[५] ङ, च - ज्ञानवताम्

[६] ङ - विषयोऽस्तु

[७] ख - सुनिरूपणत्वात्; ग - स्वरूपनिरूपत्वात्

[८] ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद। क्षत्रं तं परादाद्योऽन्यत्रात्मनः क्षत्रं वेद। लोकास्तं परादुर्योऽन्यत्रात्मनो लोकान् वेद। देवास्तं परादुर्योऽन्यत्रात्मनो देवान् वेद। भूतानि तं परादुर्योऽन्यत्रात्मनो भूतानि वेद। सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद। **इदं ब्रह्म** इदं क्षत्रमिमे लोका इमे देवा इमे वेदा इमानि भूतानि **इदं सर्वं यदयमात्मा**। (बृ.उ.४.४.६; ६.४.७)

करण्यनिर्वाहः प्रतीयते। स्वरूपाभेदप्रतीतिस्तु मानमीमांसापथभ्रष्टानाम्[१] [२]उन्मत्तानाम् एव भवति।

एतेन [३]'**तेजोमयोऽमृतमयः पुरुष**' इति च व्याख्यातम्। [४]'**स एव माया-परिमोहितात्मा**' इत्यत्र [५]'**तस्मिंश्चान्यो मायया सन्निरुद्धः**', [६]'**प्रधानक्षेत्रज्ञपतिर्गुणेशः**', [७]'**क्षरात्मानावीशते देव एकः**', [८]'**विद्याविद्ये ईशते यस्तु सोऽन्य**' इत्यादिभिः जीवस्य मायावश्यताया परमात्मनस्तदभावस्य चावगमात्। '**स एव**' इति पण्डितशब्देन प्रकृतो जीवः परामृश्यते। [९]'**स्वप्ने स जीव**' इत्यत्र जीवशब्दः '**स**' इत्यनेन संबध्यते, अनेन तस्यैव पाशबन्धप्रकार उच्यते। '**स्वमायया**' इति स्वगोचरमाययेत्यर्थः, न तु स्वाधीन-माययेत्यर्थः। '**जीवलोकः**' - स्वाप्नमित्रादिलोकः, '**तमोऽभिभूत**' इति [१०]तमसाभिभवेन ज्ञानसंकोचात् परमात्मनि लीनो भवतीत्यर्थः। [११]'**जन्मान्तर**' इति जन्मान्तरारम्भककर्म-

---

[१] ख, घ, ङ - पदभ्रष्टानाम्; ग - अवभ्रष्टानाम्

[२] ग - अनुन्मत्तानाम्

[३] **तेजोमयोऽमृतमयः पुरुषः**, अयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्वम्। (बृ.उ.४.५.१-१४)

[४] **स एव मायापरिमोहितात्मा** शरीरमास्थाय करोति सर्वम्।
स्त्र्यन्नपानादिविचित्रभोगैस्स एव जाग्रत्परितृप्तिमेति।। (कै.उ.१२)

[५] छन्दांसि यज्ञाः क्रतवो व्रतानि भूतं भव्यं यच्च वेदा वदन्ति।
अस्मान्मायी सृजते विश्वमेतत् **तस्मिंश्चान्यो मायया सन्निरुद्धः**।। (श्वे.उ.४.९)

[६] स विश्वकृद्विश्वविदात्मयोनिर्ज्ञः कालकारो गुणी सर्वविद्यः।
प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबन्धहेतुः।। (श्वे.उ.६.१६)

[७] क्षरं प्रधानममृताक्षरं हरः **क्षरात्मानावीशते देव एकः**।
तस्याभिध्यानाद्योजनात् तत्त्वभावाद्भूयश्चान्ते विश्वमायानिवृत्तिः।। (श्वे.उ.१.१०)

[८] द्वे अक्षरे ब्रह्मपरे त्वनन्ते विद्याविद्ये निहिते यत्र गूढे।
क्षरं त्वविद्या ह्यमृतं तु **विद्या विद्याविद्ये ईशते यस्तु सोऽन्यः**।। (श्वे.उ.५.१)

[९] **स्वप्ने स जीवः** सुखदुःखभोक्ता स्वमायया कल्पितजीवलोके।
सुषुप्तिकाले सकले विलीने तमोऽभिभूतः सुखरूपमेति।। (कै.उ.१३)

[१०] घ - तमसाभिन्नत्वेन; ङ - तमसोऽभिभवेन

[११] पुनश्च **जन्मान्तरकर्म**योगात् स एव जीवः स्वपिति प्रबुद्धः।
पुरत्रये क्रीडति यश्च जीवस्ततस्सुजातं सकलं विचित्रम्।

योगवशात्, **स्वपिति** - म्रियते, स एव प्रबुद्धः अनेन स्वपितीति निर्दिष्टमरणप्रतिसंबन्धिभूतजीवनं लक्ष्यते। **पुरत्रयम्** - जाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रयम्, तत्तद्दशायां जीवाश्रयभूतप्रदेशविशेषो वा। [१]"**शरीरमास्थाय करोति सर्वम्**' इत्यनेन प्रसक्तं स्वातन्त्र्यं वारयितुमाह - [२]"**ततस्सुजातम्**' इति। सर्वाधारे आनन्दमये सर्वज्ञे यस्मिन् पुरत्रयोपलक्षितो जीवो लयं याति। तत एवास्य भोग्यभोगोपकरणभोगस्थानरूपेण तदवान्तरवैजात्येन च विचित्रं सकलमपि वस्तुजातं **सुजातम्** - सम्यगेव निष्पन्नम्। [३]"**एतस्मात्**' - तत इत्यादिना निर्दिष्टात् परमात्मनः। एतच्च जगत्कारणत्वं विशिष्टोपादानत्वात्मकमिति [४]"**तत्त्वमसि**' इतिवदुपसंहरति- [५]"**तत्त्वमेव त्वमेव तत्**' इति। एवमुपास्यमुपासकं चोक्त्वाऽहंग्रहणोपासनमुपदिशति [६]"**जाग्रत्**' इत्यादिना। [७]"**अद्वयम्**' अद्वितीयं इति सदृशद्वितीयनिषेधः।

[८]"**अनादिमायया**' इत्यनादिसिद्धदृढतरप्रकृतिसंबन्धाधीनदेहात्माभिमानेन तद्विवेकशून्यो 'देवोऽहं' 'मनुष्योऽहम्' इति भ्रान्तो, यदा तद्विवेकवान् भवति, तदा जन्मादि विकाराणां सोपाधिकत्वपरिज्ञानेन स्वतः तच्छून्यतया देवादिभेदमप्यपश्यनुक्ताकारैः समान-

---

आधारमानन्दमखण्डबोधं यस्मिंल्लयं याति पुरत्रयञ्च।। (कै.उ.१४)

[१] कै.उ.१२

[२] कै.उ.१४

[३] **एतस्मात्** जायते प्राणो मनः सर्वेन्द्रियाणि च।
खं वायुर्ज्योतिरापश्च पृथ्वी विश्वस्य धारिणी।। (कै.उ.१५)

[४] स यथा तत्र नादाह्येतैतदात्म्यमिदं सर्वं स आत्मा तत्त्वमसि श्वेतकेतो इति तद्धास्य विजज्ञाविति विजज्ञाविति। (छा.उ.६.१६.३)

[५] यत्परं ब्रह्म सर्वात्मा विश्वस्यायतनं महत्।
सूक्ष्मात्सूक्ष्मतरं नित्यं **तत्त्वमेव त्वमेव तत्**।। (कै.उ.१६)

[६] **जाग्रत्** स्वप्नसुषुप्त्यादिप्रपञ्चं यत्प्रकाशते।
तद्ब्रह्माहमिति ज्ञात्वा सर्वबन्धैः प्रमुच्यते।।
त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत्।
तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिवः।। (कै.उ.१७-१८)

[७] मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम्।
मयि सर्वं लयं याति तद्ब्रह्म **अद्वयम**स्म्यहम्।। (कै.उ.१९)

[८] **अनादिमायया** सुप्तो यदा जीवः प्रबुध्यते।
अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा।। (मा.उ.का.२.५.१६)

रूपमेवात्ममात्रं पश्यतीत्यर्थः। प्रबोधानन्तरं किं देवत्वादिभेदप्रपञ्चोऽत्र निवर्तते [१]येन सप्रबोधस्सप्रयोजनः स्यादित्यत्राह - [२]'**प्रपञ्चो यदि**' इति देवत्वादिभेदप्रपञ्चो यद्यात्मनि विद्येत तदा स तत्र निवर्तेत। न च भेदप्रपञ्चस्तत्र विद्यते, किन्तु देवत्वादिद्वैतमात्मनि मायामात्रमेव आरोपविषयमात्रमेवाद्वैतस्य ज्ञानानन्दात्मकतयैकरूपत्वस्य पारमार्थ्यात्, अतः प्रपञ्चो न निवर्तत इत्यर्थः। कथं तर्हि प्रबोधस्सप्रयोजन इत्यत्राह - [३]'**विकल्प**' इति। **विकल्पः** - विपरीतः कल्पो भ्रमः यदि केनचित् कल्पितः, उत्पादितः, स निवर्तेत एव, अतोऽत्र कल्पितो देवत्वादिभेदभ्रमो निवर्तत इति [४]भावः। '**विकल्पो यदि**' इति व्याप्तिदर्शनपरम्[५]। यद्युपबन्धस्तु शुक्तिरजतादिभ्रमस्य क्वाचित्कत्वात्, एतदपेक्षयैव इयं प्रसिद्धिरित्याह - [६]'**उपदेशात्**' इति। उपदेशादात्मस्वरूपे '**ज्ञाते द्वैतं न विद्यते**' इत्ययं वादः भ्रमनिवृत्तिनिबन्धन इति भावः। पूर्वत्र -

[७]'**बहिः प्रज्ञो विभुर्विश्वो ह्यन्तः प्रज्ञस्तु तैजसः।**
घनप्रज्ञस्तथा प्राज्ञ एक एव त्रिधा स्मृत'

इति विश्वतैजसप्राज्ञतुरीयाणां [८]पादत्वकीर्तनप्रयुक्तभेदशङ्काव्यावृत्तये[९] विश्वतैजसप्राज्ञानामेकत्वमभिधायोत्तरत्र [१०]'**सर्वं जनयति प्राणः चेतोंशून् पुरुषः पृथक्**' इति पादत्रयत्वेन कीर्तिताज्जीवात् भेदेन कीर्तनात् द्वैतपरैवेयमुपनिषत्। **पृथक् -** पृथक्भूत इत्यर्थः।

---

[१] ङ - एतेन

[२] **प्रपञ्चो यदि** विद्येत निवर्तेत न संशयः।
मायामात्रमिदं द्वैतमद्वैतं परमार्थथः।। (मा.उ.का.२.५.१७)

[३] **विकल्पो** विनिवर्तेत कल्पितो यदि केनचित्।
उपदेशादयं वादो **ज्ञाते द्वैतं न विद्यते**।। (मा.उ.का.२.५.१८)

[४] क, ग, घ, ङ, छ - अर्थः

[५] ङ, च - प्रदर्शनपरम्

[६] मा.उ.का.२.५.१८

[७] मा.उ.का.२.४.१

[८] ख - पदत्वकीर्तनप्रयुक्तात्मभेदशङ्का; ङ - पादत्वप्रयुक्तभेदशङ्का

[९] ग, घ, ङ - निवृत्तये

[१०] प्रभवः सर्वभावानां सतामिति विनिश्चयः।
सर्वं जनयति प्राणः चेतोंशून् पुरुषः पृथक्।। (मा.उ.का.२.४.६)

प्रकरणादवस्थात्रयवतः प्रतियोगितया लाभः। न च पृथग्जनयतीत्येवं पृथक्पदं क्रियाविशेषणं प्रयोजनाभावात्, किमयं [१]जीवात् भिन्नः, उताभिन्न इति जिज्ञासाया अपेक्षितविधिप्राबल्याच्च विश्वादीनां त्रयाणामेकत्वकीर्तनेन तथा तुरीयस्य विश्वादिभिः [२]अभेदाकीर्तनेन च भेदः सिद्धः।

ननु पूर्वत्र [३]'**अयमात्मा ब्रह्म**' इत्यभेदः प्रतिपन्न इति चेन्न, [४]'**यच्चान्यत् त्रिकालातीतं, तदप्योंकार एव**' इत्यादावेवात्राभेदोपदेशस्य स्तुत्यर्थत्वावगमात्। अन्यथा [५]'**सर्वं ह्येतद्ब्रह्म, अयमात्मा ब्रह्म**' इति सामानाधिकरण्यद्वयस्य मिथो वैरूप्यप्रसङ्गादेकं बाधार्थम् [६]इतरदभेदार्थम् इति। [७]'**एष सर्वेश्वर एष सर्वज्ञ एषोऽधिपतिरेषोऽन्तर्याम्येष योनिस्सर्वस्य प्रभवाप्ययौ हि भूतानाम्**' इति च सुषुप्तिस्थानस्यापि [८]सूक्ष्माहंकारोपाधिकत्वस्य त्वयाभ्युपगमेन तस्य जगत्कारणत्वासंभवात् पूर्ववाक्ये [९]'**सुषुप्तस्थान एकीभूतः प्रज्ञानघन एव**' इति श्रुत्यन्तरप्रसिद्धस्य ब्रह्मणि लयस्य प्रतिपादनात् '**एकीभूत**' इत्यत्र प्रतियोगितया लब्धं ब्रह्मैवाभिधीयते। ननु

[१०]'**अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव।**

---

[१] ख - त्रिविधाज्जीवात्

[२] ङ - अभेदात् कीर्तनेन

[३] ओमित्येतदक्षरमिदँ सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोङ्कार एव। **यच्चान्यत् त्रिकालातीतं तदप्याङ्कार एव। सर्वं ह्येतद्ब्रह्म, अयमात्मा ब्रह्म** सोयमात्मा चतुष्पात्। (मा.उ.१-२; नृ.पू.ता.उ.४.१)

[४] मा.उ.का.१.१; नृ.पू.ता.उ.४.१

[५] मा.उ.का.१.२; नृ.पू.ता.उ.४.१

[६] ग - इतरदबाधार्थम्

[७] **एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिस्सर्वस्य प्रभवाप्ययौ हि भूतानाम्**। नान्तः प्रज्ञं न बहिः प्रज्ञं नोभयतः प्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम्। अदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिन्त्य-मव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः। (मा.उ.२.४; नृ.पू.ता.उ.४.१)

[८] ग, ङ - सूक्ष्माहंकारोपाधिकस्य

[९] यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम् **सुषुप्तस्थान एकीभूतः प्रज्ञानघन** एवानन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः। (मा.उ.२.३; नृ.पू.ता.उ.४.१)

[१०] अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव।

३. जीवेश्वरैक्यभङ्गः

एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च'
इति जीवस्य प्रतिबिम्बरूपता प्रतीयते। रूपशब्दश्शरीरवाची। तथा -

[1]'**यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्।**
उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा'

इति च। तस्मात् जीवब्रह्मभेदः कथमिति चेन्न, आसां श्रुतीनां [2]सर्वव्यापितातात्पर्यकत्वात्। प्रतिबिम्बदृष्टान्तोक्तिश्च जीववदचित्संबन्धप्रयुक्तदोषाभावख्यापनाय निर्लेपत्वपराविवस्वान् [3]जलस्थतया प्रतीयमानोऽपि शैत्यादिभिर्न लिप्यते, तत्राविद्यमानत्वात्। अयं तु विद्यमानोऽप्यविद्यमानकल्प इति विवक्षितम्। [4]'**स वा एष भूतानीन्द्रियाणि विराजं देवताः कोशांश्च सृष्ट्वा प्रविश्य अमूढो मूढो इव व्यवहरन्नास्ते माययैव**' इति त्ववतारपरम्। इदञ्च [5]'**प्रकृतिं स्वामवष्टभ्य संभवाम्यात्ममायया**' इत्युपबृंहितम्। भेदे च प्रत्यक्षं तावत् प्रमाणम्। न च [6]करणासंभवः, मनस एव [7]करणत्वात्।

यदुक्तम् - प्रमाणसहकारित्वात् मनो न प्रमाणमिति, तन्न, वामदक्षिणाक्ष्णोः व्यभिचारात्। स्वविषयनिष्ठाभावप्रत्यक्षस्वविषयाभावप्रत्यक्षहेतौ परामर्शे व्यभिचारात्। गोलकद्वयावच्छिन्नचक्षुषो व्यभिचारात्। उपदेशसहकृतप्रत्यक्षजन्यावधारणज्ञानस्य चन्द्रा-

---

एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च।। (कठ.उ.२.२.९)

[1] सर्वज्ञमुनेः संक्षेपशारीरकम्.३.१५०, नृसिंहाश्रममुनेः तत्वबोधिनीव्याख्यासहिता।

[2] घ, ङ, च - सर्वव्यापित्व; ग - सर्वव्यापि

[3] ख - जलस्थितया; घ - जलमध्यस्थतया

[4] **स वा एष भूतानीन्द्रियाणि विराजं देवताः कोशांश्च सृष्ट्वा प्रविश्यामूढो मूढो इव व्यवहरन्नास्ते माययैव**। तस्मादद्वय एवायमात्मा सन्मात्रो नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरञ्जनो विभुरद्वय आनन्दः परः प्रत्येकरसः प्रमाणैरेतैरवतः सत्तामात्रं हीदं सर्वं सदेव पुरस्तात् सिद्धं हि ब्रह्म। (नृ.उ.ता.उ.९)

[5] अजोपि सन्नव्ययात्मा भूतानामीश्वरोपि सन्।
प्रकृतिं स्वामवष्टभ्य संभवात्ममायया।। (महा.भीष्म.२८.६; भ.गी.४.६)

[6] ग - कारणासंभवः

[7] ग - कारणत्वात्

लोकादिसंशयनिवर्तकत्वस्वीकारात् तत्र प्रमाणद्वये व्यभिचाराच्चाप्रयोजकत्वाच्च। देवदत्तो हि क्वचित्कार्ये यज्ञदत्तस्य सहकारी, क्वचित्कार्ये निरपेक्षकर्ता च दृश्यते, तद्वदिहापि संभवात्।

न च सन्निकृष्टार्थविषयशाब्दबोधादौ चक्षुरादेरपि सहकारित्वप्रसङ्गः, चाक्षुषत्वादिसङ्करापत्तिश्चेति वाच्यम्, व्यभिचारेण शाब्दबोधे चक्षुरादेरहेतुत्वात्। न च ज्ञानमात्रे मानसत्वप्रसङ्गः, मनोविषयसन्निकर्षस्यापि मानसज्ञानहेतुत्वात्।

न च मनसः करणत्वे एकप्रमाणपरिशेषापत्तिः, चक्षुरादेरालोकादिवत् सहकारित्वमात्रोपपत्तेः करणत्वे मानाभावादिति वाच्यम्। सन्निकर्षाभावेनाव्यापारतया मनसश्चाक्षुषादि ज्ञाने करणत्वासंभवात्। [१]'**केन कं जिघ्रेत्**' '**केन कं पश्येत्**' इत्यादिश्रुत्या चक्षुरादीनां [२]करणत्वस्य आवश्यकत्वाच्च। न च निरवयवात्मन्यव्याप्यवृत्तिसंयोगासंभवः, आत्मनि व्याप्यवृत्तित्वेऽपि दोषाभावादव्याप्यवृत्तित्वनियमस्य च सावयवमनोवृत्तित्वेनाप्युपपत्तेः।

यत्तु प्रत्यक्षयोग्यस्यानुपलब्धिः योग्यानुपलब्धिः, सात्र नास्तीति, तन्न, आत्मत्वेनैव योग्यत्वात्। न च परमात्मनो ग्रहणप्रसङ्गः संनिकर्षाभावात् मनसोऽपि बहिरस्वातन्त्र्यात् च। अत एव न परमात्मनो ग्रहणप्रसङ्गः, काचकामिलाद्युपहतचक्षुष इव रजस्तमोभ्यामुपहतस्य प्रतिबन्धादग्राहकत्वाच्च '**मनसा तु विशुद्धेन**' इत्यादि श्रुतेः।

केचित्तु - जलपरमाणौ पृथिवीत्वाभावग्रहप्रसङ्गात् नेयं योग्यतेत्याहुः। तन्न, अधिकरणप्रत्यक्षस्याप्यभावप्रत्यक्षहेतुतया तत्र तदभावादेव [३]तदग्रहोपपत्तेः। न चैवमनुद्भूतरूपस्याप्युद्भूतस्पर्शस्य स्पार्शनत्वपक्षे तप्तवारिस्थवह्नावभास्वररूपाभावग्रहप्रसङ्गः, प्रतियोगिग्राहकेन्द्रियेण[४] अधिकरणग्रहणस्य कारणत्वात्।

---

[१] यत्र हि द्वैतमिव भवति - तदितर इतरं जिघ्रति, तदितर इतरं पश्यति, तदितर इतरँ शृणोति, तदितर इतरमभिवदति, तदितर इतरं मनुते, तदितर इतरं विजानाति। यत्र वास्य सर्वमात्मैवाभूत् - तत् **केन कं जिघ्रेत्**, तत् **केन कं पश्येत्**, तत् केन कं शृणुयात्, तत् केन कमभिवदेत्, तत् केन कं मन्वीत, तत् केन कं विजानीयात्। येनेदं सर्वं विजानाति, तं केन विजानीयात्। विज्ञातारमरे केन विजानीयादिति। (बृ.उ.४.४.१४; बृ.उ.६.५.१५)

[२] क, छ - कारणत्वस्य

[३] ङ - तदग्रहणोपपत्तेः

[४] ङ - ग्राहकेन्द्रियाणाम्

३. जीवेश्वरैक्यभङ्गः

न चैवं वायौ रूपाभावस्याचाक्षुषत्वप्रसङ्गः, इष्टापत्तेः। न चैवं चक्षुरन्वय-व्यतिरेकानुविधानानुपपत्तिः, चक्षुस्संनिकर्षस्य लिङ्गत्वात्, सत्यपि सन्निकर्षे रूपाग्रहणे सत्येव हि तादृशानुपलब्ध्या रूपाभावानुमानम्।

न च [१]लिङ्गाग्रहे अपि रूपाभावग्रहात् रूपाभावः प्रत्यक्ष इति वाच्यम्। एवं सति यस्य पुरुषस्यान्धकारे प्राथमिकं वायुज्ञानं तस्य स्मृत्युपनीते पुरतस्सन्निकृष्टे वायौ रूपाभावग्रहप्रसङ्गात्। यदि त्वचैवोपनयोऽपेक्षित इत्युच्येत, तदाप्तवाक्यशाखा-चलनादिभिः पुरतो ज्ञाते वायौ रूपाभावग्रहप्रसङ्गात्। यदि चक्षुः सन्निकृष्टत्वज्ञानमेव कारणम्, तच्च त्वचाऽन्येन वेति न नियम इत्युच्यते, तदा पृष्ठतः सन्निकृष्टत्वभ्रमे पुरतः सन्निकृष्टे वायौ रूपाभावग्रहप्रसङ्गः। यदि पुरतस्सन्निकृष्टत्वज्ञानमपेक्षितमित्युच्येत तदा पृष्ठलग्ने वायौ [२]तिर्यगवेक्षणेन रूपाभावग्रहस्यासिद्धिप्रसङ्गात्। यदि मुखाभिमुख्यमेव पुरतश्शब्दार्थ इत्युच्येत तदा मुखाभिमुख्यग्रहे सति चक्षुः सन्निकृष्टत्वाभावभ्रमदशायां रूपाभावग्रहप्रसङ्गः। यदि चक्षुराभिमुख्यग्रहणमपेक्षितम्, यदि च चक्षुः सन्निकृष्टत्वज्ञानं कारणम् इत्युच्येत, स्पष्टमेव तर्हि लिङ्गग्रहणमुपपादितम्।

न चेन्द्रियसंनिकृष्टत्वज्ञानं सहकारिप्रत्यक्षमात्रे अभावप्रत्यक्षमात्रे वा तदसिद्धेः। नापि रूपाभावप्रत्यक्षे, नीलघटे पीतत्वाभावस्य तेन विनैव ग्रहणात्। एतेन पिशाचान्योऽन्याभावोऽपि व्याख्यातः, तस्याप्यनुमेयत्वात्। न हि पिशाचशब्दार्थः कश्चिदस्तीति ज्ञानमात्रेण तदन्योऽन्याभावग्रहः, किन्त्वतीन्द्रियत्वादिवैधर्म्यग्रहे सत्येव। अतो तदा नियमेन वैधर्म्यग्रहस्यापेक्षितत्वादनुमानमेव। एतेन घटे मनस्त्वाभावग्रहोऽपि व्याख्यातः, तत्राप्यणुत्वेन्द्रियत्वादि वैधर्म्यग्रहनियमात्।

न चोक्तसामग्र्याऽभावग्रहे[३] विलीनघृते गन्धाग्रहदशायामपि तैलत्वात्यन्ताभावतैल-भेदयोः [४]ग्रहप्रसङ्गः, अत्यन्तसादृश्येन विशेषादर्शनदशायां संशयसामग्र्यास्सत्वेन

---

[१] क, ख - लिङ्गग्रहे; ङ - लिङ्गाग्रहणे

[२] ग - तिर्यगवेक्षमाणेन

[३] क - सामग्र्याऽभावे ग्रहे; ग - सामग्र्यभावे ग्रहे

[४] ख - ग्रहत्वप्रसङ्गः

संशयस्यैवोत्पत्तेः। न चाधिकरणप्रत्यक्षाभावात् शब्दाभावप्रत्यक्षानुपपत्तिः बाधिर्यमज्ञातवतो बधिरस्येव अनुमेयत्वात्। तदधिकरणकाभावप्रत्यक्षे तत्तदधिकरणप्रत्यक्षस्य हेतुत्वाद्वा।

यत्तु यत्र यत्सत्त्वमनुपलब्धिविरोधीत्यत्र दूषणं तन्न। यत्कर्तृकप्रमापादयितुं शक्या तं प्रतियोग्यत्वमापादनञ्च येन केनचित्। एवञ्च आपादकस्यैव व्याप्तिज्ञानमिति न तेनापाद्यप्रमाकर्तुरभावानुमितिसंभवः। यत्त्वतीन्द्रियप्रतियोगिकाभावे प्रतियोग्युपलम्भापादनं न संभवति, तस्य धर्मिणोऽप्यप्रत्यक्षतापादकत्वादिति, तन्न। अन्यापादनाभावे प्रतियोग्युपलम्भापादकत्वस्य विवक्षितत्वात्। न ह्येतदनुपलम्भापादकसत्त्वेऽपि नास्ति, न वा मनसि घटत्वापादनेऽस्ति। प्रतियोगितद्व्याप्येतरसकलप्रतियोग्युपलम्भकसमवधानस्थलीयानुपलब्धिः योग्यानुपलब्धिरित्यत्रापि न दोषः, [१]आत्मत्वेन एव मनोयोग्यत्वात्।

न चातीन्द्रियप्रतियोगिकाभावे प्रतियोग्युपलम्भकाप्रसिद्धिः, प्रतियोग्युपलम्भकपदेन प्रतियोगिवृत्तिधर्मघटितधर्मावच्छिन्नकार्यतानिरूपितकारणताश्रयस्य विवक्षितत्वात्। अस्ति हि घटाभावप्रत्यक्षे अभावचाक्षुषज्ञानत्वं कार्यतावच्छेदकम्, तदवच्छिन्नकारणमालोकः। जन्यप्रत्यक्षत्वं कार्यतावच्छेदकम्, तदवच्छिन्नकारणमिन्द्रियम्। जन्यविशिष्टज्ञानत्वं कार्यतावच्छेदकम्, तदवच्छिन्नकारणं विशेषणज्ञानं जन्यज्ञानत्वावच्छिन्नं प्रति मनः प्रभृतिः, जन्यत्वावच्छिन्नं तमेव प्रतिकालादि। वायौ रूपाभावादिसाक्षात्कारे तु रूपसाक्षात्कारत्वं कार्यतावच्छेदकम्, महत्वं कारणमित्यादि। [२]पिशाचत्वात्यन्ताभावग्रहे पिशाचत्ववृत्तिधर्मो जातित्वम्, तद्घटितकार्यतावच्छेदकं जातिप्रत्यक्षत्वम्, तत्कारणं योग्यवृत्तिवृत्तित्वमित्यादि। यद्वा या यत्र [३]प्रतियोगिव्यतिरेकप्रयुक्तानुपलब्धिः सा तत्राभावग्राहिका। अस्ति चैतत् घटे मनस्त्वाभावग्रहे वायौ रूपाभावग्रहे, स्तम्भे पिशाचान्योऽन्याभावग्रहे च। न तु जलपरमाणौ पृथिवीत्वाभावे, वायावनुद्भूतरूपाभावे, आत्मनि धर्माभावे, मनसि घटत्वाभावे वास्ति। तत्राधिकरणमहत्त्वाभावप्रतियोग्युद्भूतत्वाभावादीनां प्रयोजकत्वात्।

यदुक्तम् - सहकार्यभावात् प्रतिबन्धकाच्चानुपलम्भसंभवान्न योग्यानुपलब्धिरिति, तन्न, [४]आचार्योपदेशो नात्मस्वरूपप्रत्यक्षे ईश्वरस्वरूपाभेदप्रत्यक्षे वा सहकारि, तदभावेऽपि 'अहं सोऽहम्' इत्युपलम्भात्। नापीश्वरत्वावच्छिन्नाभेदप्रत्यक्षे, तदवच्छिन्नाभेदप्रत्यक्षस्य

[१] ग - आत्मत्वादिना

[२] घ, ङ, च - पिशाचात्यन्ताभावान्योऽन्याभावाग्रहे

[३] ग, घ, ङ - प्रतियोगिव्यतिरिक्त

[४] ख, ग - आचार्योपदेशे

कदापि [1]असिद्ध्या तत्र सहकारित्वाकल्पनात्, श्रवणाद्यनन्तरभावितत्पदलक्ष्याभेदप्रत्यक्ष एवाचार्योपदेशश्रवणादीनां हेतुत्वस्य स्वीकारात्। अपि च यदि सर्वज्ञाभेदः स्यात् तदा तत्प्रत्यक्षस्यावश्यकत्वेनाचार्योपदेशादीनां सहकारित्वस्यैवानुपपत्तिः। तत्तत् ज्ञानवदभेदस्य तेन तेनोपलभ्यमानत्वात्, एतेन प्रतिबन्धकादग्रहणमित्यपि निरस्तम्।

यत्तु ईश्वरत्वविकल्पेनानुपलब्धिदूषणम्, तत्रास्तु तावत् [2]द्व्यणुककर्तृत्वम्। न च द्व्यणुकस्यातीन्द्रियत्वात् सुकृत्यभेदवत् तदभेदानुपलम्भसंभव इति वाच्यम्। अतीन्द्रियत्वेऽपि धर्मम् जानामि धर्ममिच्छामि द्व्यणुकं जानामीतिवत् कृतेरैन्द्रियकत्वेन तद्विशिष्टाभेदोपलम्भसंभवात्, नित्यसर्वविषयापरोक्षत्वं वा[3] ईश्वरत्वं, तद्विशिष्टाभेदश्च [4]उपलभ्येत एव। सर्वविषयापरोक्षेण ज्ञाननित्यत्वस्यापि विषयीकरणात्। यत्तु ज्ञाने सर्वविषयकत्वनित्यत्वभ्रमवतः तद्वदभेदानुपलम्भो नास्तीति, तन्न, तादृशभ्रमासंभवात्। किञ्च सर्वविषयसाक्षात्कारवत्त्वस्यायोगिभिस्सर्वैश्च विशिष्टाभेदस्यानुपलम्भादीश्वरभेदस्सिध्यति।

यदुक्तम् - सोपाधिकस्थो भेदोऽयमिति, तन्न, तावज्जीवस्याणुत्वेन स्वतः परिच्छिन्नतया तदर्थमुपाधिसंसर्गस्य [5]अकल्प्यत्वात्। तच्च [6]**उत्क्रान्तिगत्यागतिश्रुतिभिः** [7]'**एषोऽणुरात्मा चेतसा वेदितव्यः**' [8]'**बुद्धेर्गुणेनात्मगुणेन चैव ह्याराग्रमात्रो ह्यवरोऽपि दृष्टः**'

[9]'**वालाग्रशतभागस्य शतधा कल्पितस्य च।**

---

[1] ग, घ, ङ, च - असिद्धौ

[2] घ, ङ - द्व्यणुकादिकर्तृत्वम्

[3] ख - च; क - एव

[4] क, ग, घ, ङ -उपलभ्यते

[5] च - अकल्पित्वात्; ख - अकल्पनात्

[6] उत्क्रान्तिगत्यागतीनाम् (ब्र.सू.२.३.२०)

[7] **एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चधा संविवेश।**
प्राणैश्चित्तं सर्वमोतं प्रजानां यस्मिन् विशुद्धे विभवत्येष आत्मा।। (मु.उ.३.१.९)

[8] अङ्गुष्ठमात्रो रवितुल्यरूपः संकल्पाहङ्कारसमन्वितो यः।
बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रो ह्यवरोऽपि दृष्टः।। (श्वे.उ.५.८)

[9] श्वे.उ.५.९

भागो जीवस्सः विज्ञेयस्स चानन्त्याय कल्पत'
इत्यादिभिश्श्रुतिभिश्च सूत्रकारैरेव साधितम्। न च '**एषोऽणुरात्मा**' इति परमात्मन एवाणुत्वं दुर्दर्शत्वं प्रतिपाद्यते। [1]'**न चक्षुषा गृह्यते**' इत्यादिनानन्तरपूर्ववाक्ये प्रकृतत्वात्, वेदितव्यत्वलिङ्गाच्चेति वाच्यम्। [2]'**यस्मिन् प्राणः पञ्चधा संविवेश**' इति यच्छब्दयोगेनैतच्छब्दस्य वक्ष्यमाणपरामर्शित्वात्।

न च तत्रापि परमात्मैव प्रतिपाद्यत इति वाच्यम्। न हि [3]'**यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः**' इतिवत् सर्वाधारत्वमिह प्रतिपाद्यते, किन्तु जीवासाधारणप्राणचित्तेन्द्रियाधारत्वम्, अतो जीवपरत्वमेवास्य युक्तम्। न च वेदितव्यत्व-लिङ्गविरोधः, नियन्तृनियाम्यवैलक्षण्यज्ञानस्यामृतत्वसाधनत्वादविरोधात्। इह च पूर्वं [4]'**बृहच्च तद्दिव्यमचिन्त्यरूपम्**' इति परमात्मनो महत्वमुक्त्वा, '**एषोऽणुरात्मा**' इति जीवे तद्वैलक्षण्यप्रतिपादनात्। '**बुद्धेर्गुणेनात्मगुणेन**' इत्यत्र च बुद्धेर्गुणेनाराग्रमात्रः आत्म-गुणेन [5]महानिति नार्थः। व्यवहितान्वयकल्पनाप्रसङ्गात्, अध्याहारप्रसङ्गात्। 'चैव' इति समुच्चयार्थनिपातानन्वयाच्च। एवञ्च '**बुद्धेर्गुणेन**' इत्यनेन स्वरूपधर्मभूतज्ञानयोः सूक्ष्मत्वं प्रतिपाद्यते। '**वालाग्र**' इत्यनन्तरश्लोके स्वरूपतोऽणुत्वं प्रतिपाद्यते। न चात्मनोऽणुत्वे जगदान्ध्यप्रसङ्गः, धर्मभूतज्ञानेनैव जगतः प्रकाशात्। न च सर्वाङ्गीणसुखाद्यनुपपत्तिः, तस्यैव धर्मभूतज्ञानस्य तत्तत् देहदेशव्यापिसुखादिपरिणामोपपत्तेः।

न च गुणत्वादन्यत्र वृत्त्यसंभवः, [6]'**प्रज्ञा च तस्मात् प्रसृता पुराणी**' [1]'**तदास्य क्षरति प्रज्ञा दृतेः पादादिवोदकम्**' इत्यादिना द्रव्यत्वावगमात्। द्रव्यत्वेऽपि प्रभाया इव

---

[1] **न चक्षुषा गृह्यते** नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा।
ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः।। (मु.उ.३.१.८)

[2] मु.उ.३.१.९

[3] **यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः**।
तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथामृतस्यैष सेतुः।। (मु.उ.२.२.५)

[4] **बृहच्च तद्दिव्यमचिन्त्यरूपं** सूक्ष्माच्च तत् सूक्ष्मतरं विभाति।
दूरात् सुदूरे तदिहान्तिके च पश्यत्स्विहैव निहितं गुहायाम्।। (मु.उ.३.१.७)

[5] ग - महसीति

[6] यदातमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवलः।
तदक्षरं तत्सवितुर्वरेण्यं **प्रज्ञा च तस्मात् प्रसृता पुराणी**।। (श्वे.उ.४.१८)

सजातीयद्रव्यान्तराश्रितत्वतदपृथक्सिद्धत्ववदेशान्तरव्याप्त्यादिकमुपपद्यते। तदेतत् [२]'**गुणाद्वा आलोकवत्**' इति सूत्रकारैरेवोक्तम्। तथा च शौनकवचनम् -

[३]'**यथा न क्रियते ज्योत्स्ना मलप्रक्षालनान्मणेः।**
दोषप्रहाणान्न ज्ञानमात्मनः क्रियते तथा' इत्यादि[४] ।

अतः स्वतःपरिच्छिन्नत्वान्न तदर्थमुपाधिकल्पना। अस्तु वा सोपाधिकः परिच्छेदः, अथापि शरीरमेव परिच्छेदोपाधिः स्यात्, दुःखादेस्तत्राभावात् तत्प्रत्ययो निर्दुःखादिभेदप्रत्ययश्च स्वरूपगोचर एव। अस्तु वान्तःकरणस्य परिच्छेदोपाधित्वम्, अथापि भेदप्रतीतिर्न तन्निष्ठा, मानाभावात्। [५]'**नाहमीश्वर**' इति सोपाधिकसामानाधिकरण्यात् तन्निष्ठत्वमिति चेत्, 'स्थूलोऽहं जानामि' इति शरीरोपाधिकसामानाधिकरण्येऽपि ज्ञातृत्वस्याहमर्थनिष्ठत्वात्। तस्माद्भेदाध्यक्षप्रमितेः स्वरूपगोचरत्वे न किञ्चित् बाधकमिति।

श्रुतिरपि [६]जीवेशभेदे प्रमाणम्। तत्र यदुक्तम् [७]'**मानान्तरप्रसिद्धत्वात्**' इत्यादिना। तत्र मानान्तरप्रसिद्धत्वाद्भेदस्य न तत्र श्रुतिः प्रमाणमिति, अत्र किमिदमप्रामाण्यम्, किं वा सापेक्षत्वम्, किं वा भ्रमजनकत्वमुत तात्पर्याभावः। नाद्यः, पुरुषद्वयप्रत्यक्षयोरिव श्रुति-प्रत्यक्षयोः समानविषयतामात्रेण परस्परसापेक्षत्वासिद्धेः। न द्वितीयः, पुरुषद्वयप्रत्यक्षवदेव श्रुतिप्रत्यक्षयोरन्यतराप्रामाण्यासिद्धेः[८]। मानान्तरसंवादो हि प्रामाण्यमेव साधयति। न

1

[२] ब्र.सू.२.३.२६.

[३] वि.ध.पु.१०४.५५

[४] यदोदपानकरणात् क्रियते न जलाम्बरम्।
सदेव नीयते व्यक्तिमसतः सम्भवः कुतः।।
तथा हेयगुणध्वंसादवबोधादयो गुणाः।
प्रकाशन्ते न जन्यन्ते नित्या एवात्मनो हि ते।। (वि.ध.पु.१०४.५६-५७)

[५] **नाहमीश्वर** इत्येतत् प्रत्यक्षं सर्वसम्मतम्।
न भ्रान्तिर्बाधविरहान्न वा तद्धेतुसंभवः।। (नृसिंहाश्रममुनेः भेदधिक्कारः.५.प.८)

[६] क, ख, च, छ - जीवभेदे

[७] **मानान्तरप्रसिद्धत्वात्** मिथ्यात्वादप्रयोजनात्।
श्रुत्यन्तरविरोधाच्च न श्रुतिर्भेदगोचरा।। (नृसिंहाश्रममुनेः भेदधिक्कारः.१०,पृ.४८)

[८] क, ख, घ, छ - सिद्धिः

तृतीयः, मानान्तरसंवादस्य प्रामाण्याश्वासहेतुत्वेन तस्य तात्पर्याभावहेतुत्वासिद्धेः। मानान्तरसिद्धार्थबोधने प्रयोजनाभावात् न तत्र प्रामाण्यमिति चेन्न, प्रयोजनाभावेऽपि प्रत्यक्षादेः प्रामाण्यदर्शनात्।

ननु सर्वज्ञं भगवन्तमारभ्याद्य यावत् स्वरवर्णक्रमाभ्रंशेन नियमाध्ययनाध्यापन-धारणादिभिर्महता प्रयत्नेन प्रवर्त्यमानो वेदो लेशतोऽपि न व्यर्थीभवितुमर्हतीति चेन्न, जपादिप्रयोजनस्य निष्प्रत्यूहत्वात्। न च तत् प्रयोजनं स्वभाविकमर्थपरत्वं विहन्ति। किञ्च परमपुरुषार्थस्योपासनाप्रीतभगवदधीनत्वात् भेदबुद्ध्यभावे तदुपासनासंभवात् भेदबुद्धिः परमपुरुषार्थोपयोगिनी। भेदस्य प्रत्यक्षसिद्धत्वात् तस्यैवायं पुरुषार्थः स्यादिति चेत्, परमपुरुषार्थोपयोगिभेदप्रतिपादनाविशेषे तस्यैवेति कुतो निर्णीयते। अपि च भेदस्य प्रत्यक्षसिद्धत्वेऽपि कस्यचित् भेदप्रत्यक्षस्य बाधितत्वदर्शनेन जीवेशभेदप्रत्यक्षेऽप्यनाश्वास-प्रसङ्गे तन्निवृत्तये निर्दोषश्रुत्या भेदप्रतिपादनं युक्तमेव।

किञ्च कुदृष्ट्यापादितभेदमिथ्यात्वनिरसनमपि प्रयोजनं घटत एव, [१]'**तद्धैक आहुरसदेवेदमग्र आसीत्**' इति वादिनिरसनमपि हि दृश्यते। किञ्च भेदवाक्यापातप्रतीत्या भेदशास्त्रप्रवृत्तिवारणार्थमद्वितीयात्मश्रवणनियम इति त्वदुक्तरीत्यैवाद्वैतवाक्यापातप्रतीत्या अद्वैतशास्त्रप्रवृत्तिबाधनार्थं भेदश्रुतिभिः तत्प्रतिपादनमिति किं न स्यात्। किञ्च श्रुतिं विना सर्वनियन्तुर्जगदुपादानस्य वस्तुनोऽनुपस्थितेः। तत्र स्वभेदस्य श्रुत्यैव प्रतीतिः। अपि च वैधर्म्यमेव हि भेदः, ततश्च जीवे किञ्चिज्ज्ञत्वदुःखाकरत्वादिरूपवैधर्म्यस्य प्रत्यक्षत्वेऽपि कर्मवश्यत्वसृज्यत्वपाल्यत्व नियाम्यत्वशेषत्वशरीरत्वादिधर्माणां परमात्मनि नियामकत्वादि सर्ववैधर्म्याणाञ्च मानान्तराप्राप्तत्वात् तेषामेव श्रुतौ प्रतिपादनात्, तत्र न कश्चित् क्षुद्रोपद्रवः।

किञ्च कस्या अपि भेदश्रुतेः [२]व्यर्थानुवादतया भेदे तात्पर्याभाव उच्यते। न तावत् [३]'**द्वा सुपर्णा**' इति श्रुतेः, तत्र भेदप्रतिपादनस्यानशनार्थत्वात्। नापि [४]'**समाने वृक्षे**' इति

---

[१] सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्।
तद्धैक आहुरसदेवेदमग्र आसीत् एकमेवाद्वितीयं तस्मादसतः सज्जायत। (छा.उ.६.२.१)

[२] ग - व्यर्थानुवादकतया

[३] **द्वा सुपर्णा** सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति।। (श्वे.उ.४.६; मु.उ.३.१.१)

[४] **समाने वृक्षे** पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः।

श्रुतेः, [१]विशोकतानिमित्तदर्शनविषयताप्रतिपादनार्थत्वात्। नापि [२]'**पृथगात्मानम्**' इति श्रुतेः, भेदज्ञानस्य मोक्षोपायता प्रतिपादनार्थत्वात्। [३]'**अन्योऽन्यतर आत्मानन्दमय**' इत्यस्य '**य एवं वित्**' इत्यादिना भेदज्ञानान्मोक्षप्रतिपादनार्थत्वात्। [४]'**तस्मिंश्चान्यो मायया संनिरुद्ध**' इत्यस्यापि '**पृथगात्मानम्**' इति श्रुत्यनुरोधेन [५]मोक्षाय ज्ञातव्यपार्थक्य-प्रतिपादनार्थत्वात्, एवं सर्वत्र स्पष्टम्। औपाधिकत्वेन मिथ्यात्वात्, भेदो न शास्त्रप्रतिपाद्य इत्यपि न, परिच्छेदार्थमुपाधिकल्पनस्य निरस्तत्वात्। यत्त्वप्रयोजनत्वाद्भेदे न शास्त्र-तात्पर्यमिति, तन्न, प्रयोजनस्योक्तत्वात्।

यत्तु - भेदज्ञानस्य विपरीतफलं श्रूयत इति, तन्न, असिद्धेः। [६]'**उदरमन्तरं कुरुत**' इति श्रुतेस्तावत् एतस्मिन्नात्मनि, **उत्** - अपि तु, **अरम्** - अल्पम्, अल्पमपि, **अन्तरं** - भेदं, भेदाभेदमपि यः कुरुते, **अथ तस्य भयं** - जन्मादिभयं, भ**वतीति** नार्थः। [७]'**यदा ह्येवैष**' इति पूर्ववाक्योक्ताभयहेतुप्रतिष्ठाप्रतिकोटिभूतो ह्यन्तरशब्दार्थो वाच्यः, प्रतिष्ठा शब्दस्य च नैक्यमर्थः, लक्षणायां स एव दोषः। लाभार्थं विन्दतिधात्वस्वारस्यञ्च। ऐक्यस्य च नित्यप्राप्ततया ज्ञानलक्षणाया वाच्यत्वात् सप्तम्यस्वारस्यञ्च, ब्रह्मण ऐक्य-प्रतियोगित्वविवक्षायां तृतीयाप्रसङ्गात्, स्वप्रतियोगिकैक्याधारत्वविवक्षायां 'स्वस्य'

जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः।। (श्वे.उ.४.७; मु.उ.३.१.२)

[१] ग, ङ - वीतशोकता

[२] सर्वाजीवे सर्वसंस्थे बृहन्ते अस्मिन् हंसो भ्राम्यते ब्रह्मचक्रे।
पृथगात्मानं प्रेरितारञ्च मत्वा जुष्टस्ततस्तेनामृतत्वमेति।। (श्वे.उ.१.६)

[३] तस्यैष एव शारीर आत्मा यः पूर्वस्य तस्माद्वा एतस्माद्विज्ञानमयः **अन्योऽन्तर आत्मानन्दमयः** तेनैष पूर्णः स वा एष पुरुषविध एव। तस्य पुरुषविधः तस्य प्रियमेव शिरः मोदोदक्षिणः पक्षः प्रमोद उत्तरः पक्षः आनन्द आत्मा ब्रह्म पुच्छं प्रतिष्ठा तदप्येष श्लोको भवति। (तै.उ.२.५)

[४] छन्दांसि यज्ञाः क्रतवो व्रतानि भूतं भव्यं यच्च वेदा वदन्ति।
अस्मान्मायी सृजते विश्वमेतत् **तस्मिंश्चान्यो मायया संनिरुद्धः**।। (श्वे.उ.४.९)

[५] ग - मोक्षोपायज्ञातव्यपदार्थ; घ - मोक्षाय ज्ञातव्यपदार्थ; च - मोक्षाय ज्ञातव्यार्थस्य

[६] **यदा ह्येवैष** एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते अथ सोऽभयं गतो भवति। यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते, अथ तस्य भयं भवति तत्त्वेव भयं विदुषो मन्वानस्य तदप्येष श्लोको भवति। (तै.उ.२.७)

[७] तै.उ.२.७

इत्यध्याहारः। प्रतिष्ठाशब्दस्याभेदपरत्वाभावात् नान्तरशब्दो भेदपरः। तथा सति करोतेर्ज्ञानपरत्वेनास्वारस्यम्।

तस्मादयमर्थः - प्रतिष्ठाशब्दो [१]दृढसंबन्धवचनः, तस्य चोपास्योपासकभावलक्षण-संबन्धविशेषपर्यवसानं युक्तम्। स्वरूपतः [२]प्रतिष्ठितत्वस्य नित्यसिद्धत्वात्। [३]'**ब्रह्म-संस्थोऽमृतत्वमेति**', [४]'**श्रोत्रियं ब्रह्मनिष्ठम्**', [५]'**तन्निष्ठस्य मोक्षोपदेशात्**' इत्यादि प्रयोग-दर्शनादन्तरशब्दोऽपि तत्प्रतिकोटिभूतार्थपरो वाच्यः, स च विच्छेदः। तत्परत्वञ्च निरन्तरं सान्तरमित्यादि प्रयोगाद्युक्तम्। अतो ब्रह्मोपासनान्मोक्षः, तद्विच्छेदाच्च संसार इति वाक्यार्थः।

[६]'**नेह नानास्ति किञ्चन**' इत्यत्रापि नानाशब्दो विनार्थः, [७]'**विनञ्भ्यां नानाञौ न सह**' इति [८]सूत्रेण विनार्थे व्युत्पादनात्, [९]'**पृथग्विनान्तरेणर्ते हिरुङ्नाना च वर्जने**' इत्यमरोक्तेश्च। ततश्च ब्रह्मणः पृथग्भूतं स्वनिष्ठं वस्तु नास्तीत्यर्थः। अथ [१०]'**येऽन्यथातो**

---

[१] घ, ङ - दृढतरसंबन्धवचनः

[२] क, घ, छ - प्रतिष्ठितस्य

[३] त्रयो धर्मस्कन्धा यज्ञोध्ययनं दानमिति प्रथमः, तप एव द्वितीयः, ब्रह्मचर्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलवसादयन्। सर्व एते पुण्यलोका भवन्ति। **ब्रह्मसंस्थोऽमृतत्वमेति**। (छा.उ.२.२३.१)

[४] परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात् नास्त्यकृतः कृतेन।
तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः **श्रोत्रियं ब्रह्मनिष्ठम्**।। (मु.उ.१.२.१२)

[५] ब्र.सू.१.१.७

[६] मनसैवानुद्रष्टव्यं **नेह नानास्ति किञ्चन**। मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति।। (बृ.उ.४.४.१९)

[७] पा.सू.५.२.२७

[८] ग - सूत्रेऽपि

[९] अ.को.३.१३१

[१०] अथात आत्मादेश एवात्मैवाधस्तादात्मोपरिष्ठादात्मा पश्चादात्मा पुरस्तादात्मा दक्षिणत आत्मोत्तरत आत्मैवेदँ सर्वमिति। स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड् भवति तस्य सर्वेषु लोकेषु कामचारो भवति। अथ **येऽन्यथातो विदुः** अन्यराजानस्ते क्षय्यलोका भवन्ति तेषाँ सर्वेषु लोकेष्वकामचारो भवति। (छा.उ.७.२५.२)

विदुः' इत्यत्रापि न भेदज्ञाननिन्दापरत्वम्, भूमविद्याया अभेदपरत्वस्य [१]अहमर्थात्मसमर्थने निरस्तत्वात्। अतः स्वनिष्ठत्वेन ज्ञाने [२]'**एवमेवामुत्र पुण्यचितो लोकः क्षीयते**' इति [३]क्षय्यलोककारणत्वेनोक्तकर्मवश्यत्वरूपमन्यराजत्वं स्यादित्यर्थः। अथ [४]'**योऽन्यां देवतामुपास्ते**' इत्यत्रापि स्वातन्त्र्यज्ञाननिन्दापरम्। न चैवं लक्षणाप्रसङ्गः, अहमन्य इति ज्ञानं ह्यहंबुद्धेः स्वपर्यवसायित्व एव स्यात्। अतोऽहंबुद्धेः परमविशेष्यभूतब्रह्म-पर्यन्तत्वाभावात् न जानातीति निन्द्यते। तस्मात् [५]'**पृथगात्मानम्**' इति भेदज्ञानस्य मोक्षसाधनत्वोपदेशात् न केनापि वाक्येन तन्निन्दासंभवः। श्रुत्यन्तरविरोधान्न भेदः श्रुत्यर्थ इत्यपि न। [६]'**अदृष्टो द्रष्टा**' इत्यन्यादृष्टस्य नियन्तुः द्रष्टुः [७]प्रकृतत्वेन तादृशस्यैव द्रष्ट्रन्तरस्य निषेधात्। अन्यथा प्रमाणान्तरविरोधात्। यथा अस्मिन् ग्रामे देवदत्त एव पुरुषो नान्य [८]इत्युक्ते पुरुषमात्रं न निषिध्यते, किन्तु नैवंविधोऽन्यः पुरुष इति बुद्धिस्थस्वातन्त्र्यादिविशिष्टपुरुषान्तरं निषिध्यते। किञ्च '**नान्योऽतोऽस्ति द्रष्टा**' इत्येतावता द्रष्ट्रन्तरनिषेधसिद्धौ अतश्शब्देन विशिष्टपरामर्शो विशिष्टान्यनिषेधार्थ एव।

---

[१] ख - अहमर्थस्यात्मनि समर्थने; घ - अहमर्थात्मत्वसमर्थने; च - अहमर्थात्मत्वसमर्थनेन

[२] तद्यथेह कर्मचितो लोकः क्षीयते, **एवमेवामुत्र पुण्यचितो लोकः क्षीयते**। तद्य इहात्मानमनुविद्य व्रजन्त्येताँश्च सत्यान् कामान्, तेषाँ सर्वेषु लोकेष्वकामचारो भवति। अथ य इहात्मानमनुविद्य व्रजन्त्येताँश्च सत्यान् कामान्, तेषाँ सर्वेषु लोकेषु कामचारो भवति।। (छा.उ.८.१.६)

[३] ख - क्षयस्य लोके

[४] अथ **योऽन्यां देवतामुपास्ते** अन्योऽसावन्योऽहमस्मीति, न स वेद। यथा पशुरेवँ स देवानाम्। यथा ह वै बहवः पशवो मनुष्यं भुंज्युः, एवमेवैकैकः पुरुषो देवान् भुनक्ति। एकस्मिन्नेव पशावादीयमानेऽप्रियं भवति किम् बहुषु? तस्मादेषां तन्न प्रियम्, यदेतन्मनुष्या विद्युः। (बृ.उ.३.४.१०)

[५] श्वे.उ.१.६

[६] **अदृष्टो द्रष्टा**ऽश्रुतश्श्रोताऽमतो मन्ताऽविज्ञातो विज्ञाता **नान्योऽतोऽस्ति द्रष्टा**, नान्योऽतोऽस्ति श्रोता, नान्योऽतोऽस्ति मन्ता, नान्योऽतोऽस्ति विज्ञाता। एष त आत्माऽन्तर्याम्यमृतः। अतोऽन्यदार्तम्। ततो होद्दालक आरुणिरुपरराम। (बृ.उ.५.७.२७)

[७] ङ - प्रकृतत्वात्

[८] अन्येषु कोशेषु - इत्यत्र

ननु समानद्रष्टृनिषेधे '**नान्योऽतोऽस्ति श्रोता**' इत्यनुपपन्नम्, ब्रह्मणि श्रवण-मननादेरसंभवात्, जीवाभेदपरत्वन्तु श्रवणादेर्जीवगतत्वाद्युक्तमेव। '**अदृष्टो द्रष्टा**' इति पूर्ववाक्येऽपि जीवाभेदपरत्वादेव श्रवणादिकीर्तनमिति चेन्न, अन्यो द्रष्टा नास्तीत्यनेनास्य द्रष्टृत्वं [१]प्रतीयते, त्वदनिष्टञ्च तत्। अतः शब्दास्वारस्यञ्च दर्शितमेव। अस्ति पदास्वारस्यञ्च, स्वरूपनिषेधे तस्य स्वारस्यादभेदपरत्व हि भवतीति हि भवितव्यम्। [२]"**य आत्मनि तिष्ठन्**' [३]"**एष त आत्मान्तर्याम्यमृत**' इति च [४]पूर्वं भेदप्रतिपादनेन स्वप्रकरण-विरोधात्, '**एष त आत्मान्तर्याम्यमृत**' इति वाक्यशेषविरोधात्, प्रतिपर्यायं '**एष त आत्मान्तर्याम्यमृत**' इत्यत्यादरेण व्यतिरेककीर्तनेन कृत्स्नस्यापि प्रकरणस्य [५]भेद-तात्पर्यावगमेन महावाक्यतात्पर्यविरोधाच्च, नैतद्वाक्यमभेदपरम्।

न च '**एष त आत्मा**' इत्यात्मशब्द स्वरूपपरः षष्ठ्योपचरितार्थत्वप्रसङ्गात्, आत्मशब्दस्यापि शरीरप्रतिसंबन्धिन्यात्मन्येव स्वारस्याच्च। श्रवणाद्युपपत्तिः कथमिति चेत्, पूर्वत्र हि प्रतिपर्यायं नियन्तृत्वमुपपादिम्, तदपेक्षितं ज्ञातृत्वं द्रष्टेत्यादिना प्रतिपाद्यते। पूर्वं [६]"**यमात्मा न वेद**' इति ब्रह्मवेदननिषेधात् ब्रह्मज्ञानान्मोक्षश्रुत्यनुपपत्तिः, '**एष त आत्मा**' इत्याद्युपदेशवैयर्थ्यञ्चेति शङ्कायां '**अदृष्ट**' इत्यादिना निषेधतात्पर्यमुच्यते। **अदृष्टः** - रूपादिसाक्षात्कारागोचरः, अचक्षुर्विषय इति यावत्। **अश्रुतः** - शब्दसाक्षात्कारागोचरः, श्रोत्राग्राह्य इति यावत्। **अमतः** - मानसमननाख्यविचाराविषयः अप्रतर्क्य इति यावत्। **अविज्ञातः** - बुद्धिकार्याध्यवसायो विज्ञानम्, तदविषयः, दुरध्यवसायः। **द्रष्टा** - रूप-साक्षात्कारकर्ता, **श्रोता** - शब्दसाक्षात्कारवान्, **मन्ता** - विचार्यगोचरसाक्षात्कारवान्, **विज्ञाता** - अध्यवसेयसाक्षात्कारवानित्यर्थः। अन्यथा द्रष्टा श्रोतेत्यादेः श्रवणमननादि कर्तृपरत्वेऽदृष्टाश्रुतादिपदानां तन्निषेधकत्वस्य[७] वाच्यत्वात्, '**द्रष्टव्यः श्रोतव्यो मन्तव्य**' इत्यादि श्रुतिबाधः।

---

[१] घ - प्रसज्यते; ङ - प्रति नीयते
[२]
[३] बृ.उ.५.७.७-२७
[४] ख - पूर्वमभेद; ग - पूर्वाभेद
[५] ङ - भेदतात्पर्यावगमैक
[६] बृ.उ.५.७.७-२७
[७] ग - आत्मनिषेधकस्य

३. जीवेश्वरैक्यभङ्गः

एवञ्च '**नान्योऽतोऽस्ति**' इत्यत्रापि [१]श्रोतृमन्त्रादिपदस्य न श्रवणमननादिकर्तृ-जीवपरत्वम्, येन द्रष्टृश्रोत्राद्यभेदात् जीवैक्यसिद्धिः। तस्मादेतत् सदृशः किमन्यो विद्यत इत्यपेक्षायां तन्निषेधति - '**नान्योऽतोऽस्ति**' इति। [२]'**नात्र काचन भिदा अस्ति**' इत्यत्रापि नृसिंहाभेदेन प्रणवप्रशंसापरत्वात् न जीवेश्वराभेदसिद्धिः। [३]'**द्वा सुपर्णा**' इति जीवस्य द्वे सुपर्णे [४]पुण्यापुण्यरूपे ऐहिकामुष्मिकश्रेयस्साधने वा, ईश्वरस्य निग्रहानुग्रहसंकल्पौ, **सयुजौ** - अविनाभूतौ, **सखायौ** - लीलापरिकरत्वभोगप्रदत्वाभ्यां परस्परोपकारकौ। वृक्षमित्येक-वचनेनोभयोरेकवृक्षसंबन्धलाभादुभयोरेकरूपसंबन्धलाभाय समानशब्दः। ततश्च जीवेनेव ईश्वरेणापि शरीरशरीरिभावस्संबन्धो लभ्यते। पिप्पलशब्दः पल्लववचनो वैषयिकसुखमुप-लक्षयति। स्वादुभुज्यमानमासक्तिप्रदं वैराग्यस्याजनकमित्यर्थः।

नन्वयं मन्त्रः पैङ्गिरहस्ये अन्तःकरणजीवपरतया व्याख्यातः - '**तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्त्वम्, अनश्नन्नन्योऽभिचाकशीति**, **अनश्नन्नन्योऽभिपश्यति ज्ञः**, **तावेतौ सत्वक्षेत्रज्ञौ**' इति। अत्र '**स्वाद्वत्ति**' इत्येतदन्तस्य वाक्यस्य सत्त्वपरत्वम्। '**अनश्नन्**' इत्यादेः क्षेत्रज्ञपरत्वञ्च प्रतीयते। न च सत्त्वक्षेत्रज्ञशब्दौ जीवपरमात्मपरौ, अन्तःकरणजीवपरतया प्रसिद्धत्वात्। '**तदेतत् सत्त्वम्। येन स्वप्नं पश्यति, अथ योऽयं शारीर उपद्रष्टा स क्षेत्रज्ञः**' इति [५]पैङ्गिश्रुत्यैव तथा व्याख्यातत्वात्। '**येन**' इति करणत्वप्रतीतेः सत्त्वमन्तःकरणम्। स्वप्नद्रष्टृत्वात् क्षेत्रज्ञो जीव इति।

---

[१] ख, ग - श्रोतृमात्रादि

[२] अविकल्पो ह्ययमात्मा द्वितीयत्वादविकल्पो ह्ययमोङ्कारोऽद्वितीयत्वादेव चिन्मयो ह्ययमोङ्कारः तस्मात् परमेश्वर एवैकमेव तद्भवत्यविकल्पोऽपि **नात्र काचन भिदा अस्ति** नैव क्वचन भिदास्त्यत्र हि भिदामिव मन्यमानः शतधा सहस्रधा भिन्नो मृत्योस्स मृत्युमाप्नोति तदेतदद्वयं स्वप्रकाशं महानन्दमात्मा एवैतदमृतमभयमेतत् ब्रह्माभयं वै ब्रह्माभयं हि वै ब्रह्म भवति य एवं वेदेति रहस्यम्। (नृ.उ.ता.उ.८)

[३] श्वे.उ.४.६; मु.उ.३.१.१

[४] ख, घ - पुण्यपापरूपे

[५] ङ - पैङ्गिरहस्यब्राह्मणेनैतत्

उच्यते - न तावत् जीवपरमात्मपरत्वमस्य मन्त्रस्यापवदितुं शक्यते। अनेन मन्त्रेण तुल्यार्थतया प्रत्यभिज्ञायमाने [१]'**समाने वृक्ष**' इत्यनन्तरमन्त्रे जीवपरयोः प्रतिपन्नत्वादस्य मन्त्रस्य तदैकार्थ्याच्च। [२]'**समानं वृक्षं परिषस्वजाते**' '**समाने वृक्षे पुरुषो निमग्नः**' इत्यैकार्थ्यं हि प्रतीयते। '**समाने वृक्ष**' इत्यत्र च पुरुषो जीवः, अन्तःकरणस्य पुरुषशब्द-वाच्यत्वाभावात्, 'शोचति मुह्यमानः' 'पश्यति वीतशोक' इत्यादि पदानामस्वारस्य-प्रसङ्गाच्च। अन्यश्च परमात्मा, ईशशब्देनाभिधानात्, स्वविषयज्ञानेन वीतशोकत्व-हेतुत्वाच्च। न केवलमनन्तरमन्त्रैकार्थ्यात् '**द्वा सुपर्णा**' इति मन्त्रस्य जीवपरमात्मपरत्वम्, किन्तु '**स्वाद्वत्त्यनश्नन्**' इति भोक्तृत्वाभोक्तृत्वश्रवणाच्च तदवसीयते। चक्षुश्श्रोत्रादीनां द्रष्टृत्वश्रोतृत्वादिवदन्तःकरणस्यापि करणत्वादेव भोक्तृत्वं न संभवति। जीवस्य च वृक्ष-शब्दोक्तदेहपरिष्वङ्गदशायामेवानशनं नोपपद्यते। तर्हि पैङ्गिरहस्यश्रुतेः कोऽर्थः?

उच्यते - सत्त्वं बद्धजीवः, [३]'**द्रव्यासु व्यवसायेषु सत्त्वमस्त्री तु जन्तुषु**' इति नामानुशासनाज्जन्तुपरत्वावगतेः। जन्तुश्च चेतनः। [४]'**प्राणी तु चेतनो जन्मी जन्तुर्जन्य शरीरिण**' इति नामपाठात् [५]'**वन्यान् विनेष्यन्निव दुष्टसत्वान्**' इति प्रयोगाच्च।

[६]'**न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः।**
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात् त्रिभिर्गुणैः'

इति दर्शनाच्च क्षेत्रज्ञशब्दश्चात्र परमात्मपरः। अर्थान्तरप्रसिद्धाकाशप्राणादिशब्दवदर्था-नुपपत्या परमात्मपरत्वोपपत्तेः। [७]'**विष्णोर्नाम सहस्रम् मे**' इत्युपक्रम्य [१]'**क्षेत्रज्ञो अक्षर एव च**' इति प्रयोगात्। क्षेत्रं जानातीत्यवयवार्थस्य तस्मिन्नेव पुष्कलत्वाच्च। मोक्षधर्मे -

---

[१] **समाने वृक्षे** पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः।
जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः।। (मु.उ.३.१.२; श्वे.उ.४.७)

[२] द्वा सुपर्णा सयुजा सखाया **समानं वृक्षं परिषस्वजाते**।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति।। (मु.उ.३.१.१; श्वे.उ.४.६)

[३] अ.को.३.३.२१३

[४] **प्राणी तु चेतनो जन्मी जन्तुर्जन्यशरीरिणः**।
जातिर्जातं च सामान्यं व्यक्तिस्तु पृथगात्मना।। (अ.को.१.९१)

[५] लताप्रतानोद्ग्रथितैः स केशैरधिज्यधन्वा विचचार दावम्।
रक्षापदेशान्मुनिहोमधेनोः **वन्यान् विनेष्यन्निव दुष्टसत्वान्** ।। (रघुवंशे.२.८)

[६] महा.भीष्म.४२.४०; भ.गी.१८.४०

[७] तस्य लोकप्रधानस्य जगन्नाथस्य भूपते।

[2]'**ततस्त्रैगुण्यहीनास्ते परमात्मानमञ्जसा।**'
[3]'**प्रविशन्ति द्विजश्रेष्ठ क्षेत्रज्ञं निर्गुणात्मकम्।**
सर्वावासं वासुदेवं क्षेत्रज्ञं विद्धि तत्वतः' इति।
तत्रैव - '**विश्वमूर्धा विश्वभुजो विश्वपादाक्षिनासिकः।**
एकश्चरति क्षेत्रेषु स्वैरचारी यथासुखम्।।
क्षेत्राणि च शरीराणि ज्ञानानि च शुभाशुभे।
तानि वेत्ति स योगात्मा ततः क्षेत्रज्ञ उच्यते।।'

इति प्रयोगात्। तत्रैव कपिलासुरिसंवादे-'**ज्ञानानामासुरे, क्षेत्रे क्षेत्रज्ञो द्रष्टा शुचिस्त्पेक्षकः। ज्ञातृक्वे बुध्यमानाप्रतिबुध्यमानयोः परममृतं विदित्वा निरवयवमना-मयमस्मात् दुःखाद्विविमुच्यत एव**' इति बुध्यमानाप्रतिबुध्यमानशब्दाभिहितयोः[4] चिदचितोः परस्य क्षेत्रज्ञशब्देनाभिधानात्। तत्रैव पञ्चविंशतितत्वानि वर्गशब्देनोक्त्वा '**एतस्मात् वर्गादपवृत्तोऽपवर्गः क्षेत्रज्ञश्शुचिरुपेक्षको बुध्यमानाप्रतिबुद्ध्यमानयोः**[5] **परस्तात्**' इति। तत्रैव '**अन्यदुदकमन्यत् पुष्करपर्णम्, तथान्यत् क्षेत्रमन्यः पुरुषः पञ्चविंशकः, अन्यश्चास्मात् क्षेत्रज्ञ**' इति। पुनश्च तत्रैव - '**एवमासुरेऽन्यदद्रव्यमन्यः पुरुषः पञ्चविंशतितत्त्वमन्योऽस्मात् क्षेत्रज्ञ**' इति पञ्चविंशात् परस्मिन् क्षेत्रज्ञ-शब्द-प्रयोगात्। सनत्कुमारनारदसंवादे च -

[6]'**पश्यः पश्यति पश्यन्तमपश्यन्तं च पश्यति।**
पश्यन्तं पश्य पश्यत्वात् पश्यापश्ये न पश्यत'

विष्णोर्नाम सहस्रं मे शृणु पापभयापहम्।। (महा.आनु.१४९.१२)

[1] पूतात्मा परमात्मा च मुक्तानां परमागतिः।
अव्ययः पुरुषस्साक्षी **क्षेत्रज्ञोऽक्षर एव च**।। (महा.आनु.१४९.१५)

[2] विशन्ति विप्रप्रवराः सांख्या भागवतैः सह।
ततस्त्रैगुण्यहीनास्ते परमात्मानमञ्जसा।। (महा.शान्ति.३४४.१७)

[3] महा.मोक्षे.३४४.१८

[4] ग - शब्दाभिधेययोः

[5] क, ख, छ - बुद्ध्योः

[6] महा.मोक्षे.

इति श्लोकमुक्त्वा '**प्रकृतिः क्षेत्रं क्षेत्रज्ञं चापरः क्षेत्रज्ञः षड्विंशकोऽनुपश्यति, न तु पञ्चविंशकः क्षेत्रज्ञः प्रकृतिर्वा परं क्षेत्रज्ञं पश्यति**' इति प्रयोगाच्च। अत्र ह्यात्मशब्दवत् क्षेत्रज्ञशब्दस्य जीवपरसाधारणस्य [१]पञ्चविंशपरशब्दविशेषितस्य जीवपरमात्मविषयत्वदर्शनाच्च।

[२]"**योऽस्यात्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षते ।**
यः करोति तु कर्माणि स भूतात्मेति चोच्यत'

इति मानवप्रयोगाच्च। [३]"**तदेतत् सत्त्वम्**' इति। येन कारणेन स्वप्नं पश्यति तेन कारणेन जीव इत्यर्थः। अन्तःकरणपरत्वपक्षेऽपि 'येने'ति करणपरत्वमनुपपन्नम्, परमतेऽन्तःकरणस्य कर्तृत्वात् जाग्रद्दशायां जपाकुसुमवदात्मनि ज्ञातृत्वारोपनिमित्ततया कथञ्चिदुपचारतः करणत्वसंभवेऽपि स्वप्नदर्शने न कथञ्चिदपि करणत्वम्। स्वप्नदर्शनस्य साक्षिरूपत्वाङ्गीकारात्। 'अथ योऽयम्' इति शारीरत्वात् द्रष्टृत्वाच्च क्षेत्रज्ञ इत्यर्थः। यद्वा करणे एवास्तु तृतीया। ब्रह्मणश्चिदचिदुपादानत्वश्रवणादुपादानत्वस्यावस्थाश्रयत्वरूपतया जीवोपादानत्वस्य [४]तदीयज्ञानावस्थाश्रयत्वरूपत्वात्। तत्र च जीवस्य घटकत्वात् परमात्मनि जीवगतस्वप्नदर्शनाश्रयत्वं प्रत्यपि घटकतया [५]परमात्मनः स्वप्नदर्शने जीवस्य करणतया व्यपदेशो युक्त एव। अस्मिन् पक्षे [६]"**शारीर उपद्रष्टा**' इत्यत्रोपद्रष्टृत्वं स्वप्नद्रष्टृत्वं वा। अतो [७]"**द्वा सुपर्णा**' इति मन्त्रो जीवपरमात्मपरः। अत्र समानशब्देन जीवशरीरस्य परमात्मशरीरत्वप्रतिपादनात्, तस्य च भोगार्थत्वनिषेधात् श्रुत्यन्तरप्रसिद्धसर्वशरीरत्वप्रयुक्तमेव। एतच्छरीरत्वकीर्तनमित्यवगमात्, पूर्वखण्डे [८]सर्वात्मत्वोक्तिः सर्वशरीरत्वनिबन्धना, न तु स्वरूपतादात्म्यनिबन्धनेति सिध्यति।

---

[१] घ, ङ - पञ्चविंशषड्विंशति; ग - पञ्चविंशति

[२] म.स्मृ.१२.१२

[३] **तदेतत् सत्त्वम्**। येन स्वप्नं पश्यति, अथ योऽयं **शारीर उपद्रष्टा** स क्षेत्रज्ञः। (पैङ्गिरहस्यश्रुतिः) क्षेत्रज्ञञ्चापि संविद्धि सर्वक्षेत्रेषु भारत इति गीतासु इत्यनुसन्धेयम्। क्षेत्रज्ञ आत्मा पुरुषः प्रधानं प्रकृतिः स्त्रियाम् इत्यमरः।

[४] ङ - तदीयज्ञानाश्रयत्वरूपत्वात्

[५] ग, घ - परमात्मनि

[६] पैङ्गिश्रुतिः

[७] मु.उ.३.१.१; श्वे.उ.४.६

[८] ग, ङ - सार्वात्म्योक्तिः

३. जीवेश्वरैक्यभङ्गः

'**स मा धीरः पाकमात्मा विवेश**' इति वाक्ये '**पाकं** - बालं मां, **धीरः** - परमात्मा, आविवेशेति [१]जीवशरीरत्वं पुनरपि पृथक् प्रतिपाद्यते। कावेतौ सुपर्णौ, अशनानशनयोश्च को हेतुः इत्यत्राह - [२]'**समाने वृक्ष**' इति। **निमग्नः** - जलनिमज्जनेनेव तिरोहितस्वरूपः। **अनीशया** - प्रकृत्या, ईष्ट इति [३]ईट्, सा नेति [४]अनीट् तृतीयैकवचनस्यौपसंख्यानि कोऽयमयाजादेशः। यद्वा - [५]'**गुरोश्च हल**' इत्यप्रत्ययः, ईहेतिवत्, **अनीशा** - अनीशनम्, [६]शोकनिवर्तनासामर्थ्यम्। कदा तर्हि शोकमोक्षो भवतीत्यत्राह '**जुष्टम्**' इति। स्वस्मिन् प्रीतिमन्तं भगवन्तं [७]तत्प्रसादेन यदा पश्यतीत्यर्थः। आदिकर्मणि क्तः। '**अन्यमीशम्**' इत्यत्रेशशब्देनास्य महिमानमिति '**वीतशोक**' इत्यत्र श्रूयमाण इतिशब्दः संबध्यते। तथा च 'इतीशमस्य महिमानञ्च पश्यति' इत्यन्वय इतिशब्दः प्रकारवचनः। प्रकारश्च '**द्वा सुपर्णा**' इत्याद्युक्तनियन्तृत्वापहतपाप्मत्वादिः। [८]'**अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामान्**' इतिवद्धर्मधर्मिणोरुपास्यत्व-कीर्तनम्। समुच्चेतव्यबलाच्च शब्दाध्याहारः। अथवा '**नरमानय खरं** [९]**तुरङ्गम्**' [१०]'**विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन**' इत्यत्रेवानुषङ्गः। '**यदा**' इत्युक्तेस्तदा '**वीतशोको**' भवतीत्यर्थः। '**पञ्चदशान्याज्यानि**' इत्यत्र भवन्तीति कल्पनवत्।

---

[१] क - जीवपरत्वम्

[२] मु.उ.३.१.२; श्वे.उ.४.७

[३] क, च, छ - ईश्

[४] क, च, छ - अनीश्

[५] पा.सू.३.३.१०३

[६] ङ - शोकनाशनासामर्थ्यम्

[७] ङ - भगवत्प्रसादेन

[८] तद्यथेह कर्मचितो लोकः क्षीयते, एवमेवामुत्र पुण्यचितो लोकः क्षीयते। तद्य इहात्मानमनुविद्य व्रजन्त्येताँश्च सत्यान् कामान्, तेषाँ सर्वेषु लोकेष्वकामचारो भवति। **अथ य इहात्मानमनुविद्य व्रजन्त्येताँश्च सत्यान् कामान्**, तेषाँ सर्वेषु लोकेषु कामचारो भवति।। (छा.उ.८.१.६)

[९] ङ - तुरगम्

[१०] स वा एष महानज आत्मा, योऽयं विज्ञानमयः प्राणेषु य एषोऽन्तर्हृदय आकाशस्तस्मिंश्छेते सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः, स न साधुना कर्मणा भूयान्, नो एवासाधुना कनीयान्, एष

यत्तु बिम्बप्रतिबिम्बभावेन भिन्नयोर्जीवब्रह्मणोश्शरीरेऽवस्थानं 'द्वा सुपर्णा' इत्यत्र 'समाने वृक्ष' इत्यत्र च प्रतिपाद्यते। जीवस्य पर्णौ धर्माधर्मौ, ब्रह्मणोऽविद्या तत्संबन्धौ, [१]**सयुजौ** - युक् संबन्धः, तादात्म्यम्, [२]**सखायौ** - जीवेनेश्वरः प्रसिद्धिं गतः, तेन च सः, अनेनोपकारेण सख्यम्। अत इतरपदानि स्पष्टार्थानि। पूर्वखण्डे [३]'**ब्रह्मैवेदं विश्वमिदं वरिष्ठम्**' इति ब्रह्मणः [४]सर्वात्मत्वे निर्दिष्टे भोक्त्रभेदात् ब्रह्मापि भोक्तृ स्यादित्याशङ्कायामयं मन्त्रः पठ्यते। 'यौ द्वौ बिम्बप्रतिबिम्बभूतौ जीवेश्वरौ अस्मिन् शरीरे वर्तेते, तयोर्मध्ये, **अन्यः** - बुद्धिप्रतिबिम्बभूतः, तदभेदाध्यासात् तद्धर्माभिमानी, **अत्ति** - कर्मफलं भुङ्क्ते, **अन्यः** - स एवान्यः सन् बुद्धितादात्म्यरहितः, स्वरूपभूतचैतन्यात्मना, **अनश्नन् अभिचाकशीति** - भोगरहितः प्रकाशते, औदासीन्यबोधाभ्यां साक्षिमात्रमित्यर्थः। '**अनश्नन्नन्य**' इत्यत्रान्यशब्दः जीवस्यैवानुपहितरूपपरः, नत्वीश्वरपरः। देवदत्तो वामेनाक्ष्णा पश्यतीत्युक्ते तदितरेण तद्दर्शननिषेधवत्, अर्थादीश्वरे तन्निषेधसिद्धेः तदुक्तिवैयर्थ्यात्। कथं भोक्तुर्जीवस्याशनायादिराहित्यं स्वरूपमागन्तुकस्य स्वरूपत्वायोगात्। न च तत्स्वाभाविकम्, जीवस्येदानीं भोगविशिष्टत्वात्। न हि दण्डविशिष्टस्तदानीमेव दण्डाभावविशिष्टो भवतीत्याशङ्क्य, भोगस्य कल्पितत्वादधिष्ठानस्य कालत्रयेऽप्यारोप्यशून्यत्वात् दण्डिवैषम्यम्। न हि सर्पबुद्धिगृहीता रज्जुस्तदानीमपि सर्परहिता न भवति इत्यभिप्रेत्याह - [५]'**समाने वृक्षे पुरुष**' इति। **समाने** - बिम्बप्रतिबिम्बरूपजीवेश्वराश्रये शरीरे, **पुरुषः** - बुद्ध्युपहितः, **मग्नः** - कर्तृत्वाभिमानवान्, स्वरूपेण [६]अप्रकाशात् निमग्नः, अत एव तत्कारणमोहावृतः, **अनीशया** - [७]स्वस्यानन्दरूपेश्वरभावाप्रतीत्या, **शोचति** - विषयागमापायनिमित्तदुःखमनुभवति।

सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसम्भेदाय। तमेवं वेदानुवचनेन ब्रह्मणा **विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन**। (बृ.उ.६.४.२२)

[१] ङ - सयुजा

[२] ङ - सखाया

[३] ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेण।
अधश्चोर्ध्वं च प्रसृतं **ब्रह्मैवेदं विश्वमिदं वरिष्ठम्**।। (मु.उ.२.२.१२)

[४] घ, ङ - सर्वात्मकत्वे

[५] मु.उ.३.१.२; श्वे.उ.४.७

[६] क, ख - प्रकाशात्

[७] ङ - स्वस्येश्वरभावाप्रतीत्या

३. जीवेश्वरैक्यभङ्गः

न चानीशा ईश्वरत्वाभावस्तृतीयया हेतुत्वेन निर्दिष्टः, न तु [१]तदप्रतिपत्तिः इति वाच्यम्। तथा सति तस्य, तव मते मुक्तावपि सत्त्वेन तदापि तन्निमित्तशोकप्रसङ्गात्। अस्मन्मते इदानीमपि तदभावादज्ञानमेवानीशा। अत एव जीवेश्वराभेदसाक्षात्कारात् तन्निवृत्तिमाह। **जुष्टम्**-कार्यकारणसंघातैस्सेवितम्, अविवेकिभिस्तदात्मतया गृहीतम्। यदा अधिकारी, **अन्यम्**-विवेचनाच्छरीरत्रयात् पृथग्भूतं शरीरत्रयसाक्षितयावगतं [२]शोधितत्वं पदार्थम्, **ईशम्** - ईशं सन्तम्, **पश्यति** - ईश्वर इति स्वात्मानं पश्यति, साक्षात्करोतीति यावत्। तदा **अस्य** - आत्मत्वेनावगतस्य, **महिमानम्** - अपरिच्छिन्नानन्दात्मतामिति, एति। नान्तरीयकतयानर्थनिवृत्तिञ्च दर्शयति '**वीतशोक**' इति। अथवा विवेक-वैराग्यादिभिः प्रक्षालिताशयमलैः सनकादिभिः नैरन्तर्येणात्मत्वेन सेव्यमानमन्यं कार्यकारणसंघातात् विलक्षणमीशं यदा पश्यतीत्यर्थः। न तु यदा जीवादन्यं पश्यति तदा तस्य महिमानं प्राप्नोतीत्यर्थः, तथा सति जीवेश्वरतदुभयभेदानां ज्ञानं मुक्तौ हेतुः स्यात्। तथा च [३]'**तमेव विदित्वातिमृत्युमेति**' '**नान्यः पन्था अयनाय विद्यते**' इत्यादि श्रुतिविरोधः स्यात्।

किञ्च भेदे '**अस्य महिमानम्**' इत्येतद्विरुद्धम्, अन्यस्यान्यदीयमहिमप्राप्त्ययोगात्। तत्सदृशमहिमानमिति कल्पनायां लक्षणाप्रसङ्गात्। अत एव न स्तुतिमात्रपरतयापि व्याख्येयम्, संभवति मुख्यार्थेऽत्यन्तपरोक्षार्थताया अन्याय्यत्वात्। [४]'**ब्रह्म वेद ब्रह्मैव भवति**' इति वाक्यशेषविरोधाच्च। अत्र च ज्ञानात् शोकनिवृत्तिः न सुषुप्त्यादाविव सावशेषा, किन्तु तत्कारणपुण्यपापयोः तत्कारणाज्ञानस्य[५] च निवृत्तत्वादात्यन्तिकीत्याह। [६]'**यदा पश्यः पश्यते रुक्मवर्णम्**' इति। '**निरञ्जन**' इत्यविद्याराहित्योक्तिः। '**परमं**

---

[१] ग - तदप्रतीतिः

[२] ङ - बोधितत्वम्

[३] वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।
तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय।। (श्वे.उ.३.८)

[४] स यो ह वै परमं **ब्रह्म वेद ब्रह्मैव भवति** नास्या ब्रह्मकुले भवति।
तरति शोकं तरति पाप्मानं गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति।। (मु.उ.३.२.९)

[५] ग - तत्कारणज्ञानस्य

[६] **यदा पश्यः पश्यते रुक्मवर्णं** कर्तारमीशं पुरुषं ब्रह्मयोनिम्।

साम्यम्' इत्यैक्यमाह, अत्यन्तसादृश्यस्यैकत्व एव पर्यवसानात्, भेदगर्भसादृश्यस्य [१]'**न तत्समश्चाभ्यधिकश्च दृश्यते**' [२]'**न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्य**' इत्यादिश्रुति-स्मृतिभिर्निषिद्धत्वात्। [३]'**तथा विद्वान्नामरूपाद्विमुक्त**' इत्यादिना मुक्तौ नामरूपराहित्य-प्रतिपादनात् सादृश्यायोगाच्च साम्यं समत्वं सर्वात्मत्वमिति वा। तस्मान्नैताः श्रुतयो भेदे प्रमाणमिति।

उच्यते - सङ्गतिस्तावदनुपपन्ना, चेतनाचेतनसर्वतादात्म्यादभेदे[४] अभिहिते चेतना-चेतनगतास्सर्वे दोषाः ब्रह्मणि प्रादुष्युरित्येव शङ्का स्यात्, न तु जीवाभेदमात्रे शङ्का। अचेतनसामानाधिकरण्यस्य बाधार्थत्वात् न तत्र शङ्केति चेत्, तथा सत्यत्रापि बाध-बुद्ध्या न शङ्का स्यात्। अत्राभेदार्थसामानाधिकरण्यबुद्धौ तत्रापि तथैव[५] स्यादित्युभयत्र शङ्कोत्थितिरविशिष्टा। एकपदोपात्तयोश्चिदचितोरेकत्राभेदार्थं सामानाधिकरण्यमितरत्र बाधार्थमिति कुमतिः कस्यापि न जायत इति चिदचित्तादात्म्येऽविशेषेणैव शङ्का स्यात्। तत्र च नोत्तरमयं मन्त्र इति नैवं संगतिः। किन्तु पूर्वखण्डे उपास्यस्य हृदयावस्थानोक्त्या जीवस्योपास्यत्वशङ्कायां तद्व्यावृत्तये उभयोर्हृदयावस्थानेऽप्येकस्य भोक्तृत्वादनुपास्यत्व-मितरस्य भोक्तृत्वादिदोषविरहात्[६] कल्याणैकतानतया प्रकाशमानत्वाच्च उपास्यत्वमिति प्रतिपादनार्थं प्रवृत्तोऽयं मन्त्रः। यद्वा -

[७]'**अजामेकां लोहितशुक्लकृष्णाम् बह्वीः प्रजाः सृजमानां सरूपाः।**

तदा विद्वान् पुण्यपापे विधूय निरञ्जनः **परमं साम्य**मुपैति।। (मु.उ.३.१.३)

[१] न तस्य कार्यं करणञ्च विद्यते **न तत्समश्चाभ्यधिकश्च दृश्यते**।
परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च।। (श्वे.उ.६.८)

[२] पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान्।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव।।
(महा.भीष्म.३५.४३; भ.गी.११.४३)

[३] यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय।
तथा विद्वान् नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्।। (मु.उ.३.२.८)

[४] अन्येषु कोशेषु - तादात्म्ये

[५] ग - तद्भेदः

[६] ङ - रहितत्वात्

[७] श्वे.उ.४.५

३. जीवेश्वरैक्यभङ्गः

अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्य'

इति पूर्वमन्त्रे '**अजो ह्येक**' इति बद्धोऽभिधीयते। यदि '**जहात्येनाम्**' इति मुक्तोऽभिधीयते तदा त्रिगुणात्मकप्रकृतित्यागेन शोकतरणे क उपाय इत्याशंक्याह - '**द्वा सुपर्णा**' इत्यारभ्य '**वीतशोक**' इत्यन्तेन यदा जहात्येनामिति परमात्मपरं तदा भुक्तभोगामिति च जीवेन भुक्तभोगामित्यर्थः। तदा जहातीत्येतत् कथमुपपद्यत इत्यपेक्षायां तत्संसर्गप्रयुक्त-कार्याभिप्रायाहानोक्तिः[1] इत्यभिप्रायेणाह 'द्वा सुपर्णा' इति। शोकतरणहेतुः क इत्यत्राह 'समाने वृक्ष' इति। एवमुत्तरमप्यनुपपन्नम्, त्वदुक्तशङ्कानिरासस्यान्योऽत्त्यन्योऽनश्नन् अभिचाकशीतीत्येतावतैव सिद्धे '**द्वा सुपर्णा**' इत्यादिवैयर्थ्यात्। प्रत्युत '**द्वा सुपर्णा**' इत्यादि त्वदुक्तार्थस्य बाधकमेव। तथा हि - पूर्वत्र जीवब्रह्मतादात्म्यं प्रतिपादितम्, तदनुपपन्नम्, ब्रह्मणोऽपि भोगप्रसङ्गात्। तच्चानुपपन्नम्, श्रुत्यैव ब्रह्मणो भोगनिषेधादिति शङ्कायाम्, तस्यैव जीवस्य विशिष्टरूपेण भोक्तृत्वमविशिष्टरूपेण भोक्तृत्वाभावः। अतस्तेन रूपेण ब्रह्मैक्यमुपपद्यत एवेत्युत्तराभिप्रायकमिदं वाक्यमिति ह्युक्तम्। तथा च '**अन्योऽत्त्यनश्नन्नन्योऽभिचाकशीति**' इत्येतावत्युक्ते लक्षणाध्याहाराभ्यां स्वोत्प्रेक्षितार्थे पातयितुं शक्येतापि '**द्वा सुपर्णा**' इति वाक्ये जाग्रति नोत्प्रेक्षावकाशः। त्वयापि जीवब्रह्मणोः द्वाविति निर्देश इत्युच्यते। अतः '**अनश्नन्नन्य**' इति ब्रह्मण एवानशनमुच्यते। ततश्च पूर्वं ब्रह्मणो भोक्तृत्वाभावात् भोक्त्रभेदो नोपपद्यत इति या शङ्कोत्थिता सा पुनरपि ब्रह्मणोऽनशनाभिधानात् दृढीकृता।

किञ्च '**द्वा सुपर्णा**' इत्युपक्रमादुभयोः किञ्चित् प्रतिपादयिष्यत इत्यवगम्यते, एकत्रैव प्रतिपिपादयिषितत्वे द्वावित्युभयकीर्तनवैयर्थ्यात्। अतः त्वदुक्तार्थः उपक्रमविरुद्धः। किञ्चान्यशब्दः प्रतिबिम्बपर इत्युक्तम्। ततश्च स एवान्यस्सन् न भुङ्क्त इत्युक्ते व्याघातः, स्वस्य स्वस्मादन्यत्वासंभवात्। बुद्धितादात्म्यापन्नस्वरूपादन्यत्वमुच्यत इति चेन्न, पूर्वेणान्यशब्देन तस्य अनुपस्थितेः[2]। द्वितीयेन तदन्यत्वपरामर्शायोगात् प्रथमान्यपदेन बुद्धि-तादात्म्यविशिष्ट एवोच्यत इति चेत्, एवमपि स एवान्यस्सन्निति व्याघात एव। स्वरूपेण

---

[1] ङ, च - कार्याभावाभिप्रायाहानोक्तिः; ग - कार्याभावाभिप्रायेणाह

[2] ग - अनुपपत्तेः

[१]अन्यत्वात् न व्याघात इति चेत् तर्हि भोक्तृत्वतदभावयोरपि [२]तथैव व्याघाताभावादन्यः सन्निति व्यर्थम्। एकस्याशनोक्त्येतरस्यानशनस्यार्थसिद्धत्वात् तस्यानशनं न वक्तव्यमिति यदुक्तम्, तन्न। स्वादुपिप्पलमत्तीत्युक्ते इतरस्य स्वाद्वशननिषेधेऽपि नाशनमात्रनिषेधः। किञ्च पिप्पलमत्तीत्युक्ते इतरः फलमत्ति इत्यपि स्यात्। ततश्च पिप्पलस्थानीयं [३]निकृष्टं भोग्यमेको भुङ्क्ते, अपरस्तु फलस्थानीयमुत्कृष्टं भोग्यं भुङ्क्ते इति प्रतीयेत। अतोऽनश्नन्निति सामान्यनिषेधः सार्थः। किञ्चोत्तरत्र '**समाने वृक्ष**' इत्यत्र '**इति पश्यति**' इति [४]प्रकृतविशेषणपरामर्शात् शीघ्रप्रतीत्या शब्दोपस्थितानामेव परामर्शः स्यात्, न त्वार्थिकस्य, विलम्बितप्रतीतिकत्वात्। अतः आर्थिकस्याप्यनश्नन्निति पुनरुपादानमुत्तरत्र इतीति परामर्शार्थं युक्तमेव। '**समाने वृक्ष**' इत्यत्रापि संगतिरनुपपन्ना, रूपभेदकथनेनैव शङ्कायाः परिहृतत्वात्।

ननु बुद्धिगतसुखदुःखादिः हि स्वरूप एवाध्यस्यते, तदेव च जीवस्य भोक्तृत्वम्। अतः कथं स्वरूपे तदभाव इति शङ्का स्यादेवेति चेत् एवं मिथ्यात्वेन परिहारे [५]पूर्वं रूपद्वयोक्तिर्व्यर्था, ब्रह्मणोऽपि भोक्तृत्वप्रसङ्गश्च। '**अनीशया**' इत्यस्य [६]ज्ञानाभावपरत्वं अनुपपन्नम्, ईशशब्दे ज्ञानलक्षणाप्रसङ्गात्। न च मुक्तौ शोकप्रसङ्गः, भगवत्प्रसादेन तद्धेतुकर्मनिवृत्तेः। '**जुष्टम्**' इतीश्वरविशेषणमेव, न स्वविशेषणम्, स्वोपस्थापक-पदाध्याहारप्रसङ्गात् कार्यकारणसंघातैरित्यध्याहारप्रसङ्गाच्च। उक्ताध्याहारप्रसङ्गादेव 'स्वात्मानमीशं सन्तं पश्यति' इत्यप्यनुपपन्नम्। इतीति न तिङन्तं पदम्, गुणाभावात्, किन्तु निपात एव, मोहाच्छोकप्राप्तेः पूर्वमुक्तत्वेन ज्ञानाच्छोकनिवृत्तेरेव वक्तुमुचितत्वात्। तिङन्तत्वेऽप्यनुपपत्तिः, परेषामेव महिम्नः प्राप्यत्वाभावात्। न च महिमशब्दः स्वरूपपरः, लक्षणाप्रसङ्गात्। न चान्यमहिम्नोऽन्येन प्राप्तुमशक्यता, एतीत्यस्य बुद्ध्यर्थत्वात्। अस्तु वा प्राप्त्यर्थता, तथापि न दोषः, महिमपदप्रयोगानुसारेण महिमपदेन तन्महिमसदृशमहिम-

---

[१] क, छ - अनन्यत्वात्
[२] ग - तत् भेदः
[३] क, छ - निष्कृष्टम्
[४] क, छ - प्रकृष्ट
[५] क, घ - सर्वम्
[६] ग- ज्ञानाभावरूपत्वम्

लक्षणाया ज्यायस्त्वात्। प्रथमश्रुतषष्ठीमुख्यार्थत्वाय महिमपदलक्षणाया युक्तत्वाच्च। [१]‘**ब्रह्म वेद ब्रह्मैव भवति**’ इति वाक्यार्थस्तूक्त एव।

न च [२]‘**तमेव विदित्वातिमृत्युमेति**’ इति श्रुतिविरोधः, तत्र तच्छब्दस्य पूर्वप्रकृत-कारणत्वादिविशिष्टपरामर्शित्वात्[३], [४]‘**तमेवं विद्वान्**’ इत्यत्र ‘**एवम्**’ इति विशेषणपरामर्शेन तन्निषेधासंभवात्। न हि ‘राजानमेव पश्यति’ इत्युक्ते तद्गतरूपादिकमपि निषिद्धं भवति। तस्मादेवकारो ध्याने विजातीयप्रत्ययाव्यवधानार्थः। [५]‘**एकधैवानुद्रष्टव्यम्**’ इत्यत्र न स्वरूपैकत्वमर्थः, किन्तु प्रकारैकत्वम्, अतस्तेन न त्वदिष्टसिद्धिः।

ननु तवापि नेष्टसिद्धिः, बहुगुणोपासनस्य त्वदिष्टत्वादिति चेन्न। समस्तकल्याण-गुणात्मकर[६] इत्येव सर्वदा द्रष्टव्यम्, न तु जीववत् कदाचित्। अत एव [७]‘**समस्त-कल्याणगुणात्मकोऽसौ**’ इत्यत्रात्मपदेन गुणानां स्वाभाविकत्वोक्तिः।

यदुक्तम् - पारम्यविशेषणात् साम्योक्तिरैक्यपरेति तदत्यन्तोपहास्यम्, अत्यन्तेति विशेषणाद्यथोपहासे उत्कर्षसिद्धिः तथा भेदघटितसाम्ये पारम्येण विशेषिते उत्कर्ष एव भेदे सिध्येत्।

साम्यं - सर्वात्मत्वमिति यदुक्तम्; तदतिस्थवीयः, तस्य तत्राव्युत्पत्तेः। न चायं समशब्दस्सर्वशब्दपर्यायः, तथा सति सर्वशब्दपर्यायस्य समशब्दस्य सर्वनामसंज्ञाविधानात्,

---

[१] मु.उ.३.२.९

[२] श्वे.उ.३.८

[३] क, छ - परामर्शत्वात्

[४] पु.सू

[५] **एकधैवानुद्रष्टव्यम्** एतदप्रमेयं ध्रुवम्। विरजः परः आकाशादज आत्मा महान् ध्रुवः।। (बृ.उ.६.४.२०)

[६] ख, घ, च - गुणाकरः; ङ - गुणगणात्मक

[७] **समस्तकल्याणगुणात्मकोऽसौ** स्वशक्तिलेशोधृतभूतवर्गः।
इच्छागृहीताभिमतोरुदेहस्संसाधिताशेषजगद्धितोऽसौ।। (वि.पु.६.५.८४)

[1]"**समासकृत्तद्धिताव्ययसर्वनामाऽसर्वलिङ्गाजातिरेकद्रव्योपनिवेशिनी संज्ञा**' इति वार्तिकेन सर्वनामसंज्ञाया एकसंज्ञाधिकारनिवेशात् सर्वनामसंज्ञया गुणवचनसंज्ञायाश्च बाधितत्वात् '**गुणवचनब्राह्मणादिभ्यः कर्मणि च**' इति ष्यङोऽप्राप्तेः। अत एव कैयटे ष्यङ् न भवतीत्युदाहृतं सर्वत्वमिति। '**ऐक्यम्**' इत्यत्र सर्वनामत्त्वेऽपि प्रयोगप्रौढ्यनुसारात् ब्राह्मणादिषु निवेशोऽभियुक्तैरेव कल्पितः। न चेह तथास्ति। पारम्यविशेषणाच्च न सर्वत्वमर्थः, सर्वशब्दो हि संकोचकाभावादनवच्छिन्ने सर्वत्वे वर्तते, [2]"**ऐतदात्म्यमिदं सर्वम्**' इत्यादाविव। तत्र च न तारतम्यावकाशः।

किञ्च [3]"**भोगमात्रसाम्यलिङ्गाच्च**' इति सूत्रकारेण [4]"**परमं साम्यम्**' इत्यत्र साम्यशब्दस्य सादृश्यपरतयाङ्गीकृतत्वात् नार्थान्तरपरत्वसंभवः। [5]"**नामरूपाद्विमुक्त**' इति [6]संसारदशानुवृत्तदेवमनुष्यादिनामरूपप्रहाणम्[7] एव [8]"**स एकधा भवति**' इत्यादिना रूपान्तरश्रवणात्।

कश्चिदाह - [9]"**द्वा सुपर्णा**' इति मन्त्रो जीवस्य भोक्तृत्वं वास्तवं न प्रतिपादयति। [1]भोक्तृत्वाभावं प्रतिपादयितुं प्रवृत्तस्सन् का तर्हि भोक्तृत्वानुभवस्य गतिरित्याकाङ्क्षाया-

---

[1] कैयटवार्तिक

[2] स यथा तत्र नादाह्येतैतदात्म्यमिदं सर्वं स आत्मा तत्त्वमसि श्वेतकेतो इति तद्धाह्य विजज्ञाविति विजज्ञाविति। (छा.उ.६.१६.३)

[3] ब्र.सू.४.४.२१

[4] यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम्।
तदा विद्वान् पुण्यपापे विधूय निरञ्जनः **परमं साम्यमुपैति**।। (मु.उ.३.१.३)

[5] यथा नद्यस्स्यन्दमानास्समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय।
तथा विद्वान् **नामरूपाद्विमुक्तः** परात्परंपुरुषमुपैति दिव्यम्।। (मु.उ.३.२.८)

[6] क, छ -संसारदशानुवृत्ति

[7] घ, ङ - नामरूपप्रहाणपरः

[8] तदेष श्लोकः - न पश्यो मृत्युं पश्यति न रोगं नोत दुःखातां सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वश इति **स एकधा भवति** त्रिधा भवति पञ्चधा भवति सप्तधा भवति नवधा चैव पुनश्चैकादशः स्मृतः शतं च दश चैकश्च सहस्राणि च विंशतिराहारशुद्धौ सत्त्वशुद्धौ ध्रुवा स्मृतिः स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षस्तस्मै मृदितकषायाय तमसस्पारं दर्शयति भगवान् सनत्कुमारस्तं स्कन्द इत्याचक्षते तं स्कन्द इत्याचक्षते। (छा.उ.७.२६.२)

[9] मु.उ.३.१.१; श्वे.उ.४.६

मौपाधिकत्वात् मिथ्याविषयता गतिरित्यभिप्रेत्यौपाधिकत्वं द्योतयितुं भोक्तृत्वमुपाधिमस्तके निक्षिपति '**पिप्पलं स्वाद्वत्ति**' इति। '**अनश्नन्नन्य**' इति तु वस्तुतो निर्विशेषस्य जीवस्याध्यासदशायामपि वास्तवं [२]भोक्तृत्वम् प्रतिपाद्यते। देहादितादात्म्यापत्त्या चैतन्यं [३]भोक्तृ न वस्तुत इतीममर्थं स्पष्टीकरोति [४]'**समाने वृक्ष**' इत्यनन्तरमन्त्रः। **समाने वृक्षे** - देहाख्ये, **निमग्नः** - तादात्म्याध्यासादविविक्ततामापन्नः, **पुरुषः** - भोक्ता जीवः, **मुह्यमानः** शरीरादिगतैरनर्थजातैरात्मानमेव तद्वन्तं मन्यमानस्सन्, **अनीशया** - अनैश्वर्येण, कृशोऽहम् अन्धोऽहं किं मे जीवनेनेत्येवं दीनभावेनाध्यासमूलेन शोचति। यदा तु देहादिभ्यो अन्यम्[५] अत एव **ईशम्** - देहादितादात्म्याध्यासमूलदैन्यानास्पदमात्मानम्, **इति महिमानम्** अस्य प्रसिद्धप्रकारमहत्वञ्च त्रिविधपरिच्छेदराहित्यरूपञ्च पश्यति, तदा वीतशोको भवति।

न च प्राधान्येन प्रस्तुतस्य पुरुषस्यान्यत्वप्रतियोगित्वसंभवेऽप्यप्राधान्येन प्रस्तुतस्य शरीरस्य न तत्प्रतियोगित्वकल्पनमिति वाच्यम्। यद्विषयस्य भ्रमस्य शोकनिदानत्वम् अभिप्रेत्य [६]'**समाने वृक्षे पुरुषो निमग्नो**' '**मुह्यमान**' इति च विशेषणं कृतम्। तद्विरुद्धदर्शनस्य शोकविगमहेतुत्वमित्याशयेनान्यत्वविशेषणमिति ह्येषां विशेषणानां साफल्यमुपपादनीयम्।

न च '**समाने वृक्षे निमग्न**' इति '**मुह्यमान**' इति च जीवेश्वराभेदभ्रम उक्त इति वक्तुं शक्यम्, येन जीवात् [७]ईश्वरस्य अन्यत्वं तद्विरुद्धं स्यात्। किन्तु देहतादात्म्याध्यासः तद्धर्माध्यासश्चोक्त इति वक्तुम्, अतोऽर्थानुसारेणाप्रधानस्यान्यत्वप्रतियोगित्वं न दोषः। अत एवान्यमीशम् [८]इत्यस्य स्वात्मानमिति विशेष्याध्याहारोऽपि न दोषः। स्वानैश्वर्यप्रयुक्त-शोकस्य पुरुषस्यान्यैश्वर्यदर्शनेन वीतशोकत्वोपवर्णनविरोधाच्चेति।

---

[१] ङ - भोक्त्रभावम्

[२] क, ङ, च, छ - अभोक्तृत्वम्; ग - भोक्तृत्वं न

[३] ख - भोक्तृत्वे

[४] मु.उ.३.१.२; श्वे.उ.४.७

[५] क, ख, च, छ - अनर्थाश्रयेभ्योऽन्यम्

[६] मु.उ.३.१.२; श्वे.उ.४.७

[७] क - ईश्वरात्

[८] क - इत्यन्यस्य

अत्रोच्यते - गुहाधिकरणे चेतनद्वयस्य [१]हृदयानुप्रवेशस्योत्पादनात् इहैकस्य चेतनत्वेन निश्चयात् प्रत्यभिज्ञया इतरोऽपि चेतन एव ग्राह्यः। सजातीयात्मान्तरपरिग्रह एव दृष्टान्त-स्वारस्यञ्च, चेतनधर्मसखित्वोपपत्तिश्च। अत्र यद्यप्युपकारकत्वमात्रेण सखित्वमुच्यते, न तु मुख्यं सखित्वमस्ति, जीवस्येदानीं परमात्मनि [२]सक्त्यभावात्, अथापि तादृशप्रवृत्ति-निमित्तयोग्यधर्मिपरिग्रह एव स्वरसः। समानशब्दश्च तत्रैव स्वरसः। [३]जीवशरीरस्य ईश्वरं प्रत्यपि शरीरत्वात्। तदुक्तिश्च शरीरसंबन्धेऽप्यपहतपाप्मेत्यादि प्रतिपादनाय। अशनानशनयोरुपपत्तिश्च जीवेशयोरेव, अन्तःकरणस्याशनासंभवात्। तत्र [४]तदुपपादयता गौणत्वं स्पष्टमेवोक्तमिति स एव दोषः। [५]'**समानं वृक्षं परिषस्वजाते**', [६]'**समाने वृक्षे पुरुषो निमग्न**' इति प्रत्यभिज्ञयैकार्थ्यप्रतीतेः, तस्य च वक्ष्यमाणरीत्या [७]जीवेशपरत्वात् तत्परत्वमेव युक्तम्। [८]'**स्थित्यदनाभ्याञ्च**' इति सूत्रविरोधश्च। तथाहि '**स्थित्यदनाभ्याञ्च**' इत्यत्रापि [९]'**भेदव्यपदेशात्** इत्यनुषज्यते, तथा च स्थित्यदनाभ्याम् जीवेश्वरयोर्भेदव्यपदेशात् न [१०]'**प्राणभृत्**' [११]'**द्युभ्वाद्यायतनम्**' अनश्नतो [१२]दीप्यमानात् ज्ञेयत्वयोग्यादन्यत्वेन '**प्राणभृतो**' व्यपदेशात्। तस्मादस्य मन्त्रस्य जीवेशपरत्वं [१३]सूत्रात् अवगम्यते ।

---

[१] ख - हृदयानुप्रवेशप्रतिपादनात्; ग - हृदयानुप्रवेशस्योपपादितत्वात्

[२] अस्मिन् कोशे 'सक्त्यभावात्' इत्यस्य 'सखित्वाभावात्' इत्यर्थः दृश्यते।

[३] क, ख, घ, छ - जीवशरीरस्यैव

[४] ङ - तदुपपादनाय

[५] द्वा सुपर्णा सयुजा सखाया **समानं वृक्षं परिषस्वजाते**।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति।। (मु.उ.३.१.१; श्वे.उ.४.६)

[६] **समाने वृक्षे पुरुषो निमग्नो** अनीशया शोचति मुह्यमानः।
जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः।। (मु.उ.३.१.२; श्वे.उ.४.७)

[७] ग - जीवेश्वर

[८] ब्र.सू.१.३.६

[९] ब्र.सू.१.३.४

[१०] नानुमानमतच्छब्दात् प्राणभृच्च (ब्र.सू.१.३.३)

[११] द्युभ्वाद्यायतनम् स्वशब्दात् (ब्र.सू.१.३.१)

[१२] घ - विद्यमानत्वात्; ग, ङ-विद्यमानात्

[१३] ख, ग - सूत्रादेव; घ - सूत्रैः

३. जीवेश्वरैक्यभङ्गः

यत्तु जीवस्यानुभवसिद्धात् कर्तृत्वभोक्तृत्वादिविकारशालिनो रूपादन्यदसंगोदासीन विचित्रस्वरूपमस्तीत्यत्र किं प्रमाणमित्यपेक्षायामाह - '**स्थित्यदनाभ्याम्**' इति। **स्थितिः** - अनश्नन्नित्यौदासीन्येन स्थितिः, **अदनम्** - कर्मफलादनं, **आभ्याम्** - कर्मफलात्तुः सकाशादन्यस्यासंगोदासीनचैतन्यमात्रस्वरूपस्य सिद्धिरित्यर्थ इति। तन्न, सूत्रस्यैवमर्थपरत्वे स्थितेरित्येव वक्तव्यत्वेनादनग्रहणवैयर्थ्यात्। '**स्थित्यदनाभ्याम्**' '**भेदव्यपदेशात्**' इत्यन्वये तु परस्परवैधर्म्यस्य परस्परभेदहेतुत्वेन द्वयमप्यर्थवत्। अतोऽनेन सूत्रेणास्य मन्त्रस्य जीवेश्वरपरतया वर्णनात् तद्विरुद्धं बुद्धिजीवपरत्ववर्णनम्। पैङ्गिश्रुतिविरुद्धञ्च। '**अनश्नन्**' इति हेयनिषेधपूर्वकं प्रकाशमानताया अभिधानात् तस्या उपादेयत्वं प्रतीयते। सा च '**अभिपश्यति ज्ञ**' इति ज्ञातृत्वेनोपपादिता। यदि मन्त्रे भोगमिथ्यात्वे तात्पर्यं स्यात्, तदा ज्ञातृत्वस्यापि मिथ्यात्वादनुपादेयतैव स्यात्।

किञ्च 'अभिपश्यति' इत्यखिलकल्याणगुणोपलक्षणतया सार्वज्ञेन प्रकाशोपपादनात् अनश्नन्नितीश्वरपरमेव प्रतीयते। न हि बाधकं विनोपसर्गस्य वैयर्थ्यं युक्तम्, येन स्वप्नं पश्यतीत्यत्र करणे तृतीयेति ह्युक्तम्। कर्तुरन्तःकरणस्यात्मनि स्वगतकर्तृत्वाध्यासहेतुतया औपचारिककरणत्वव्यपदेशभाजः[१] करणे तृतीया न युज्यते, 'सुब् विभक्तौ' लक्षणाया अतिजघन्यत्वात्। स्वप्नेऽन्तःकरणवृत्त्यभावपक्षे न जघन्यमपि करणत्वम् उपबृंहणविरोधश्च -

[२]'**सुपर्णावेतौ सदृशौ सखायौ यदृच्छयास्मिन् कृतनीडौ च वृक्षे।**
एकस्तयोः खादति पिप्पलान्नमन्यो निरन्नोऽपि बलेन भूयान्।।'
[३]'**आत्मानमन्यञ्च स वेद विद्वानपिप्पलादो न तु पिप्पलाद**'

इति भागवतोक्तेः। '**समाने वृक्षे**' इत्यत्र जीवेश्वरावनुक्त्वा जीवमात्रस्योक्तौ समानपद-वैयर्थ्यम्, स्वात्मानमिति अध्याहारः, अन्यत्वेनेश्वरत्वेन च पश्यतीति योजनाऽस्वारस्यं स्वयमेव सुगमम्। '**अनीशया** - दैन्येन शोचति इति ह्युक्तम्, न तु दैन्यज्ञानेन। अतो

---

[१] ङ - व्यपदेशाभावात्

[२] भा.पु.११.११.६

[३] **आत्मानमन्यञ्च स वेद विद्वानपिप्पलादो न तु पिप्पलादः।**
योविद्यया युक्स तु नित्यबद्धो विद्यामयो यः स तु नित्यमुक्तः।। (भा.पु.११.११.७)

दैन्यस्यैव शोकहेतुत्वेनोक्तेश्शोकनिवृत्तौ तदभाव एव हेतुतया वाच्यः, न तु तज्ज्ञानम्, ज्ञानस्य हेतुत्वोक्तेः मोहाभावानुक्तेश्च। उत्तरखण्डस्य पूर्ववाक्योक्तविशेषणव्यतिरेक-परत्वाभावेन वृक्षशब्दस्यान्यप्रतियोगिपरत्वमनुपपन्नम्। किञ्चानीशयेति दैन्ये नेत्युक्तम्। अतो दैन्यस्यैव शोकरूपत्वादित्थंभावे तृतीया वाच्या, सा च करणत्वार्थे संभवत्ययुक्ता। अनीशयेति प्रकृत्युक्तौ करणत्वमुपपन्नमेव । न च [१]विशेषालाभः '**मन्मायामोहितं जगत्। अनयाऽहं वशीभूतः कालमेतत् न बुद्धवान्**' इत्यादिना मोहहेतुत्वेन प्रकृतेः प्रसिद्धतया स्त्रीलिङ्गेन च प्रकृतेरेव झटिति बुद्धौ [२]विपरिवृत्तेः। '**आग्नेय्याग्नीध्रमुपतिष्ठते**' [३]'**ऐन्द्र्या गार्हपत्यमुपतिष्ठत**' इत्यादौ [४]अभिधानरूपोपस्थानहेतुतया सुप्रसिद्धत्वात् स्त्रीलिङ्गेन च ऋगेव हि बुद्धौ विपरिवर्तते।

किञ्च अनीशयेत्ययं शब्दः ईट् न भवतीत्यनीडिति प्रकृतिपरो वा स्यात्, नियन्तृत्वाभावपरः सन्नशक्तिपरा वा स्यात्, '**अज्ञो जन्तुरनीशोऽयमात्मनस्सुखदुःखयोः**' इतिवत्, न तु दैन्यपरः। किञ्च स्वात्मानं यदा पश्यतीत्युक्तौ स्वस्य महिमानमिति स्यात्, न त्वस्येति। किञ्च '**अस्य**' इत्यव्यवहितपरामर्शसंभवे अन्यपरामर्शो न युक्तः। इति शब्दश्चेशशब्दोपस्थापितजगन्नियमनतदुपयोगिमहिमपरत्व एव स्वरसः। प्रकृतत्वं विना प्रसिद्धमात्रग्रहणे तं महिमानमिति स्यात्।

यत्तु - स्वानैश्वर्यप्रयुक्तशोकस्य [५]अनैश्वर्याज्ञानात् निवृत्त्यनुपपत्तिरिति तन्न। तथोपासनाप्रीतेश्वरानुग्रहात् निवृत्त्युपपत्तेः। '**तापार्तो जलशायिनं स्मरेत्**' इत्याद्यपि हि दृश्यते। प्रकृतेरनीशयेत्यस्वतन्त्रत्वेन करणत्वेन च निर्देश ईश्वरप्रेरिताया जीवमोहहेतुत्व-द्योतनार्थम्। तच्चेश्वरनिवर्त्यत्वसंभवार्थम्। अत एव तन्निवर्तनसामर्थ्यप्रदर्शनार्थमीश-मित्युपास्यनिर्देशः।

ननु व्यावहारिको जीवब्रह्मभेदः। तयोरेवाशनानशने च विवक्षिते इति चेन्न, [६]अद्वैतविषयतयाभिमते प्रकरणे व्यावहारिकभेदप्रतिपादनासंभवात्। किञ्च बिम्बप्रतिबिम्ब-

---

[१] ख, ङ, च - विशेष्यालाभः
[२] ङ - विपरीतवृत्तेः
[३] माणव.श्रौ.सू.४.२४
[४] ङ - अभिधानमारोपस्थान
[५] क, ग, च, छ - अन्यैश्वर्यज्ञानात्
[६] ङ - अद्वैतविषयत्वाभिमते

पक्षे व्यवस्थानुपपत्तिः प्रागेवोक्ता। उपाधिव्यापकस्य [१]प्रतिबिम्बानुपपत्तिः च वक्ष्यते। शरीरव्यापकस्य तदन्तर्गतोपाधिव्यापकत्वमवर्जनीयमेव। घटाकाशवत् सोपाधिकभेदपक्षे उभयोः शरीरव्यापकत्वे तदुपाध्योरपि तथात्वात् समानदेशव्याप्त्या [२]घटतत्सलिलयोः इव भेदकत्वानुपपत्तिः। जीवस्याव्यापकत्वे सर्वाङ्गीणसुखदुःखानुपलम्भप्रसङ्गः[३]। इतरस्याव्यापकत्वं सर्वव्यापकत्वश्रुतिविरुद्धम्।

ननु जीव एवाव्यापकः, उपाधेर्हृदयावस्थानेऽपि वृत्तेः प्रसरणशीलतया नोक्तदोष इति चेन्न। जीवादन्यस्यानुपहितचिन्मात्रत्वेव्यापकोपाध्यवच्छिन्नत्वे च भेदोऽनुपपन्नः। न हि घटाकाशो महाकाशान्मठाकाशाद्वा भिद्यते। अस्तु वा भेदः, तथापि यदवयवावच्छेदेन सुखाद्युत्पत्तिस्तदवयवावच्छेदेनेश्वरोपाधेश्च विद्यमानत्वादुभयोरपि सुखदुःखोपभोगो न निवारयितुं शक्यः। घटाकाशनिष्ठाः पदार्थास्सर्वे महाकाशेऽपि।

[४]'**पृथगात्मानम्**' इत्यत्र यदुक्तमात्मानं कार्यकारणसंघाताद्विलक्षणम्, प्रेरितारञ्च ईश्वराभिन्नत्वेन ज्ञात्वा तेन ज्ञानेनामृतत्वं प्राप्नोतीत्यर्थ इति, तन्न, '**आत्मानं प्रेरितारञ्च**' इति जीवपरमात्मनोः पृथक्त्वप्रतियोगितया स्वरसतः प्रतीयमानत्वेनाश्रुतप्रतियोगि-कल्पनायोगात्।

ननु जुष्टस्सेवित इत्यर्थः, तत्र सेवितुरावश्यकत्वात् स क इत्यपेक्षायां कार्यकारण-संघात इति [५]लभ्यते। '**तेन**' इति वाऽयमुपस्थाप्यते। अतः तस्य पृथक्त्वप्रतियोगित्व-मुचितमिति चेत्, एवमपि '**पृथगात्मानम्**' '**प्रेरितारञ्च**' इत्युभयोः पृथक्त्वप्रतियोगित्व-प्रतीतिस्वारस्यभङ्गप्रसङ्गात्। सेवितुरनुपस्थितत्वात् [६]प्रेरयितुः उपस्थितत्वात् तेनेति

---

[१] ग, घ - प्रतिबिम्बत्वानुपपत्तिः

[२] ग, च - घटतद्गतसलिलयोः

[३] ग - दुःखानुभवप्रसङ्गः

[४] सर्वाजीवे सर्वसंस्थे बृहन्ते अस्मिन् हंसो भ्राम्यते ब्रह्मचक्रे।
पृथगात्मानं प्रेरितारञ्च मत्वा जुष्टस्ततस्तेनामृतत्वमेति।। (श्वे.उ.१.६)

[५] ङ - लक्ष्यते

[६] ङ, च - प्रेरितुः

तत्परामर्शस्यैव युक्तत्वात्, सेवनस्य चेतनधर्मत्वाच्च। जुषि धातोः सेवार्थत्वं परित्यज्य प्रीत्यर्थकत्वस्यैव सिद्धान्ते ग्रहणात्।

किञ्च परमते तत इत्यस्य वैयर्थ्यञ्च। अतोऽयमर्थः - आत्मानं प्रेरितारञ्च ईशेशितव्यभावादिना पृथङ्मत्वा, **ततः** - तस्मादेव [१]पृथक्त्वज्ञानात् **तेन** - प्रेरयित्रा, **जुष्टः** - प्रीत्या परिगृहीतः, '**अमृतत्वमेति**' इति। अत्र '**ततः**' इति पदाभावे ज्ञानस्य प्रीतिहेतुत्वं न प्रतीयेत। क्त्वाप्रत्ययस्यामृतत्वमेतीति समानकर्तृकक्रिययैव संबन्धात्। किञ्च जीवानां लोकतः [२]'**एको बहूनाम्**' इत्यादि श्रुतिभिश्च बहुत्वावगमात् तेषामेकेन ब्रह्मणा ऐक्यमनुपपन्नम्।

नन्वेक एवात्मा देहाद्युपाधिभेदेन बहुधा प्रतिभाति तरङ्गचन्द्रवत् सौभर्यादिवद्वा, अन्यथाकल्पना गौरवप्रसङ्गात्। अत्र कश्चिदाह - चिन्मात्रसंबन्धिन्यां मायायां चिन्मात्रप्रतिबिम्ब ईश्वरः। तस्या एव परिच्छिन्नानन्तप्रदेशेष्वावरणविक्षेपशक्तिमत्स्वविद्याभिधानेषु चित्प्रतिबिम्बो जीव इति। अपरस्तु [३]त्रिगुणात्मिकायाः मायायाः मूलप्रकृतेः रूपभेदौ स्तः सत्वरजस्तमोऽनभिभूतशुद्धसत्त्वप्रधाना माया, तदभिभूतमलिनसत्त्वा त्वविद्या। अतो मायाप्रतिबिम्ब ईश्वरः, अविद्याप्रतिबिम्बो जीव इति। अन्यस्तु एकैव मूलप्रकृतिर्विक्षेपप्राधान्येन मायेत्युच्यते। तदवच्छिन्न ईश्वरः। सैव मूलप्रकृतिरावरणप्राधान्येनाविद्याज्ञानादि शब्दवाच्या जीवोपाधिरिति।

इतरस्त्वविद्यायां चित्प्रतिबिम्ब ईश्वरः, अन्तःकरणे चित्प्रतिबिम्बो जीव इति। परस्तु यथा घटावच्छिन्नाकाशो घटाकाशः तदाश्रितजले प्रतिबिम्बितस्साभ्रनक्षत्रो जलाकाशोऽनवच्छिन्नो महाकाशः। महाकाशमध्यवर्तिनि मेघमण्डले वृष्टिलक्षणकार्यानुमेयेषु जलरूपतदवयवेषु तुषाराकारेषु प्रतिबिम्बितो मेघाकाश इति। वस्तुत एकस्यैवाकाशस्य चातुर्विध्यं तथा स्थूलसूक्ष्मदेहद्वयस्याधिष्ठानतया वर्तमानं तदवच्छिन्नचैतन्यं कूटवन्निर्विकारत्वेन स्थितं कूटस्थम्। तत्र कल्पितेऽन्तःकरणे प्रतिबिम्बितचैतन्यं संसारयोगी जीवः, अनवच्छिन्नं चैतन्यं ब्रह्म। तदाश्रिते मायातमसि स्थितासु सर्वप्राणिधीवासनासु प्रतिबिम्बितचैतन्यमीश्वर इति चैतन्यं चतुर्विधम्। एवं चान्तःकरणधी-

---

[१] क, ख, ग, च, छ - पृथग्ज्ञानात्

[२] नित्यो नित्यानां चेतनश्चेतनानाम् **एको बहूनां** यो विदधाति कामान्।
तत्कारणं सांख्ययोगाधिगम्यं ज्ञात्वा देवं मुच्यते सर्वपाशैः।। (श्वे.उ.६.१३; कठ.उ.५.१३)

[३] ग - त्रिगुणात्मिकायां मायायाम्

३. जीवेश्वरैक्यभङ्गः

वासनोपरक्तज्ञानोपाधिभेदो जीवेश्वरविभागः। शुक्तौ रजतवत् कूटस्थेऽध्यस्तो जीवः। अत एवेदं त्वरजतत्वयोरिवाधिष्ठानसामान्यांशाध्यस्तविशेषांशरूपयोः[१] स्वयं त्वाहं त्वयोः सह प्रकाशः स्वयमहं करोमीति।

एवञ्च [२]'**तत्त्वमसि**' इतिनाभेदे सामानाधिकरण्यम्, किन्तु बाधायामभेद एव असामानाधिकरण्यमस्तु, जीववाचिपदेन कूटस्थलक्षणा वास्त्विति। तत्राद्यमितरे दूषयन्ति-जीवेश्वरयोस्साङ्कर्यप्रसङ्गः। अवयविनि प्रतिबिम्बितस्य पुनस्तदवयवे प्रतिबिम्बान्तरासंभवादिति। द्वितीयतृतीयावितरे दूषयन्ति - शुद्धसत्त्वस्य विक्षेपशक्तेश्च व्यापकत्वे उक्तदोष एव। एकत्रोपाधावेकत्र प्रतियोगिकप्रतिबिम्बद्वयासंभवात्। अव्यापकत्वे ईश्वरस्याव्यापकत्वप्रसङ्ग इति। तुरीयं प्रत्यपीतरे तमेव दोषमापादयन्ति व्यापकोपाधौ प्रतिबिम्बितस्य पुनस्तदन्तर्गते व्याप्योपाधौ प्रतिबिम्बान्तरासंभवात् साङ्कर्यमेवेति। इतरे सर्वे पञ्चमं दूषयन्ति - चातुर्विध्ये मानाभावात्।

न च ब्रह्मणः संसारप्रसङ्गभयादेव ततोऽन्यस्य शरीरावच्छिन्नचैतन्यस्य जीवरूपप्रतिबिम्बं प्रति बिम्बरूपता वाच्येति वाच्यम्। एवमपि ब्रह्मणि संसारप्रसङ्गस्य अवर्जनीयत्वात्। न हि शरीरावच्छिन्नचैतन्यस्य चैतन्यात् भेदोऽस्ति [३]घटावच्छिन्नाकाशस्य [४]आकाशात् भेदासंभवात्।

किञ्च जीवस्य कूटस्थचैतन्यप्रतिबिम्बरूपत्वे तस्यानित्यशरीरावच्छिन्नत्वेनानित्यतया [५]तत्प्रतिबिम्बजीवस्याप्यनित्यत्वेन जीवाविनाशित्वश्रुतिविरोधः। वासनाप्रतिबिम्ब ईश्वर इत्यप्यनुपपन्नम्, तत्र मानाभावात्। सार्वज्ञसिद्ध्यर्थं तथा कल्पनमिति चेत्, किं सार्वज्ञ्यं सर्वज्ञानाश्रयत्वं सर्वज्ञानरूपता वा। नान्त्यः, वासनानां वृत्तिभिन्नतया

---

[१] ङ - विशेषांशयोः

[२] स यथा तत्र नादाह्येतैतदात्म्यमिदं सर्वं स आत्मा **तत्त्वमसि** श्वेतकेतो इति तद्धाह्य विजज्ञाविति विजज्ञाविति। (छा.उ.६.१६.३)

[३] ख - घटावच्छिन्नस्याकाशस्य

[४] ग - महाकाशात्

[५] ग - तत्प्रतिबिम्बजीवस्याप्यनित्यतया; ङ - तत्प्रतिबिम्बावच्छिन्नस्याप्यनित्यत्वेन

तत्प्रतिबिम्बस्य घटादिप्रकाशरूपत्वासिद्धेः। नाद्यः, वासनानां सर्वज्ञानहेतुत्वे[१] अपि ज्ञानाश्रयत्वासिद्ध्या तत्प्रतिबिम्बस्य तदसिद्धेः। वासनानां नानात्वेनेश्वरानन्त्य-प्रसङ्गात्, एकस्य [२]सार्वज्ञ्यासिद्धेः। [३]वासनोपरक्तज्ञानप्रतिबिम्बाङ्गीकारे वासनोपरागो व्यर्थ इति।

विवरणानुसारिणस्त्वाहुः - [४]'**विभेदजनके ज्ञाने नाशमात्यन्तिकं गत**' इति स्मृत्यैक्यस्यैवाज्ञानस्य जीवेश्वरविभागोपाधित्वप्रतिपादनात् बिम्बप्रतिबिम्बभावेन जीवेश्वरयोः विभागः नोभयोरपि प्रतिबिम्बभावेनोपाधिद्वयमन्तरेणोभयोः प्रतिबिम्बत्वायोगात्। तत्रापि प्रतिबिम्बो जीवः बिम्बस्थानीय ईश्वरः। तथा सत्येव लौकिकबिम्बप्रतिबिम्बदृष्टान्तेन स्वातन्त्र्यमीश्वरस्य तत्पारतन्त्र्यं जीवस्य च युज्यते। अज्ञानप्रतिबिम्बितस्य जीवस्यान्तः-करणरूपोऽज्ञानपरिणामभेदो विशेषाभिव्यक्तिस्थानं सर्वतः प्रसृतस्य सवितृ प्रकाशस्य दर्पण इव, अतस्तस्य तदुपाधिकत्वव्यवहारोऽपि। न तावता अज्ञानोपाधिपरित्यागः। अन्तःकरणोपाधिपरिच्छिन्नस्यैव चैतन्यस्य जीवत्वे योगिनः कायव्यूहाधिष्ठानानुपपत्तेः।

न च योगप्रभावाद्योगिनोऽन्तःकरणं कायव्यूहाभिव्यक्तियोग्यं वैपुल्यं प्राप्नोतीति तदवच्छिन्नस्य कायव्यूहाधिष्ठानं युज्यत इति वाच्यम्। [५]'**प्रदीपवदावेशस्तथा हि दर्शयति**' इति शास्त्रोपान्त्याधिकरणभाष्यादिषु कायव्यूहे प्रतिदेहमन्तःकरणस्य चक्षुरादिवत् भिन्नभिन्नस्यैव योगप्रभावात् सृष्टेरुपवर्णनात्। प्रतिबिम्बे बिम्बाद्भेदमात्रस्याध्यस्तत्वेन स्वरूपेण तस्य सत्यत्वात् न [६]प्रतिबिम्बरूपजीवस्य मुक्त्यन्वयासंभव[७] इति। न तदतिरेकेण [८]मुक्त्यन्वयायावच्छिन्नरूपं जीवान्तरं वा प्रतिबिम्बजीवातिरिक्तं जीवेश्वर-विलक्षणं कूटस्थशब्दितं चैतन्यान्तरं वा कल्पनीयम्। [९]'**अविनाशी वा अरेऽयमात्मा**'

---

[१] ग - रूपत्वे

[२] ख - सार्वत्म्यसिद्धेः

[३] क, ख, छ -वासनोपरक्ताज्ञान

[४] **विभेदजनके ज्ञाने नाशमात्यन्तिकं गते**।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति।। (वि.पु.६.७.९६)

[५] ब्र.सू.४.४.१५

[६] ङ - प्रतिबिम्बरूपस्य जीव

[७] ग - मुक्त्यन्वयसंभवः

[८] क, ख, ग, घ, छ - मुक्त्यन्वयावच्छिन्नरूपम्

[९] सा होवाच मैत्रेय्यत्रैव भगवान् मोहान्तमापीपत्। न वा अहमिमं जानामीति। स होवाच न वा अरेऽहं मोहं ब्रवीमि **अविनाशी वा अरेऽयमात्मा** अनुच्छित्तिधर्मा। (बृ.उ.६.५.१४)

इति श्रवणं जीवस्य तदुपाधिनिवृत्तौ प्रतिबिम्बभावापगमेऽपि स्वरूपं न विनश्यतीत्येतत् परम्, न तदतिरिक्तं कूटस्थन्नाम चैतन्यान्तरम् जीवोपाधिनान्तःकरणादिनावच्छिन्नं चैतन्यं बिम्बभूत ईश्वर एव। [1]'**यो विज्ञाने तिष्ठन्**' इत्यादिश्रुत्येश्वरस्यैव जीवसन्निधानेन तदन्तर्यामिभावेन विकारान्तरावस्थानश्रवणादिति। वाचस्पतिमतानुसारिणस्तु घटाकाशवदन्तःकरणावच्छिन्नचैतन्यञ्जीवः, तदनवच्छिन्नम् मीश्वरः । न चावच्छेदपक्षे -

[2]'**यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्।**
उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा।।'

[3]'**अत एव चोपमा सूर्यकादिवत्**' इति श्रुतिसूत्राभ्यां विरोधः। [4]'**अम्बुवदग्रहणात्तु न तथात्वम्**' इत्युदाहृतसूत्रानन्तरसूत्रेण यथा सूर्यस्य रूपवतः प्रतिबिम्बोदययोग्यं ततो विप्रकृष्टदेशं रूपवज्जलं गृह्यते। नैवं, सर्वगतस्यात्मनः प्रतिबिम्बोदययोग्यं किञ्चिदस्ति, ततो विप्रकृष्टमिति प्रतिबिम्बाभावमुक्त्वा [5]'**वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम्**' इति तदनन्तरसूत्रेण जलप्रतिबिम्बितस्सूर्यो जलवृद्धौ वर्धत इव, जलह्रासे ह्रसतीव, जलचलने चलतीवेति तस्याध्यासिकं जलानुरोधिवृद्धिह्रासादिभाक्त्वं तथात्मनोऽन्तःकरणादिनावच्छेदेनोपाध्यन्तर्भावादाध्यासिकं तदनुरोधिवृद्धिह्रासादिभाक्त्वमित्येव दृष्टान्तदार्ष्टान्तिकयोः सामञ्जस्यादविरोध इति स्वयं सूत्रकृतैवावच्छेदपक्षे तयोस्तात्पर्यकथनात्।

[6]'**घटसंपृक्तमाकाशं नीयमाने घटे यथा।**
घटो नीयेत नाकाशं तद्वज्जीवो नभोपमः।।'

[1]'**अंशो नाना व्यपदेशात्**' इति श्रुतिसूत्राभ्यामवच्छेदपक्षस्यैव परिग्रहाच्च। तस्मात् [2]सर्वगतस्य चैतन्यस्यान्तःकरणादिनावच्छेदेऽवश्यंभावीत्यावश्यकत्वादवच्छिन्नो जीव इति।

---

[1] **यो विज्ञाने तिष्ठन्** विज्ञानादन्तरो यं विज्ञानं न वेद, यस्य विज्ञानं शरीरम्, यो विज्ञानमन्तरो यमयति, एष त आत्माऽन्तर्याम्यमृतः। (बृ.उ.५.७.२६)

[2] **सर्वज्ञमुनेः संक्षेपशारीरकम्.३.१५०, नृसिंहाश्रममुनेः तत्वबोधिनीव्याख्यासहिता।**

[3] ब्र.सू.३.२.१८

[4] ब्र.सू.३.२.१९

[5] **वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवं** दर्शनाच्च। (ब्र.सू.३.२.२०)

[6] ब्र.बिन्दु.उ.१३

अयमवच्छेदवादी प्रतिबिम्बवादिनं दूषयति - चैतन्योपाध्योर्निरूपत्वान्न प्रतिबिम्ब-संभवः। सलिले गगनप्रतिबिम्बबुद्धिर्मेघादिगोचरैव लौकिकानां तत्रैव गगनबुद्धेः। अत एवोपर्युपर्याकाश इति लौकिकानां व्यवहारः। यदि च निर्मेघस्यैव श्यामतया प्रतीय-मानस्याकाशस्य प्रतिबिम्बप्रत्ययः इत्युच्येत, तदा पञ्चीकरणेन रूपित्वमस्त्येव। किञ्च चाक्षुषो ह्ययं प्रतिबिम्बप्रत्ययः। तत्र कथं रूपग्रहाभावे प्रतिबिम्बग्रहः, तद्ग्रहे च कथमिदं नीरूपप्रतिबिम्बोदाहरणम्, रूपसत्त्वेऽनुदाहरणत्वं स्पष्टमेव। तदभावेऽपि तद्वत्त्वग्रहादेव प्रतिबिम्बोपपत्तिः। नीरूपस्य रूपविशिष्टप्रत्ययस्संभवति नवेत्ययं विचारोऽत्रानुपयुक्तः। रूपसंभवे गगनस्यैव प्रतिबिम्बग्रहोपपत्तेः, असंभवे रूपविशेषवत् द्रव्यस्य यस्य कस्यचित् सलिले प्रतिबिम्बबुद्धौ तस्मिन् गगनपदवाच्यताभ्रमात् गगनप्रतिबम्बव्यवहारोपपत्तेः।

न च नीरूपध्वनौ नीरूपवर्णस्य प्रतिबिम्बदर्शनमस्त्येवेति वाच्यम्, तत्र प्रतिबिम्ब-व्यवहाराभावात्। न हि [3]<u>ध्वनिभेदेन</u> गृह्यमाणे वर्णे ध्वनिधर्मोदात्तादेरारोपमात्रेण प्रतिबिम्बता, प्रतिध्वनिस्तु शब्दान्तरमेव। अत एव तत्र ध्वनिवैजात्यदर्शनोपपत्तिः प्रतिबिम्बाव्यवहारोपपत्तिश्च।

किञ्च स्वच्छद्रव्याभिघातेन नायनरश्मिभिः परावृत्य ग्रहणमेव हि [4]<u>प्रतिबिम्बनम्</u>, अन्या निरुक्तेः। अतः कथमिह प्रतिबिम्बसंभवः, आरोपमात्रात् प्रतिबिम्बत्वे रजतादेरपि तथात्वप्रसङ्गः। [5]<u>तन्निष्ठत्वारोपात्</u> प्रतिबिम्बत्वे प्रकृतेऽप्यसंभवः। तदभेदेनारोपात् प्रति-बिम्बत्वे रजतादावतिप्रसङ्गः, [6]<u>मुखादौ</u> असंभवश्च। चिदुपाध्योरभेदेन प्रतीतौ कस्य कुत्र प्रतिबिम्बनमित्यध्यवसितमायुष्मता। इच्छामात्राध्यवसायिनां तु विपश्चिद्बहिर्भाव एव।

नन्वभिव्यञ्जकं प्रतिबिम्बोद्ग्राही। अत उपाधेश्चैतन्याभिव्यञ्जकत्वाच्चैतन्यस्यैव प्रतिबिम्बाध्यवसाय इति चेत् हन्त, विचित्रमिदम्, [7]<u>अन्धतमसस्य</u> सूर्याभिव्यञ्जकत्वम्। न

---

[1] **अंशो नानाव्यपदेशात्** अन्यथा चापि दाशकित्तवादित्वमधीयत एके। (ब्र.सू.२.३.४२)

[2] ग, ङ - सर्वगतस्यैव

[3] ङ - ध्वन्यभेदेन

[4] ङ - प्रतिबिम्बदर्शनम्

[5] ङ - तन्निष्ठारोपात्

[6] ख - दुःखादौ; ग - घटादौ

[7] ग, घ, ङ - अन्धतमसः

च स्वप्रकाशे प्रकाशान्तरोत्पत्तिसंभवोऽनादेश्च स्वप्रकाशस्य नोपाध्यधीनत्वसंभवः। किञ्च जीवस्य प्रतिबिम्बरूपत्वे जीवब्रह्मविभागस्याविद्याधीनतयानादित्वभङ्गप्रसङ्गः।

ननु तदधीनत्वं न तज्जन्यत्वं, किन्तु तद्व्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वम्। तच्च जीवब्रह्मविभागेऽनादिभूतेऽप्युपपद्यत एव। विभागस्याविद्याव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वादिति चेन्न, आवरणस्याविद्याधीनत्वाभावप्रसङ्गात्। न ह्यावरणनिवृत्तिरविद्यानिवृत्त्यधीना, प्रत्युतावरणस्याविद्यानिवृत्तिप्रतिबन्धकत्वाङ्गीकारादविद्यानिवृत्तिरेवावरणनिवृत्त्यधीना। किञ्च विभागस्याप्यावरणाधीनतयावरणनिवृत्त्युत्तरक्षणे एव निवृत्त्याऽविद्यानिवृत्त्या सहैव विभागनिवृत्त्युपपत्तेः, न हि विभागनिवृत्तेरविद्यानिवृत्त्यधीनता।

किञ्च [१]प्रतिबिम्बप्रतीत्युपयोगितया लोहादौ घर्षणादिसाध्यं जलतैलादौ स्वभावसिद्धञ्च किञ्चिद्वैलक्षण्यं प्रतिबिम्बोपाधौ दृश्यते, तच्चाविद्यायां नास्त्येवेति कथमुपाधित्वम्। तदभावेऽपि बिम्बप्रतिबिम्बोपाधित्वकल्पनेऽस्य प्रतिबिम्बस्योपाध्यनपेक्षा [२]एवास्तु, प्रतिबिम्बस्योपाध्यपेक्षा लोके दृष्टेति चेन्न। तत्र प्रतिबिम्बप्रतिभासस्य बिम्बप्रतिबिम्बभेदस्य च जन्यतयान्वयव्यतिरेकाभ्यां दर्पणादेः कारणत्वकल्पनेऽपि जन्यत्वविरहात् न ब्रह्मप्रतिबिम्बे तदपेक्षा। यदि च प्रतिबिम्बे तादपेक्ष्यस्य लोके दर्शनमात्रात् प्रकृतेऽपि तथा कल्पयसि, तर्हि तत एव जन्यत्वमपि कल्प्येत। किञ्च [३]जन्यस्य कारणसापेक्षत्वस्य लोके दर्शनादिहाजन्येऽपि तादपेक्ष्यं स्यादिति ब्रह्मणोऽपि किञ्चिदधीनत्वप्रसङ्गः।

ननु [४]'**उपाधिना क्रियते भेदरूप**' इति श्रुत्यैवोपाधिसापेक्षत्वमुपपाद्यत एव इति चेन्न। न स्वाभाविको जीवब्रह्मभेदः, किन्तु [५]बिम्बत्वप्रतिबिम्बत्वोपाधिवशात् इत्येवमर्थ-

---

[१] ग - प्रतिबिम्बप्रतियोग्युपयोगितया लोहादिषु

[२] क, ख, घ, ङ, छ - वास्तु

[३] ग - जन्यत्वस्य

[४] यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्।
उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा।। (सर्वज्ञमुनेः संक्षेपशारीरकम्.३.१५०, नृसिंहाश्रममुनेः तत्वबोधिनीव्याख्यासहिता)

[५] ङ - बिम्बप्रतिबिम्बोपाधिवशात्

परत्वोपपत्तेः, तर्हि दृष्टान्तवैघट्यं स्यात्। तत्र हि [१]सूर्यकादेः जलाद्युपाधिनिबन्धनत्वं प्रतिपाद्यत इति चेन्न। जलाद्युपाध्यनुपादाने दृष्टान्ते बिम्बप्रतिबिम्बभावो न प्रतीयेतेति। तदर्थं तदुपन्यासात् पक्षान्तरेऽपि दृष्टान्तवैघट्यं समानमेव। '**अपोऽनुगच्छन्**' इति हि सूर्यस्याबधिकरणत्वं प्रतीयते। न च सूर्यस्याबधिकरणत्वमस्ति, किन्तु तथा भ्रान्तिरेव। न हि दार्ष्टान्तिके सास्ति, [२]अज्ञानाद्यभिन्नतया एव प्रतीतेः। क्षेत्रेष्वित्यत्रापि प्रतिबिम्बरूप आत्मा शरीरेषु वर्तत इत्यर्थः।

यद्वा यथा सूर्यो जलनिष्ठतया प्रतीयमानः तद्गतक्रियादिभेदाश्रयतया प्रतीयते, तत्वतो न तदाश्रयः। एवमात्माप्यन्तःकरणाभिन्नतया[३] प्रतीयमानः तद्गतज्ञातृत्वाद्याश्रयतया प्रतीयते, न तु तत्वतो ज्ञातृत्वादिकमस्तीत्यर्थः। [४]"**एकधा बहुधा चैव दृश्यते जलचन्द्रवत्**' इत्यत्रापि बिम्बप्रतिबिम्बमात्रदृष्टान्तः[५]। जलसंकीर्तनस्य प्रयोजनं पूर्ववदेव। यथा चन्द्रो जलगततया प्रतीयमानो जलगतैर्भेदैर्युज्यते तथात्माप्यन्तः करणाभिन्नतया प्रतीयमानतद्गतैर्भेदैः युज्यत इत्यर्थः। [६]"**रूपं रूपं प्रतिरूपो बभूव**' इत्यत्रापि प्रतिशरीरं प्रतिबिम्बात्मनो [७]वृत्तिः एव प्रतिपाद्यते, न तु तत्र प्रतिबिम्बोपाधिः। यद्वा प्रतिरूपवदुपाधि-गतैर्भेदैर्युज्यत इत्यर्थः। किञ्च ब्रह्मणस्सर्वपदार्थेष्वप्यन्तर्बहिश्च व्याप्यवर्तमानस्य कथं तत्रैव प्रतिबिम्बः।

न हि जले वर्तमानस्य तत्रैव प्रतिबिम्बो दृश्यते, दृश्यते ह्याकाशस्येति चेन्न, जलान्तःस्थितप्रदेशातिरिक्तप्रदेशस्यैव तत्र प्रतिबिम्बात्। अत एव तत्र नैल्यं साभ्रनक्षत्रत्वं चोपलभ्यते। तस्मात् प्रतिबिम्बपक्षोऽनुपपन्न इति।

---

[१] ग - सूर्याकाशादेः

[२] ग - अज्ञानाद्यभिमानतया

[३] ङ - करणावच्छिन्नतया; ख, ग - करणभिन्नतया

[४] एक एव हि भूतात्मा भूते भूते व्यवस्थितः।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत्।। (ब्र.बिन्दु.उ.१२)

[५] ङ, छ -मात्रम् दृष्टान्तः; घ, च - मात्रे दृष्टान्तः

[६] अग्निर्यथैको भुवनं प्रविष्टो **रूपं रूपं प्रतिरूपो बभूव**।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च।। (कठ.उ.२.२.९)

[७] ङ - प्रवृत्तिः

३. जीवेश्वरैक्यभङ्गः

एनमवच्छेदवादिनं प्रतिबिम्बवादी दूषयति - अण्डान्तर्वर्तिनश्चैतन्यस्य तत्तदन्तःकरणोपाधिभिस्सर्वात्मना जीवभावेनावच्छेदात् तदवच्छेदरहितचैतन्यरूपस्येश्वरस्याण्डात् बहिरेव सत्त्वं स्यादिति। [1]"**यो विज्ञाने तिष्ठन्**' इत्यादावन्तर्यामिभावेन विकारान्तरावस्थानश्रवणं विरुध्यते। प्रतिबिम्बपक्षे तु जलगतस्वाभाविकाकाशे सत्येव प्रतिबिम्बाकाशदर्शनादेकत्र द्विगुणीकृत्य वृत्तिरुपपद्यत इति।

अवच्छेदवाद्याह - प्रतिबिम्बपक्षेऽप्युपाधावनन्तर्गतस्यैव चैतन्यस्य तत्र प्रतिबिम्बो वाच्यः। न तु जलचन्द्रन्यायेन कृत्स्नप्रतिबिम्बः, [2]तदन्तर्गतभागस्य तत्र [3]प्रतिबिम्बायोगात्। न हि [4]मेघावच्छिन्नस्याकाशस्य आलोकस्य वा जले प्रतिबिम्बवत् जलान्तर्गतस्यापि तस्य तत्र प्रतिबिम्बो दृश्यते। न वा मुखादीनां बहिस्स्थितिसमय इव जलान्तर्निमज्जनेऽपि प्रतिबिम्बोऽस्ति। अतो जलप्रतिबिम्बं प्रति मेघाकाशादेरिवान्तःकरणाद्युपाधिप्रतिबिम्बं प्रति तदनन्तर्गतस्यैव बिम्बत्वं स्यादिति, बिम्बभूतस्य विकारान्तरावस्थानायोगादीश्वरेऽन्तर्यामि ब्राह्मणाञ्जस्याभावस्तुल्य इति।

प्रतिबिम्बवाद्याह - नायनरश्मीनां परावृत्यग्रहणेन विना मुखादिप्रतिबिम्बासिद्धेः परावृत्तिनिबन्धनैव प्रदेशान्तरस्थ बिम्बापेक्षा। इह परावृत्तेरनपेक्षिततत्वान्न प्रवेशान्तरापेक्षेति अवच्छेदवाद्याह - परावृत्तिर्हि प्रतिबिम्बग्रहमात्रे कारणम्, तदभावे प्रतिबिम्बग्रहस्य क्वाप्यदर्शनादिति, अवच्छिन्नस्य [5]जीवत्वे कर्तृभोक्तृसमययोस्तत्र तत्रान्तःकरणावच्छेद्यचैतन्यप्रदेशस्य भिन्नत्वात् कृतहानाकृताभ्यागमप्रसङ्ग इति।

अवच्छेदवाद्याह - प्रतिबिम्बपक्षेऽपि स्वानन्तर्गतस्य स्वसन्निहितस्य चैतन्यप्रदेशस्यान्तःकरणे प्रतिबिम्बस्य वक्तव्यतया तत्र तत्रान्तःकरणस्य गमने बिम्बभेदात् तत्प्रतिबिम्बस्यापि भेदावश्यंभावेन दोषतौल्यात्।

---

[1] **यो विज्ञाने तिष्ठन्** विज्ञानादन्तरो यं विज्ञानं न वेद, यस्य विज्ञानं शरीरम्, यो विज्ञानमन्तरो यमयति, एष त आत्माऽन्तर्याम्यमृतः। (बृ.उ.५.७.२६)

[2] क - तदन्तर्गतभावस्य; ग,च - तदन्तर्गतस्य

[3] क, ग, घ, ङ, च, छ - प्रतिबिम्बत्वायोगात्

[4] ख, ग, घ, ङ - मेघावच्छिन्नाकाशस्य

[5] घ - जीवस्य; च - कर्तृत्वे

न चान्तःकरणप्रतिबिम्बो जीव इति पक्षे दोषतौल्येऽप्यविद्याप्रतिबिम्बो जीवः, तस्य च तत्र तत्र गत्वरमन्तःकरणं जलाशयव्यापिनो महामेघमण्डलप्रतिबिम्बस्य तदुपरि [१]विसृत्वरस्फीतालोक इव तत्र तत्र विशेषाभिव्यक्तिहेतुरिति पक्षे नायं दोषः, अन्तःकरणवदविद्याया गत्यभावेन प्रतिबिम्बभेदानापत्तेरिति वाच्यम्। तथैवावच्छेदपक्षेऽपि अविद्यावच्छिन्न जीव इत्यभ्युपगमसंभवात्। तत्राप्येकस्य जीवस्य क्वचित् प्रदेशे कर्तृत्वं प्रदेशान्तरे भोक्तृत्वमित्येवं कृतहानादिदोषापनुत्तये वस्तुतो जीवैक्यस्य शरणीकरणीयत्वेन [२]तन्न्यायादन्तःकरणावच्छेदपक्षे अपि वस्तुतश्चैतन्यस्यैक्यस्य तदवच्छेदकोपाध्यैक्यस्य च तन्त्रत्वाभ्युपगमेन [३]दोषनिराकरणसंभवाच्च।

वास्तवैक्यस्य शरणीकरणेऽतिप्रसङ्गः तवापि तुल्यः। प्रतिबिम्बोपाध्यैक्यादतिप्रसङ्गपरिहारे अवच्छेदकैक्यादतिप्रसङ्गपरिहारो ममापि तुल्यः। अवच्छेदकैक्येऽपि प्रदेशभेदेन जीवभेदात् दोषतादवस्थ्ये तवापि बिम्बभेदेन प्रतिबिम्बभेदात् दोषतादवस्थ्यम्। प्रतिबिम्बपक्षे जीवेशयोः किञ्चिज्ज्ञत्वसर्वज्ञत्वव्यवस्थानुपपत्तिः बिम्बप्रतिबिम्बयोरेकत्वात् भेदारोपेऽपि वह्नौ गुञ्जापुञ्जभ्रमदशायां वह्निभेदारोपेऽपि वह्निकार्यदाहादिवत् सार्वज्ञ्यप्रयुक्तव्यवहारादि कार्यस्यावर्जनीयत्वात्। प्रकाशे सति तदन्तःकरणवृत्तेरेव तदधीनव्यवहारे हेतुत्वमिति निर्बन्धो निर्निबन्धनः, स्वस्वरूपाविद्यादिव्यवहाराभावप्रसङ्गश्च। किञ्च बिम्बप्रतिबिम्बयोः [४]धर्मव्यवस्थितौ बन्धमोक्षयोरप्यव्यवस्थाया वैयधिकरण्यप्रसङ्ग इति।

प्रतिबिम्बवाद्याह - अवच्छेदपक्षेऽपि [५]सार्वज्ञ्यानुपपत्तिः समैव। सर्वेषामपि हि ज्ञानसंबन्धस्तदधिष्ठानकत्वमेव। ततश्चाण्डात् बहिर्भूतस्येश्वरस्य कथं सावज्ञ्यम्। अन्तःकरणस्य गत्वरत्वात् कथं [६]वैयधिकरण्याभावः बद्धमुक्तव्यवस्थानुपपत्तिश्च। मुक्तप्रदेशस्यैव पुनरन्तःकरणान्तरेणावच्छेदादिति।

---

[१] ङ - विवस्वत्परस्फीतालोक; ख, ग - विसृत्वरस्थितालोक

[२] क, ख, छ - तन्न्यायादवच्छेदपक्षे; ग - तन्न्यायवदन्तःकरणावच्छेदपक्षे;
घ - तन्नयवदन्तःकरणावच्छेदपक्षे

[३] ग - दूषणाकरण

[४] ङ- धर्माव्यवस्थितौ

[५] क, छ - सार्वज्ञ्योऽनुपपत्तिः

[६] ङ - वैयधिकरण्यभावः

३. जीवेश्वरैक्यभङ्गः

अवच्छेदवाद्याह - प्रतिबिम्बपक्षेऽपि बद्धमुक्तव्यवस्थाभावः समानः [१]मुक्तप्रदेशस्य एव पुनरन्तःकरणान्तरे प्रतिबिम्बात्। प्रतिबिम्बस्यैव बन्धे बन्धमोक्षयोर्वैयधिकरण्यम्। प्रतिबिम्बपक्षे घटध्वंसे घटाकाश इत्यादि वैघट्यमिति।

प्रतिबिम्बवाद्याह - अवच्छेदपक्षे [२]'**यथा ह्ययं ज्योतिरात्मा विवस्वान्**' इत्यादि व्याकोप इति। एवं परस्परप्रहारनिहतयोः[३] अवच्छेदप्रतिबिम्बवादिनोः स्वकीयाद्वैतकुसृष्टेः जलाञ्जलिं प्रदाय परस्परकण्ठाश्लेषेण अहो नु खलु ममेयं दुर्गतिः, अहो नु खलु तवेयं दुर्गतिरिति प्रलाप एव शरणम्। एवमेतौ दुर्गतौ।

कश्चित् मन्दहासः पश्यन् न प्रतिबिम्बो नाप्यवच्छिन्नो जीवः। किन्तु कौन्तेयस्यैव राधेयत्ववदविकृतस्य ब्रह्मण एवाविद्यया जीव भावः। एवञ्च स्वाविद्यया जीव-भावमापन्नस्यैव ब्रह्मणः सर्वप्रपञ्चकल्पकत्वात्[४] ईश्वरोऽपि सर्वज्ञत्वकारणत्वादिधर्मैस्सह **स्वप्नोपलब्धदेवतावत् जीवकल्पित** इत्याचष्टे।

अवच्छेदप्रतिबिम्बवादिनावूचतुः - अविद्यया जीवभावो हि दुःखादिसंबन्ध एव, दुःखादेरन्तःकरणवृत्तितया तदवच्छेदात् तत्प्रतिबिम्बाद्वा चैतन्यस्य दुःखादिसंबन्धो वाच्य इति नावच्छेदप्रतिबिम्बाभ्यां मोक्षः इति। तदुभयपरित्यागे चानुभूतस्मरणकृतागम-व्यवस्थाया असंभवः ब्रह्मणो नित्यमुक्तत्वश्रुतिविरोधश्चेति।

तृतीयस्तु - अवच्छेदप्रतिबिम्बाङ्गीकारेऽपि नानुभूतस्मरणादिव्यवस्थासंभवः, अन्तःकरणस्य गत्वरत्वेन तदवच्छिन्नानां [५]तत्प्रतिबिम्बितानां च भिन्नत्वात्। यज्ञदत्तेन [६]अनुभूयमानस्य देवदत्तेन व्यवहारप्रसङ्गश्चापरिहार्यः। तदन्तःकरणावच्छिन्नेनानुभूतस्यैव तदन्तः करणावच्छिन्नेन व्यवहार इति निर्बन्धे सौभरिशरीरेषु तदन्तःकरणावच्छिन्नेनानु-भूतस्य शरीरान्तरे व्यवहारो न स्यात्। सौभरिशरीरेषु प्रतिशरीरमन्तःकरणं

---

[१] ख - मुक्तस्वरूपस्य

[२] सर्वज्ञमुनेः संक्षेपशारीरकम्.३.१५०, नृसिंहाश्रममुनेः तत्वबोधिनीव्याख्यासहिता

[३] क, ख, ग - नियतयोः

[४] ख - कल्पनात्

[५] ङ - तत्प्रतिबिम्बानाम्

[६] ङ - अनुभूतस्य

भिन्नमित्युपपादितम्। नित्यमुक्तत्वश्रुतिविरोधोऽपि प्रतिबिम्बावच्छेदाङ्गीकारेऽपि तुल्यः। बिम्बप्रतिबिम्बयोः ऐक्यात् पादावच्छिन्नवेदनायाः देवदत्तीयत्वाच्चेति स्वकीयाद्वैतकुसृष्टेः जलाञ्जलिं प्रदाय तत्कण्ठमाश्लिष्य प्रलापगोष्ठीं प्रविष्टः। अतो निरुपद्रवोऽयमौपनिषदो जीवेशविभागः।।

इति अद्वैतविद्याविजये जीवेश्वरैक्यभङ्गः

४. अखण्डार्थत्वभङ्गः

यच्चोक्तम् - सत्यज्ञानादिवाक्यस्याखण्डार्थत्वेन स्वगतभेदो न तत्र प्रतिपाद्यत इति, तन्न, अखण्डार्थत्वासिद्धेः। यदाह नवीनः सत्यज्ञानादिवाक्यमखण्डार्थं लक्षणवाक्यत्वात् तन्मात्रप्रश्नोत्तरत्वाद्वा, प्रकृष्टप्रकाशश्चन्द्र इति वाक्यवदखण्डार्थत्वञ्च स्वपदोपस्थापितार्थ संसर्गागोचरप्रमाजनकत्वम्। गामानयेत्यादिवाक्येऽतिव्याप्तिवारणाय संसर्गागोचरेत्युक्तम्। जलेन सिञ्चतीत्यादि वाक्ये पदद्वयेऽपि शक्तिभ्रमाज्जायमानस्य घटवद्विषयस्य घटोऽस्तीति ज्ञानस्य प्रमात्वात् तत्रातिव्याप्तिवारणाय स्वपदार्थेत्नुक्त्वा स्वपदोपस्थापितेत्युक्तिः। प्रमापदञ्च ज्ञानपरम्, शुकाद्युदीरितलक्षणवाक्येऽव्याप्तिवारणाय तादृशज्ञानजननयोग्यत्वं विवक्षणीयम्। योग्यत्वञ्च लक्षणवाक्यत्वादिना द्रष्टव्यम्। इदञ्च साध्यम्। सत्यादिवाक्ये प्रकृष्टप्रकाशादिवाक्ये च स्वरूपमात्र एव लक्षणेति मते एकप्रातिपदिकार्थमात्रपरत्वं वा अखण्डार्थत्वम्। इदञ्च प्रकृष्टादिवाक्येऽपि चन्द्रत्वविशिष्टलक्षणेति मते अस्ति चन्द्रं न जानामीत्यज्ञानानुभवात् तस्मिन् न ज्ञानम् अस्ति च कश्चन्द्र इति तत्स्वरूपमात्रनिष्ठः प्रश्नः, अत उत्तरमपि तत्समानार्थमित्यखण्डार्थमिति।

अत्रोच्यते - चन्द्रं न जानामीत्यज्ञानानुभवः कश्चन्द्र इति प्रश्नश्च न स्वरूपमात्र-निष्ठौ, स्वरूपस्य प्रत्यक्षसिद्धत्वात्। यदुच्यते उत्पन्नमपि स्वरूपगोचरज्ञानमनवधारणमिति, कुत एतत्। उत्तरकालं संशयदर्शनादिति चेत्, कोऽयं संशयः? अयं चन्द्रो नवेत्यादिरूप इति चेत् तर्हि धर्मिस्वरूपमवधृतमेव, धर्मयोरेवात्र कोटित्वात्। इतश्च न स्वरूपानवधारणम्, प्रादेशमात्रत्ववर्तुलत्वसकलङ्कत्वप्रकृष्टप्रकाशत्वादिनावधारणात्। एवं ज्योत्स्नादिना चन्द्रस्वरूस्यावधारणं दृश्यते, तदानीमेव तथा प्रश्नोत्तरे च। न च तत्र स्वरूपानवधारणसंभवः। किञ्च चन्द्रशब्दस्य कश्चिदर्थोऽस्तीत्यवधारणे सत्येव हि कश्चन्द्र इति पृच्छति। अन्यथा त्वप्रश्न एव वा किं चन्द्रशब्दस्सार्थ इत्यादिरूपेण प्रश्नो वा स्यात्। किञ्च स्वरूपावधारणादेव ह्यस्मिन् ज्योतिर्मण्डले कश्चन्द्र इति प्रश्नः। स्वरूपस्यैवाज्ञाने कथं ज्योतिर्मण्डले प्रश्नः, ज्योतिष्ट्वेन तद्देशस्थत्वेन निर्णयादेव ह्ययं प्रश्नः। किञ्च नानार्थत्वज्ञानदशायां देवदत्तयज्ञदत्तयोश्चन्द्रपदव्यवहारं शृण्वतोः द्वयोः प्रष्ट्रोरन्यतरं प्रत्यन्यतरेण 'प्रकृष्टप्रकाशश्चन्द्र' इत्युपदेशे कृते तं पृष्टवतः संशय-

निवृत्तावप्यन्यं पृष्टवतस्संशयो न [1]निवर्तते। अतस्तेन वाक्येनान्यतरजिज्ञासाया निवृत्ते-रन्यतरस्य शृण्वतोऽप्यनिवृत्तेश्च प्रश्नयोर्विषयभेदो वाच्यः। अपि च नानार्थत्वज्ञानदशायां देवदत्तयज्ञदत्तयोश्चन्द्रपदव्यवहारं शृण्वत एकस्य तदुभयजिज्ञासोः कश्चन्द्र इति पृष्टेन देवदत्तेन प्रकृष्टप्रकाशश्चन्द्र इत्युपदिष्टेऽपि काचिज्जिज्ञासा निवर्तते, यज्ञदत्तं तु जिज्ञासुः प्रागिव कश्चन्द्र इति पृच्छति, तत्र निश्चितजिज्ञासितयोर्भेदो वाच्यः।

किञ्च देवदत्तीयचन्द्रव्यवहारं यज्ञदत्तीयचन्द्रव्यवहारञ्च दृष्टवतो [2]नानार्थत्व-ज्ञानाभावदशायां देवदत्तेन पृष्टेन प्रकृष्टप्रकाशश्चन्द्र इत्युक्ते प्रागेव जिज्ञासानिवृत्तावपि पश्चाच्चन्द्रशब्दस्य नानार्थत्वे [3]ज्ञाते, प्रागिव सैव जिज्ञासा [4]आवर्तते। अत एव यज्ञदत्तं पुनः पृच्छति 'कश्चन्द्र' इति। तत्र स्वरूपस्य लक्षणवाक्येनावधृतत्वात् पुनः कथं स्वरूपजिज्ञासोत्थितिसंभवः, तर्हि प्रश्नोत्तरयोः निर्विषयत्वप्रसङ्गः, स्वरूपविषयत्व-निरासात्। न च चन्द्रत्वं विषयः तस्यापि प्रत्यक्षेणैव निर्णयात्। अत एव न प्रकृष्ट-प्रकाशोऽपि नापीतरव्यावृत्तिः। चन्द्रत्वनिर्णयादेव तस्या अपि निर्णयादिति चेन्न, प्रश्नोत्तरयोश्चन्द्रशब्दवाच्यताविषयत्वात्।

ननु प्रकृष्टप्रकाशे चन्द्रत्वाज्ञानं विना वाच्यत्वाज्ञानप्रश्नयोरपि[5] अयोगात् तदेव तत्प्रश्नविषयः। तत्र तन्निश्चये हि तदयोगात्, यथा शुक्ले घटगुणे, अयं शुक्लशब्दवाच्य इत्याप्तवाक्यात् निश्चये पटशौक्ल्येन तद्वाच्यत्वसंशयः। एवं [6]चन्द्रत्वसंज्ञिता क्वचित् जातिरस्ति। तदाश्रयश्चन्द्रपदवाच्य इति निश्चये सति प्रकृष्टप्रकाशे चन्द्रत्वनिर्णये च चन्द्रपदवाच्यत्वसंदेहो न स्यात्। तन्निष्ठे धर्मे वाच्यत्ववैशिष्ट्यनिश्चयस्योभयत्रापि तुल्यात्वादिति चेत् तर्हि घटगुणे शुक्लत्वं नाम काचिज्जातिस्तदाश्रयश्शुक्लशब्दपदवाच्य इत्याप्तवाक्यान्निश्चये पटशौक्ल्ये दृष्टे तत्रायं शुक्लशब्दवाच्यो[7] न वेति संदेहो न स्यात्। तत्र शुक्लत्वं न निश्चितमिति चेत् तर्हि घटगुणे अयं शुक्लशब्दवाच्य इत्याप्तवाक्यात्

[1] ङ - निवर्तेत
[2] ख - नानार्थत्वाज्ञानदशायाम्; ग - नानार्थज्ञानाभावदशायाम्
[3] ख, ङ - ज्ञाने
[4] घ, ङ - अनुवर्तते
[5] ङ - प्रश्नोत्तरपरिणामस्य
[6] ग - चन्द्रत्वसंज्ञिका
[7] ग, घ, ङ - पदवाच्यः

निश्चये पटशौक्ल्ये तद्वाच्यत्वसंशयः स्यात्। तत्र शुक्लत्वं निर्णीतमिति चेत् किमत्र व्यवस्थापकम्? फलबलकल्प्यदोषतदभावाविति चेत् तर्हि सर्वत्र शुक्लत्वचन्द्रत्वादि निश्चये सत्यपि दोषतदभावाभ्यां वाच्यत्वसंशयतदभावावेव किमिति न व्यवस्थाप्येते।

ननु प्रकृष्टप्रकाशश्चन्द्रोऽयं शुक्लशब्दवाच्य इत्याद्याकारोपदेशविशेषे सति नियमेन वाच्यत्वसंशयाभावस्य दर्शनात् तादृशोपदेशविशेषाभावप्रयोज्य एव वाच्यत्व-संशयः। यदि च सदुपदेशो वाच्यत्वज्ञाने एवोपयुज्यते, न तु स्वरूपनिर्णये, स्वरूपन्तु निश्चितमेवेत्युच्येत, तदा घटगुणे अयं शुक्लशब्दवाच्य इत्युपदिष्टजातिविशेषवत्तया तन्निश्चिते घटशौक्ल्ये यथा न वाच्यत्वसंदेहः तथा चन्द्रत्वमिति काचिज्जातिः [१]तद्विशिष्टः चन्द्रशब्दवाच्य[२] इत्युपदिष्टजातिविशेषवत्तया चन्द्रस्वरूपनिर्णये वाच्यत्वसंशयो न स्यात्। तथा च स्वरूपनिश्चयाभावादेव संशयः। उपदेशसहकृतप्रत्यक्षेण स्वरूपनिश्चय इत्यास्थेयमिति चेत्, तर्हि अयं शुक्लशब्दवाच्य इत्युपदेशादिव शुक्लत्वमिति काचित् जातिः तदाश्रयः शुक्लपदवाच्य इत्युपदेशात् स्वरूपनिर्णयोऽपि स्यात्। एतादृशोपदेशो न स्वरूपनिर्णायकप्रत्यक्षसहकारीति चेत् तर्हि यादृशोपदेशस्वरूपनिर्णयसहकारी तादृशोपदेशजन्यवाच्यत्वनिश्चय[३] एव तादृशसंशयविरोधीति[४] अस्तु।

वस्तुतस्तु चन्द्रत्वसंज्ञितत्वावच्छेदेन चन्द्रपदप्रवृत्तिनिमित्तत्वे गृहीतेऽपीयं जातिः चन्द्रत्वसंज्ञिता वा न वेति संदेहात् प्रवृत्तिनिमित्ताश्रयत्वसंदेहाच्च चन्द्रे चन्द्रपदवाच्यत्व-संदेहोपपत्तिः। इयं जातिः चन्द्रत्वसंज्ञिता न वेति संदेहस्तु चन्द्रत्वसंज्ञिता काचिज्जातिरिति यत्किञ्चिज्जातित्वसामानाधिकरण्येन चन्द्रत्वसंज्ञितत्वनिश्चयेऽपि, एतज्जातित्वावच्छेदेन तदनिश्चयात् [५]भिन्नप्रकारत्वात् उपपद्यते।

किञ्च घटशब्दवाच्यः कश्चिदस्तीति निश्चयवतोऽप्ययं घटो न वेति संशयः, घटः को इति प्रश्नश्च दृश्यते। तस्यामेव दशायां घटमानयेति प्रयोजकवृद्धेनोक्ते प्रयोज्यवृद्धेन च

[१] घ, ङ - तदाश्रयः
[२] ग, घ, ङ - पदवाच्यः
[३] घ, ङ - निर्णयः
[४] क. घ, ङ - विरोधी
[५] ङ - भिन्नप्रकारकत्वात्

तस्मिन्नानीतेऽयं घट इति निश्चयात् संशयाज्ञानप्रश्ना न दृश्यन्ते। तत्र चेत् स्वरूपविषयाः संशयाज्ञानादयस्तदा स्वरूपानवधारणात् व्युत्पत्तिग्रहो न स्यात्।

किञ्च धूमपदाव्युत्पन्नस्य धूमेन वह्निम् [१]अनुमिमानस्य कोऽयं धूम इति प्रश्नादयो दृश्यन्ते। न च तत्र धूमस्वरूपे अज्ञानं वक्तुं शक्यम्। व्याप्तिनिश्चयाभावेऽनुमित्युच्छेद-प्रसङ्गात्। किञ्च कटकादीष्टसाधनतावच्छेदकतया प्रत्यक्षेण गृहीतरजतत्वजाति-कस्याव्युत्पन्नरजतपदस्यास्ति किं रजतमिति प्रश्नः, अस्ति च तत्र कस्यचित् प्रतारकस्य घटमङ्गुल्या [२]निर्दिश्य इदं रजतमित्युत्तरवाक्यम्, तत्र न प्रश्नस्य रजतस्वरूपनिष्टत्वम्, [३]उत्तरस्य अपि तथात्वप्रसङ्गात्।

न चेष्टापत्तिः, तत्र रजतत्वस्योपदेशसहकृतप्रत्यक्षादवधारणे कटकार्थिनो घटे प्रवृत्त्यापत्तेः। नापि रजतशब्दस्य वाच्यत्वविषयः प्रश्नस्तव संभवति, रजतत्वमिति काचित् जातिः तदाश्रयो रजतशब्दवाच्यो नान्य इति निश्चयवतस्तत्र रजतत्वाभावनिश्चयात् वाच्यत्वाभावनिश्चयापत्तेः, वाच्यत्वसंशयायोगात्। येन रूपेणोपस्थितप्रवृत्तिनिमित्ता-वच्छेदेन वाच्यत्वग्रहः तद्रूपेण तदभावनिश्चये वाच्यत्वाभावनिश्चय इति चेत् तर्हि तद्रूपेण प्रवृत्तिनिमित्तवत्वनिश्चय एव वाच्यत्वसंशयविरोधीति तुल्यम्। अपि चैवमुपदेशसहकृत-प्रत्यक्षेणाज्ञाननिवृत्तावप्यगृहीतसोमपदसंगतिकस्य 'कस्सोमः सोमं न जानामि' इत्यज्ञान-प्रश्नौ 'प्रकृष्टप्रकाशस्सोम' इत्युत्तरञ्च चन्द्रे दृश्यते। वाच्यत्वविषयत्वमन्तरेण तत्र कस्ते निस्तारः।

न चैवं सर्वत्र वाच्यत्वस्यैव संदेहापत्त्याधर्मसन्देहोच्छेदः। तत्कोटिकस्मरणविशेषा-दर्शनादिसामग्रीसत्त्वे तत्संदेहस्याप्यावश्यकत्वात्। न हि स्थाणुर्वा पुरुषो वेति संदेहोऽस्तीति शिंशुपादिसंदेह उच्छिद्यते। तस्मात् देवदत्तादिसंशयवत् वाच्यत्वविषय एवायं संशयः। यदि च तत्र सांकेतिकशब्दतया प्रवृत्तिनिमित्तान्तराभावात्, वाच्यत्वविषय-संदेहः तदा चन्द्रत्वस्य निश्चितत्वाच्च वाच्यत्वसंशय इति तुल्यम्। चन्द्रशब्दवाच्यत्वे त्वदुक्तानुपपत्तिश्चेहापि तुल्या। चन्द्रश्चन्द्रपदवाच्य इतिवत् देवदत्तो देवदत्तपदवाच्य इति निश्यचस्येहापि तुल्यत्वात्।

---

[१] क, छ - अनुमानस्य; ग - अनुमीयमानस्य

[२] ङ - निर्दिष्टस्य

[३] ङ - उत्तरवाक्यस्य

४. अखण्डार्थत्वभङ्गः

यदुक्तम् - अनुभूयमानेऽपि चन्द्रे चन्द्रस्वरूपाज्ञानमिति, अस्तु तत्, अथाप्येककोटिकेनानवधारणेनायं चन्द्र इति व्यवहारप्रसङ्गः, अनभ्यासदशायां जलव्यवहारवत्। न च चन्द्रपदस्य व्युत्पत्त्यग्रहादव्यवहारः। चन्द्रश्चन्द्रपदवाच्य इति व्युत्पत्तिग्रहस्य त्वयैवोपपादनात्, अयं चन्द्रपदवाच्य इत्यग्रहादव्यवहारश्चेदयं चन्द्रशब्दवाच्यो[१] न वेति सन्देहे कः प्रद्वेषः।

यदुक्तम् - उपदेशसहकृतप्रत्यक्षमवधारणजनकमिति, तन्न। तथा सत्येतेषु कश्चित् चन्द्र इत्युपदेशसहकृतप्रत्यक्षादपि तत्राज्ञाननिवृत्तिप्रसङ्गात्। अत्र यदुक्तं सामान्येनोपदेशस्यान्यथोपपत्त्यादिशङ्कया तदर्थज्ञानस्य व्यक्तिविशेषे सत्तानवधारणात्मकत्वमिति तन्न। चन्द्रत्वसंज्ञितजातिविशेषाश्रयश्चन्द्रपदवाच्य इत्युपदेशस्यापि सामान्यरूपतयान्यथोपपत्तिशङ्कया चन्द्रत्वात्मकजातिविशेषे चन्द्रपदवाच्यत्वसत्तानवधारणात्मकत्वस्य तुल्यत्वात्, पटगुणशौक्ल्यवैषम्यात्। यच्चोक्तम् - यदि प्रकृष्टप्रकाशे सत्तानिश्चयरूपं चन्द्रत्वप्रकारकं प्रत्यक्षमस्ति तर्हि यत्त्वया चन्द्रत्वप्रकारकतया प्रत्यक्षेण विषयीक्रियते, तच्च चन्द्रपदवाच्यमिति ज्ञानात् प्रकृष्टप्रकाशे संशयो निवर्तेत।

न च चन्द्रत्वपदस्यागृहीतसंगतिकत्वाच्चन्द्रत्वप्रकारकतयेत्यादिवाक्यमबोधकमिति वाच्यम्। वस्तुतश्चन्द्रत्वस्य तज्ज्ञानप्रकारत्वे तत्पदसमभिव्याहारादेव [२]चन्द्रपदाभिधेयस्य ज्ञातुं शक्यत्वादिति, तन्न, चन्द्रत्वपदस्यागृहीतसंगतिकत्वेन तद्वाक्यस्याबोधकत्वात्। न च वस्तुतश्चन्द्रत्वस्य तज्ज्ञानप्रकारत्वे तत्पदसमभिव्याहारादेव चन्द्रपदाभिधेयो ज्ञातुं शक्य इति वाच्यम्। तत्र नक्षत्रादिगतधर्माणामपि बहूनां प्रकारतया जातिविशेषे चन्द्रत्वपदवाच्यताग्रहायोगात्। चन्द्रत्वमात्रं चेत् तज्ज्ञाने प्रकारस्तदा संशयो निवर्तत एव।

किञ्च तवापि यस्त्वया चन्द्रत्वेन ज्ञातस्स चन्द्र इत्युपदेशात् संशयो निवर्तेत, अनवधारणात्मकचन्द्रत्वप्रत्यक्षस्य सत्त्वात्। यदि चन्द्रत्वप्रत्यक्षमपि नेत्युच्येत, तदा यच्चन्द्रस्वरूपं त्वया प्रत्यक्षेण विषयीक्रियते स चन्द्र इत्युपदेशात् तत्संशयो निवर्तेत। यच्च चन्द्रत्वाश्रयश्चन्द्रपदवाच्य इति ज्ञानानन्तरं चन्द्रत्वं कश्चित् धर्मः, स च प्रकृष्टप्रकाशे वर्तते इत्युपदेशात् तव तत्संशयनिवृत्तिर्न स्यात्, तस्य प्रत्यक्षादनधिकविषयत्वात्।

---

[१] ग, ङ - पदवाच्यः

[२] ख, घ - चन्द्रपदाभिधेयः; ङ - चन्द्रत्वपदाभिधेयत्वस्य

तेनापि वाक्येन [१]प्रकृष्टप्रकाशनिष्ठधर्मे चन्द्रपदवाच्यत्वाविषयीकरणात् प्रत्यक्षस्याखण्डधर्मचन्द्रत्वविशिष्टविषयत्वादिति, तन्न। चन्द्रत्वपदस्याव्युत्पन्नतया चन्द्रत्वाश्रयः चन्द्रपदवाच्य इत्यत्र चन्द्रत्वसंज्ञितजात्याश्रयश्चन्द्रपदवाच्य इत्यर्थो वक्तव्यः। चन्द्रत्वसंज्ञितत्वञ्च प्रकृष्टप्रकाशवृत्तिधर्मेऽन्यत्र वेति संदिग्धमिति न तावन्मात्रं श्रुतवतः प्रत्यक्षेण चन्द्रत्वदर्शनात् संशयनिवृत्तिः। चन्द्रत्वं कश्चिद्धर्म इत्युपदेशस्य तु चन्द्रत्वसंज्ञिता जातिः प्रकृष्टप्रकाशे वर्तत इत्यर्थो वक्तव्य इति पूर्ववाक्ये येन रूपेणोपस्थितस्य प्रवृत्तिनिमित्तत्वं निश्चितं तेन रूपेणोपस्थितस्यैवोत्तरवाक्येन प्रकृष्टप्रकाशत्वसामानाधिकरण्यं निश्चितमिति ततः संशयनिवृत्तिः।

यच्चोक्तम् - यदि वाच्यत्वजिज्ञासा तदोत्तरमप्यसंगतम्। तथाहि न तावत् यथाश्रुतिप्रकृष्टप्रकाशवैशिष्ट्यं प्रतिवचनप्रमेयम्, तस्य प्रत्यक्षेणावगतत्वात्, नापि तद्विशिष्टस्य चन्द्रत्ववैशिष्ट्यमज्ञातं तत्प्रमेयमिति वाच्यम्। नागृहीतविशेषणन्यायेन लाघवेन चाज्ञातचन्द्रप्रातिपदिकार्थस्यैव तत्प्रमेयत्वात्। प्रकृष्टप्रकाशविशिष्टे चन्द्रत्ववैशिष्ट्यस्यापि प्रत्यक्षेण निश्चितत्वाच्च। नापि चन्द्रपदवाच्यत्वं तत्प्रमेयम्, तस्यापि चन्द्रपदवाच्यं किञ्चिदस्तीति सामान्यतः स्वरूपेण ज्ञातत्वात्। प्रवृत्तिनिमित्तमेव प्रश्नविषयो हि वाच्यः, ततश्च प्रकृष्टप्रकाशत्वं चन्द्रपदप्रवृत्तिनिमित्तमित्युक्तं स्यात्, तच्चायुक्तम्। उपाधेस्सखण्डस्याखण्डशब्दालम्बनत्वायोगात्। इतरथा सर्वत्राप्युपाधिरेव प्रवृत्तिनिमित्तमिति जातिर्न स्यात्।

न च प्रकृष्टप्रकाशपदेन चन्द्रत्वं लक्ष्यत इति वाच्यम्। प्रकृष्टप्रकाशेनासाधारणसंबन्धवत्तया पूर्वं चन्द्रत्वस्य ज्ञाने चन्द्रत्ववांश्चन्द्रपदवाच्य इति वाक्यादपि प्रकृष्टप्रकाशे तत्संशयनिवृत्तिः स्यात्।

न च समयग्रहात् प्राक् चन्द्रत्ववानिति वाक्यमबोधकमिति [२]शङ्क्यम्। पूर्वोक्तन्यायेन चन्द्रत्वं नाम काचिज्जातिरिति वाक्यादेव तद्ग्रहसंभवात्। तस्यासाधारणरूपेण प्रकृष्टप्रकाशसंबन्धाज्ञाने च न ततस्तल्लक्षणा। न च चन्द्रपदवाच्यत्वस्याश्रयविशेषसंसर्ग एव प्रतिपाद्यत इति वाच्यम्, तस्याजिज्ञासितत्वात्। न च तस्यैव जिज्ञासेति वाच्यम्, प्रवृत्तिनिमित्तज्ञानाभावे व्यवहारासिद्धेः, तावन्मात्रस्यानुपयोगात्।

---

[१] घ, ङ - प्रकृष्टप्रकाशे तन्निष्ठधर्मे

[२] ग, घ, ङ - वाच्यम्

४. अखण्डार्थत्वभङ्गः

नन्वस्ति कश्चिच्चन्द्र इत्यनेनैव चन्द्रत्वनिमित्तकत्वं वाच्यत्वस्य ज्ञातम्, तस्याश्रय एव परं जिज्ञास्यत इति चेन्न, किं वाच्यत्वस्याश्रयः, उत निमित्तस्य। नाद्यः, वाच्यत्वाश्रयस्यास्ति कश्चिच्चन्द्र इत्येनेनैव ज्ञातत्वात्। द्वितीये, चन्द्रपदार्थ एव जिज्ञास्यत इति मदिष्टसिद्धिः। प्रकृष्टप्रकाशत्वाधिकरणे चन्द्रत्वनिमित्तकवाच्यत्वाश्रयत्वमेव जिज्ञासितम्। तच्च प्रकृष्टप्रकाशे चन्द्रत्वानुमानार्थमिति चेत् किमनेन बकबन्धनेन, साक्षादेव तत्प्रतिपादनोपपत्तेः।

नन्वाप्तस्य प्रकृष्टप्रकाशसमानाधिकरणचन्द्रपदप्रयोगसामर्थ्यात् प्रकृष्टप्रकाश एव चन्द्रपदवाच्य इति निश्चीयते। तत्र [१]प्रकाशत्वस्य गुरुत्वाद्रूपादेरननुगतत्वाल्लाघवात् तद्गतचन्द्रत्वमेव निमित्तमित्यवसीयत इति चेन्न, गवादिपदवच्चन्द्रपदमपि नानार्थमिति ज्ञाने प्रमात्वनिश्चयवतस्तथा बोधासंभवात्।

न च तं प्रति चन्द्रत्वसमानाधिकरणचन्द्रपदवाच्यत्वमेव तत्र प्रतिपादयतीति वाच्यम्, तथात्वे चन्द्रत्ववांश्चन्द्रपदवाच्य इत्यस्य सार्वजनीनत्वात् प्रकृष्टप्रकाशे चन्द्रत्व-निश्चये तत्र तद्वाच्यत्वाज्ञानायोगाल्लाघवादावश्यकत्वाच्च चन्द्रत्वमेवाज्ञातं वाक्यार्थ इति, तदपि न, चन्द्रपदवाच्यत्वस्य प्रकृष्टप्रकाशसामानाधिकरण्याज्ञानात् चन्द्रपदवाच्यस्य प्रकृष्टप्रकाशाश्रयाभेदाज्ञानाद्वा 'कश्चन्द्रः किं प्रकृष्टप्रकाशः [२]उताप्रकृष्टप्रकाश' इति प्रश्नसंशयाविति, उत्तरमपि तद्विषयम्।

नन्वेतावन्मात्रमजिज्ञास्यमेवानुपयोगात् प्रवृत्तिनिमित्तज्ञानाभावे तावन्मात्रेण व्यवहारायोगादिति चेन्न, प्रवृत्तिनिमित्ताज्ञानेऽपि तत्पदवाच्यत्वग्रहणात् स्वस्य तत्र तच्छब्द-व्यवहारोपपत्तेः, श्रोतुश्च व्युत्पन्नत्वे यथा व्युत्पत्तिः ततोऽर्थबोधसंभवात्। अव्युत्पन्नस्यापि स्वप्रयोगाल्लाघवादिसहकारेण प्रवृत्तिनिमित्तविशेषग्रहणपुरस्सरं व्युत्पत्तिग्रहसंभवात्। प्रवृत्तिनिमित्ताग्रहे हि व्यक्त्यन्तरे व्यवहारो न स्यात्। तद्व्यक्तिवाचकत्वं गृहीतवतस्तत्र प्रयोगः स्यादेव।

ननु प्रवृत्तिनिमित्तं विनापि वाचकत्वग्रहे तत्पदं श्रुतवतः, तस्य तस्मात् निर्विकल्पकापत्तिरिति चेन्न। आकाशपदादप्रवृत्तिनिमित्तस्यापि शब्दसमवायिकारणत्वस्य

---

[१] ङ - प्रकाशस्य

[२] घ, ङ - चन्द्रः उतान्य

इव[1] चन्द्रादिपदात् वाच्यत्वग्रहदशोपस्थितस्य प्रकृष्टप्रकाशादेः प्रकाशतया भानसंभवात्। यद्वा प्रकृष्टप्रकाशः चन्द्र इति वाक्यात् प्रकृष्टप्रकाश एव चन्द्रपदवाच्य इति सामर्थ्यात् [2]निश्चिते, लाघवादिना चन्द्रत्वादेः प्रवृत्तिनिमित्तत्वग्रहसंभवान्न कश्चिद्दोषः।

न च चन्द्रपदस्य नानार्थत्वग्रहवतः तथा बोधासंभवः, चन्द्रशब्दस्य नानार्थत्वज्ञानवतः कुमुदोन्मेषहेतुत्वेन प्रकृतचन्द्रपदार्थस्यैव जिज्ञासितत्वात् प्रकृतचन्द्रपदवाच्यता वैशिष्ट्य विषय एव प्रश्नः। अत उत्तरवाक्येनापि कुमुदोन्मेषहेतुत्वेन प्रकृतचन्द्रपदवाच्यः प्रकृष्टप्रकाश एवेति प्रतीतिरुपपद्यते। ततश्च लाघवादिना चन्द्रत्वस्यैव प्रकृतचन्द्रपदप्रवृत्तिनिमित्तत्वग्रहो भवतीति न कश्चिद्दोषः।

यच्च प्रकृष्टप्रकाशादिपदैः वाच्यत्वसंसर्गो मुख्यवृत्त्या बोध्यते लक्षणया वा। नाद्यः, तद्वाचकपदाभावात्। द्वितीये तु मुख्यार्थसंबन्धितया चन्द्रपदवाच्यत्वस्य ज्ञाने वाक्यं व्यर्थम्, अज्ञाने तु हेत्वभावान्न लक्षणेति, तन्न, चन्द्रपदे एव लक्षणाङ्गीकारात्। चन्द्रपदप्रवृत्तिनिमित्तसमानाधिकरणं चन्द्रपदवाच्यत्वमिति मुख्यार्थसंबन्धित्वस्य ज्ञातत्वात्, कोकिलः पिक इत्यादि निघण्टुपाठवत्। दृश्यते च काकशब्दस्य वायसवराहाद्यर्थसंदेहदशायामपि तत्प्रवृत्तिनिमित्तसामानाधिकरण्यस्य दध्युपघातकत्वेन निश्चयदशायां काकपदे लक्षणा ।

यच्चोक्तम् - प्राथमिकचन्द्रज्ञानं सत्तानवधारणात्मकत्वात् जिज्ञासानुकूलम्, उपदेशानन्तरभाविज्ञानं त्वाप्तोपदेशादितर्कप्रतिसन्धानेन सत्तावधारणात्मकमिति तत्तत् निवर्तकमिति, तन्न। प्राथमिकज्ञानस्य प्रकृष्टप्रकाशत्वादिना [3]स्वरूपावधारणस्य अनुभवसिद्धत्वात् चन्द्रत्वमपि तत्संस्थानात्मकमवधृतमेव। अत एव चन्द्रव्यक्तेः [4]प्रकृष्टप्रकाशात्मतया ज्ञातत्वेऽपि, चन्द्रत्वव्यञ्जकव्यक्तिविशेषात्मना [5]संदेहादिदर्शनेन तेन रूपेणाज्ञातत्वात्, चन्द्रात्मतया जिज्ञासितव्यक्तिरेव लक्षणया वाक्येन प्रतिपाद्यते।

---

[1] ग, ङ - एव

[2] घ, ङ - निश्चीयते

[3] घ, ङ - स्वरूपावधारणत्वस्य

[4] ग, ङ - प्रकृष्टप्रकाशात्मकतया

[5] घ, ङ - संदेहाज्ञानादि

अर्थाच्चन्द्रत्वज्ञानं भवतीति, न तद्वैशिष्ट्यं वाक्यप्रमेयम्। अत एव 'कश्चन्द्र इति [१]जिज्ञासते, न तु कास्य जातिः' इति निरस्तम्।

किञ्च जिज्ञास्यत्वं किं विवक्षितम्। यदि स्वरूपस्य जिज्ञासाविशेष्यत्वं विवक्षितं तदेष्टापत्तिः। यदि च किंशब्दविवक्षितप्रकारविशेषविशिष्टरूपेणाज्ञाततत्वात् विशेष्ये [२]जिज्ञास्यत्वं विवक्षितं तदानीमपि इष्टापत्तिः। यदि च विशेष्यस्य स्वरूपेणाज्ञाततत्वं विशेष्ये जिज्ञास्यत्वं विवक्षितम्, तदा कश्चन्द्र इति जिज्ञासा न संभवत्यनिर्धारितप्रकार-विशेषविशिष्टवाची हि किंशब्दः। तत्र च प्रकारविशेषो वा तद्विशिष्टरूपेण विशेष्यमेव वा अज्ञातम्, न तु व्यक्तिस्वरूपमात्रम्। अत एव स्थाणुत्वाद्यज्ञाने तत्संशयदशायां कोऽयमूर्ध्वः पदार्थ इति स्थाणुत्वविषयः प्रश्नो भवति, न तु स्वरूपविषयः। अत एव 'कोऽयमूर्ध्वः किं स्थाणुः किं वा पुरुष' इति किंशब्दविवरणं अयं स्थाणुरित्युत्तरञ्च। कास्य जातिरिति प्रश्नस्तु न जातिविषयः, किन्तु जातिगतविशेषविषय एव। जातिविषयप्रश्नस्तु प्रकृष्टप्रकाशः कः इत्याकारः। अत एव प्रकृष्टप्रकाशः कः, किं चन्द्रः किं वान्य इति तद्विवरणम्। किञ्च त्वद्रीत्या ज्योतिः पदार्थस्वरूपाज्ञानात् 'किं ज्योतिरिति' प्रश्ने 'प्रकाशकं ज्योतिः' इत्युत्तरेण तदज्ञाननिवृत्तिर्वाच्या। तथा च तदनन्तरभावी कश्चन्द्रः, कानि नक्षत्राणीति प्रश्नः कथमुपपद्यते, स्वरूपाज्ञानस्य निवृत्तत्वात्। न च ज्योतिरात्मना ज्ञातत्वेऽपि चन्द्रात्मना अज्ञानमिति वाच्यम्, स्वरूपद्वयाभावेन धर्म-भेदमन्तरेण व्यवस्थाया असंभवात्।

यच्च प्रतिधर्मौपाधिकधर्मिभेदादेकत्रैव धर्मिणि ज्ञातत्वाज्ञातत्वयोरुपपत्तेः। प्रकृष्ट-प्रकाशाद्याश्रयस्वरूपावधारणेऽपि चन्द्रत्वाश्रयस्वरूपं नावधृतमिति तत्राज्ञानमिति, तन्न, प्रतिधर्मं धर्मिभेदे मानाभावात्। नीलमुत्पलाद्भिन्नम्, घटो रूपी न भवति, रूपवान् वायुः स्पर्शवान्न भवति, चन्द्रः प्रकृष्टप्रकाशो न भवतीति प्रतीत्यापत्तेश्च। शुक्तित्वाश्रयमन्वभूवं शुक्तित्वं तत्र नान्वभूवम्, किन्तु रजतत्वम्, वंशत्वाश्रयमन्वभूवम्, न तु वंशत्वम्। किन्तूरगत्वमिति तदनुभवाभावेऽपि [३]तदाश्रयानुभवपरामर्शाच्च, इदन्त्वेनानुभूयमाने घटत्वाश्रयं नान्वभूवमित्यनुभवो असिद्ध एव। घटमन्वभूवं न तु घटत्वमित्येव हि

---

[१] घ, ङ - जिज्ञास्यते

[२] क, ङ, छ - अज्ञाततत्वम्

[३] ङ - तदाश्रयत्वानुभव

वल्मीकभ्रमबाधानन्तरप्रतीतिः। भ्रमदशायां शुक्तिं न [१]अनुभवामि इति प्रतीतिस्तु शुक्तिभेदारोपादज्ञानारोपः। बाधानन्तरं शुक्तिमन्वभूवम्, न तु शुक्तित्वमिति प्रतीतेः।

यच्च व्यवहारायोग्यता ह्यावरणम् ततश्च प्रकृष्टप्रकाशव्यवहारायोग्यता रूपावरणनिवृत्तावपि चन्द्रव्यवहारायोग्यतारूपावरणस्यानिवृत्तेः तत्तद्धर्माश्रयभेदाभावेऽपि, एकत्रैवावरणानावरणयोरुपपत्तिरिति, तन्न। बालस्याव्युत्पन्नस्य यावत् पदस्य घटादि ज्ञानेनाज्ञानावरणनिवृत्तिर्वाच्या। तत्रावरणनिवृत्तावप्यव्यवहारो व्युत्पत्त्यभावादेव तथेहाप्युपपत्तौ किमर्थाविद्यावरणकल्पना। चन्द्रश्चन्द्रपदवाच्य इति व्युत्पत्तिरस्त्येवेति चेत् तर्हि कश्चिच्चन्द्र इति व्यवहारस्यापि सत्त्वान्नावरणम्। तद्व्यवहारायोग्यत्वलक्षणं प्रकृष्टप्रकाशः चन्द्र इति व्यवहाराभावेन तदयोग्यतारूपावरणं वाच्यमिति चेत्तर्हि, इन्द्र इन्द्रशब्दवाच्य इति ज्ञानेऽपि वज्रहस्तः पुरन्दर इति व्युत्पत्तौ यथा वज्रहस्ते पुरंदरशब्दप्रयोगस्तथा वज्रहस्ते कथमिन्द्रशब्दाप्रयोगः वज्रहस्तत्वावच्छेदेन पुरंदरपदवदिन्द्रपदस्य व्युत्पत्यग्रहादिति चेत् तर्हि वज्रहस्त इन्द्र इत्युपदेशानन्तरं कथं वज्रहस्ते इन्द्रव्यवहारः। तत्र तदा व्युत्पत्तेरिति चेत् हन्त, एवं प्रकृष्टप्रकाशावच्छेदेन व्युत्पत्तितदभावाभ्यामेव प्रकृष्टप्रकाशे व्यवहाराव्यवहारयोः 'कश्चेन्द्र इन्द्रं न जानामि, वज्रहस्त इन्द्र' इत्याद्यज्ञानसंशय-प्रश्नोत्तराणामिवात्रापि संशयादीनामप्युपपत्तौ किमर्थाविद्यावरणकल्पना। यच्च घटत्वादि सामान्यस्य यथायमसाधारणधर्मवान् सामान्यवानिति वाऽनुभवेऽप्यज्ञानम्, अन्यथा तत्संशयाद्ययोगात्, एवं व्यक्तावपि किं न स्यात्।

न च तत्र न स्वरूपाज्ञानात् संशयः, किन्तु तत्प्रकारकाज्ञानादिति वाच्यम्, तस्यापि घटत्वादिप्रकारकत्वात्[२]। न च तत्र धर्मत्वादिकं प्रकार इति वाच्यम्, तथापि घटत्वादिप्रकारकताया[३] अनपायात्। असाधारणधर्मवानयमित्यस्य घटो घटत्वाद्यसाधारण-धर्मवानयमिति ज्ञानात् तस्याविशेषादिति, तन्न, तवाप्यनुभूयमाने घटत्वे अज्ञानासंभवात्। न च सत्तानवधारणं सोऽनुभवः, तथा सति कथमसाधारणधर्मवान्न वा [४]सामान्यवान् न वेति संशयाभावः। अतो नास्त्येव घटत्वाज्ञानम्। अयं घटो न वेति संशयस्तु तद्विरोधिज्ञानाभावादेवोपपद्यते।

---

[१] ख, ग, घ, ङ - अन्वभूवम्

[२] ख, च, छ - प्रकारत्वात्

[३] ख, ग - प्रकारतायाः

[४] ख, घ - सामान्यधर्मवान्

४. अखण्डार्थत्वभङ्गः

ननु किं तद्विरोधिज्ञानम्, न तावत् घटत्वप्रकारकम्। घटविषयकस्य[१] सामान्यवानिति ज्ञानस्य तदविरोधित्वात्। तत्प्रकारे सामान्यधर्माप्रकारकं तत्प्रकारकज्ञानं तत्कोटिकसंशयविरोधीत्युक्तौ सामान्यात्मकघटत्ववानिति ज्ञानस्य तद्विविरोधिता न स्यात्। सामान्यधर्ममात्राप्रकारकत्वविवक्षायामपि सामान्यवानयं घट इति ज्ञानात् संशयनिवृत्तिर्न स्यादिति चेन्न, सामान्यधर्मानवच्छिन्नतत्प्रकारकत्ता[२] ज्ञानस्य तत्कोटिकसंशयविरोधात्। सामान्यवानयं घट इत्यत्र च सामान्यधर्मावच्छिन्नप्रकारतायाम्[३] सत्यामपि तदनवच्छिन्नापि प्रकारतास्ति। किञ्च वाक्यस्य स्वरूपमात्रपरत्वे लक्षणाप्रसङ्गः। तच्चानुपपन्नम्, अनुपपत्त्यभावात्। न च तात्पर्यानुपपत्या लक्षणा, वाच्यत्वविशिष्टस्यैव बुभुत्सितत्वेन तात्पर्यगोचरत्वात्। तस्मात् साध्यविकलो दृष्टान्तः।

सत्यादिवाक्येऽपि स्वरूपमात्रतात्पर्यात् लक्षणेत्यप्ययुक्तम्, भेदसत्यत्वस्थापनेन तस्यापि विशिष्टतात्पर्यकत्वनिर्णयात्। मिथ्यात्वेऽपि तस्य व्यावहारिकसत्यत्वादि विशिष्टबोधनसंभवात्।

न च [४]'**तमेव विदित्वा**' इत्यवधारणेनान्यज्ञानस्य मोक्षसाधनत्वासंभवः, तदर्थस्य प्रागेवाभिधानात्। किञ्च '**तमेव विदित्वा**' इत्यत्र वेदनशब्दस्य वृत्तिः तदवच्छिन्नचैतन्यं चार्थः। एवञ्च ब्रह्मणश्चैतन्यविषयत्वाभावेऽपि वेदनैकदेशवृत्तिविषयत्वाद्यथा वेदन-विषयता तथा वृत्तेर्वृत्तिविषयत्वाभावेऽपि वेदनैकदेशचैतन्यविषयत्वेन वेदनविषयत्वमस्त्ये-वेति तमेवेत्यवधारणमनुपपन्नम्, अतो बाधश्च।

यदुक्तम् - ज्ञानमालिन्यनिवृत्तये हि विचारः क्रियते। मालिन्यञ्च सत्तानवधारणात्म-कत्वम्। ततश्च सत्तावधारणात्मकं ज्ञानमविद्यां निवर्तयति, न तु तस्य [५]सप्रकारत्वम् अपि प्रयोजकम्। सत्तानिश्चयरूपस्यैव तन्निवर्तकत्वात्, अतो न बाध इति तन्न, स्वरूपमात्रेऽप्यनवधारणासिद्धेः। सद्वितीयत्वाद्वितीयत्वादावेव ह्यनवधारत्तैम्, तद्विषयत्व-संशयदर्शनात्।

---

[१] ङ - घटत्वविषयकस्य

[२] क, छ - तत्प्रकारकज्ञानस्य

[३] ग, ङ - प्रकारकत्तायाम्

[४] वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्।
तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय।। (श्वे.उ.३.८)

[५] ख, घ, ङ - सप्रकारकत्वम्

न च तत एव स्वरूपेप्यनवधारणमिति वक्तुं शक्यम्। ऊर्ध्वोऽयं स्थाणुर्वा पुरुषो वेति स्थाणुत्वसंशयेऽप्यूर्ध्वानवधारणासिद्धेः। अन्यथा स्थाणुरेवेत्युपदेशानन्तरमपि पनसाम्रादिसन्देहदर्शनात् स्थाण्ववधारणमपि न स्यात्। ततश्च यत्किञ्चित्संशयस्य सर्वत्र सुलभत्वात् क्वाप्यवधारणं न स्यात्। तस्मात् सप्रकारकसंशयनिवर्तकं ज्ञानं सप्रकारकमेव विचाराधीनमिति वाक्यान्निष्प्रकारकज्ञानासिद्धेर्बाधः।

अत्र यदुक्तं समानप्रकारकज्ञानमेव संशयनिवर्तकम्, न तु समानविषयमिति मते पुरुषे दण्डोऽस्ति न वेति संशयस्य दण्डी पुरुष इति ज्ञानादनिवृत्तिप्रसङ्ग इति, तन्न। न हि कोट्या समानप्रकारकत्वं विवक्षितम्, तथा सति स्थाणुर्वा पुरुषो वेति संशयस्य कुड्यत्वनिश्चयादनिवृत्त्यापत्तेः। किन्तु धर्मितावच्छेदकधर्मेणैव विवक्षितम्। तस्मात् संशयधर्मितावच्छेदकावच्छिन्नधर्मिताकस्संशयकोटिविरोधिवैशिष्ट्यनिश्चयः संशयविरोधी। यथा च न समानविषयत्वेन निवर्तकत्वं तथा प्रागेवोक्तम्।

ननु विरोधिवैशिष्ट्यज्ञानस्य निवर्तकत्वे प्रमेयवदिति ज्ञानात् संशयनिवृत्त्यापत्तिः[1]। न च सामान्यधर्मानवच्छिन्नप्रकारताकत्वमपि विरोधिविशेषणम्। पुरुषे दण्ड इति ज्ञानस्य दण्डी न वेति संशयनिवर्तकत्वाभावापत्तेरिति चेन्न, सामान्यधर्मानवच्छिन्नविषय-विभाजकोपाधिविशिष्टत्वस्य विरोधिनि विवक्षितत्वात्। विषयविभाजकोपाधिश्च विशेष्यत्वप्रकारत्वादिः।

नन्वेवमपि दण्डी पुरुष इति ज्ञानमनिवर्तकं स्यात्, दण्डत्वस्यापि सकलदण्डवृत्तेः सामान्यत्वात्। न च संशयकोटिद्वयसाधारणधर्म एव विवक्षितः। दण्डी न वेति संशयस्य द्रव्यवानित्यनेनापि निवृत्त्यापत्तेः।

न च संशयकोटिविरोधितदितरसाधारणधर्मो विवक्षितः, द्रव्यत्वन्तु दण्डाभाव-कोट्यविरोधिकुण्डलादिसाधारणमिति वाच्यम्। सुवर्णे तैजसत्वपार्थिवत्वसंदेहदशायां सुवर्णत्वसामानाधिकरण्यद्रव्यत्वसाक्षाद्व्याप्यजातिमानिति निश्चयस्यानिवर्तकत्वात्, तस्याप्युक्तरूपत्वादिति चेन्न, विरोधितावच्छेदकेतरधर्मस्य सामान्यधर्मपदेन विवक्षितत्वात्। विरोधितावच्छेदकञ्च दण्डीत्यत्र दण्डत्वम्, अयं घट इत्यत्र घटत्वमिति [2]अवधेयम्। विरोधिता च संशयकोटितावच्छेदकावच्छिन्नप्रतियोगिताकाविवक्षिता। तेन द्रव्यत्वस्यापि

---

[1] ग, ङ - निवृत्त्यापत्तेः

[2] ग - अनुसन्धेयम्

यत्किञ्चिद्विरोधितावच्छेदकत्वात्, अत्र द्रव्यवानिति निश्चयस्य न दण्डी न वेति संशयनिवर्तकत्वाशङ्कावकाशः ।

अयमत्र निष्कर्षः - तद्धर्मावच्छिन्नप्रतियोगिताकतत्संशयकोटिनिरूपितविरोधितावच्छेदकेतरधर्मानवच्छिन्नविषयविभाजकोपाधिविशिष्टतत्संशयकोटिविरोधिवैशिष्ट्यनिश्चयः तद्धर्मभिन्नधर्मानवच्छिन्नकोटिताकतद्धर्मकोटिकसंशयविरोधीति।

यदुक्तम् - विशिष्टविषयाज्ञानं सप्रकारकज्ञाननिवर्त्यम्, केवलविषयं तु केवलज्ञाननिवर्त्यम्, न तु तद्गोचरवैशिष्ट्यविषयकज्ञाननिवर्त्यम्। मूलाज्ञानञ्च चैतन्यमात्रगोचरमिति न, तन्निवृत्तौ विशिष्टज्ञानापेक्षेति, तन्न, मूलाज्ञानस्य चैतन्यावारकत्वासिद्धेः। मूलाज्ञानस्य चैतन्यावारकत्वे हि तस्या मोक्षमनुवृत्तेः। घटस्सन् घट स्फुरतीत्यादि व्यवहारायोग्यतायास्सर्वदा सत्त्वेन सार्वलौकिकव्यवहारोच्छेदप्रसङ्गात्।

न च विशिष्टस्य व्यवहारे सत्यपि स्वरूपमात्रव्यवहाराभावात् तद्व्यवहारायोग्यतारूपावरणप्रयोजकं मूलाज्ञानमिति वाच्यम्, विशिष्टस्वरूपव्यवहारदशायां स्वरूपमात्रव्यवहाराभावस्य विशिष्टव्यवहारसामग्री प्रयोज्यतया तस्यावरणानपेक्षत्वात्। अन्यथा घटादि समूहालम्बनानन्तरं समूहालम्बनव्यवहारे सति तदानीं घटमात्रगोचरव्यवहाराभावेन तत्राप्यावरणकल्पनाप्रसङ्गात्, विशिष्टस्वरूपगोचरव्यवराभावदशायां तु [१]शब्दानां प्रवृत्तिनिमित्तविशिष्टविषयतया स्वरूपमात्रगोचरशब्दाभावादनुपपन्नः। ततः तत्सामग्रीकालीनतादृशव्यवहारायोग्यता रूपावरणं कथं स्यात्। लक्षणया स्वरूपमात्रगोचरव्यवहाराभावस्तु सर्वेषामपि पदानां वाक्यानाञ्च विशिष्टविषयत्वव्युत्पत्तेरेव।

यच्चोक्तम् - प्रकारो नाम विषयमात्रं किं वा विशेषणं, व्यावर्तकं वा भासमानवैशिष्ट्यप्रतियोगि वा। आद्यमखण्डज्ञानस्यापीति न बाधः। न द्वितीयः, चित्रगुरिति ज्ञानस्य निष्प्रकारकत्वप्रसङ्गात्, गवां तत्राविशेषणत्वात्। न तृतीयः, प्रमेयत्वादावभावात्। किञ्च व्यावृत्तिबोधहेतुज्ञानविषयत्वरूपेण व्यावर्तकविषयज्ञानं सप्रकारकम्, उत वस्तुतोव्यावर्तकविषयम्। नाद्यः, तेनैव ज्ञानेन व्यावर्तकस्य तथानवगाहनात्। नान्त्यः, पराभिमतनिर्विकल्पकेऽस्मदभिमताखण्डब्रह्मसाक्षात्कारे तत्सत्त्वात्, ब्रह्मण एव स्वमहिम्ना जडव्यावर्तकत्वात्। न चतुर्थः, लाघवेन सविषयत्वस्यैव सप्रकारकशब्दार्थत्वात्।

---

[१] क, छ - सशब्दानाम्; च - सर्वशब्दानाम्

किञ्च भासमानवैशिष्ट्यप्रतियोगित्वेन तद्विषयज्ञानं सप्रकारकं चेत्, स्वस्यैव स्वविषयत्वापत्तिः। वस्तुतो भासमानवैशिष्ट्यं प्रति प्रतियोगित्वं प्रकारत्वञ्चेत्, विशेष्यस्यापि तदापत्तिः। किञ्चाभावविशिष्टज्ञानस्य निष्प्रकारकत्वापत्तिः, स्वरूपातिरिक्त वैशिष्ट्यस्य तत्राभावात्। अभावस्य भूतलादेश्चान्योऽन्याप्रतियोगित्वात् स्वाप्रतियोगि-कत्वाच्च। भासमानत्वञ्च किं भानविषयत्वमात्रमुत विशेषणविशेष्यसंबन्धविधया भासमानत्वम्, प्रत्यासत्तिं विना भासमानत्वं वा? नाद्यः, प्रमेयमिति ज्ञाने विश्वस्य प्रकारत्वापातात्। द्वितीये यदि विधा प्रकारस्तदा आत्माश्रयः, अन्यस्त्वप्रसिद्धः। न तृतीयः, अयं घट इति प्रत्यक्षे घटत्वेऽव्याप्तेः। सन्निकर्षादेव [१]तत्सन्निकर्षप्रतीतेः। प्रमेयमिति ज्ञाने च घटत्वादेः प्रकारत्वे तत्संशयाभावप्रसङ्गः। तदंशे तत्सत्तानवधारणमिति चेत् तर्हि किं प्रकारत्वेन। अखण्डज्ञानस्यापि सत्तावधारणात्मकत्वेन संशयादिनिवर्तकत्वसंभवात्। प्रकारशब्दार्थस्तु विषयत्वमिति, तन्न, अनुभवविरोधात्। अनुभूयते हि दण्डीपुरुष इति प्रत्यये, पुरुषे दण्ड इति प्रत्यये च दण्डादेर्विषयतायां समानायामपि कोऽपि विशेषः, स एवास्माकं प्रकारत्वादिः, अनुभवापह्नवे च सविषयत्वमेव न सिद्ध्येत्। तस्मात् सत्यादिवाक्यस्याखण्डार्थत्वानुपपत्तेर्बाधः, असिद्धिश्च। लक्षणवाक्यत्वं तावदसिद्धम्, [२]असाधारणधर्मस्यैव लक्षणत्वात्, त्वन्मते च तत्प्रतिपादकत्वाभावात्।

अत्र यदुक्तम् - सत्यज्ञानानन्दाभेदस्याब्रह्मण्यभावेन ब्रह्मणस्तदात्मत्वेन च [३]अव्याप्त्याद्यभावेन तस्य लक्षणत्वात्। वस्तुनः स्वरूपलक्षणस्यावश्यकत्वादन्यस्य च तस्याभावात् सत्याद्यात्मत्वमेव स्वरूपलक्षणं युक्तम्। जगत्कारणत्वादेः कल्पितस्य वास्तवस्वरूपत्वानुपपत्तेः।

न च [४]सत्यत्वादीनां धर्मत्वाभावे लक्षणत्वानुपपत्तिः, असाधारणधर्मस्यैव लक्षणत्वादिति वाच्यम्। एवं परिभाषायां प्रमाणाभावात्, '**यद्विषयत्वेन ज्ञानस्य व्यावर्तकता तल्लक्षणं तद्विषयश्च स्वरूपमपि**' इत्युक्तमिति स्वरूपमपि लक्षणमिति, तन्न। जगत्कारणत्वादीनामपि स्वरूपव्यावर्तकतया लक्षणत्वात्, स्वरूपात्मकलक्षणमना-वश्यकम्, तदभावे बाधकाभावात्। न वा स्वरूपस्य लक्षणत्वं संभवति, असाधारण-

---

[१] ग, घ, ङ - तत्संसर्ग

[२] घ, ङ - असाधारणधर्मप्रतिपादकस्यैव लक्षणवाक्यत्वात्

[३] घ, ङ - अतिव्याप्त्याद्यभावेन

[४] ङ- सत्यादीनाम्

धर्मत्वाभावात्। **यद्विषयत्वेन ज्ञानस्य व्यावर्तकता तल्लक्षणं तद्विषयश्च स्वरूपमपीति** चेन्न, सत्यत्वादिसंबन्धविषयतयैव ज्ञानस्य व्यावर्तकत्वात्। अन्यथा सत्यपदादेव जडव्यावृत्तिसिद्धौ ज्ञानपदवैयर्थ्यं स्यात्। यदि च ज्ञानपदादेव जडव्यावृत्तिसिद्धिः तदा ज्ञानत्वादिसंबन्धविषयतयैव ज्ञानस्य व्यावर्तकत्वमिति, न स्वरूपविषयत्वेन व्यावर्तकता।

तन्मात्रप्रश्नोत्तरत्वञ्चासिद्धम्। तत्र तावत् प्रश्नादर्शनेन विशेष्यासिद्धिः। न च वाक्यत्वेन तदनुमानम्, व्यभिचारात्। नाप्युत्तरत्वेनान्योऽन्याश्रयात्। [१]प्रश्ने सति ह्युत्तरत्वसिद्धिः। कल्पनायामपि सत्यत्वादिविशिष्टवस्तुपरसत्यादिवाक्यानुसारेण प्रश्नस्यापि विशिष्टपरत्वेनैव कल्पनाद्विशेषणासिद्धिश्च।

अत्र यदुक्तम् - उत्तरस्यानन्तवस्तुपरत्वात् प्रश्नोऽपि तथैव कल्पयितुमुचितः, न त्वसाधारणधर्मविषयः। अनन्तत्वं ह्यभावाप्रतियोगित्वमन्तशब्दस्य परिच्छेदवाचिनोऽभावपर्यवसानात्। ततश्च नान्योऽन्याभावापेक्षसंसर्ग-संभवः।

न च ध्वंस एवान्तः, अभावत्वे सति [२]उत्पत्तिमत्त्वरूपस्य ध्वंसत्वस्य शक्यत्वे गौरवात्। नगरान्तस्सीमान्त इत्यादावत्यन्ताभावेऽपि प्रयोगाच्च। अस्तु तर्हि संसर्गाभाव इति चेन्न, संसर्गाभावत्वस्यैकस्याभावात् नानार्थत्वापत्तेः। अन्योऽन्याभावातिरिक्ताभावत्वेन अनुगमे गौरवादिति, तन्न। भेदस्य प्रामाणिकतयानन्तशब्दस्याभावाप्रतियोगित्वपरत्वासिद्ध्या देशाद्यपरिच्छेदमात्रपरत्वात्। अन्तशब्दस्य च नाभावमात्रमर्थः। इह घटाभाव इतिवत् इह घटान्त इत्यप्रयोगात्। नगरान्तस्सीमान्त इत्यत्राप्यवयवविशेष एवान्तशब्दः प्रयुज्यते। [३]'**आद्यन्तौ टकितौ**' [४]'**अन्तादिवच्च**' इत्यत्रादिप्रतिसंबन्धितयान्तशब्दप्रयोगात्, 'समासान्तः समासान्तावयव' इति व्याख्यानाच्च। अभावपरत्वे अयं सीमान्त इत्यप्रयोगापातात्। इह सीमान्त इति प्रयोगापाताच्च। नगरमध्येऽपि नगराभावस्य सत्त्वेन नगरान्त इति प्रयोगप्रसङ्गाच्च।

अस्तु वाऽभावपर्यवसानमन्तशब्दस्य, तथापि न तत्स्वारस्यानुरोधेन वाक्यतात्पर्यनिर्णयः, उपक्रमोपसंहारस्थसत्यादिपदानां प्रवृत्तिनिमित्तविशिष्टाभिधानस्वारस्यात्।

---

[१] घ, ङ - प्रश्नत्वे

[२] ङ - उत्पत्तिमत्त्वस्य; क, ख, ग, घ, छ - उत्पत्तिमत्त्वरूपत्वस्य

[३] पा.सू.१.१.४६

[४] पा.सू.६.१.८५

समानाधिकरणवाक्यस्यानेकप्रवृत्तिनिमित्तविशिष्टैकार्थाभिधानस्वारस्याच्च तदनुरोधेनानन्तपदस्यैवार्थवर्णनस्योचितत्वात्। न ह्येकपदानुरोधेनोपक्रमोपसंहारस्थानां बहूनां पदानां वाक्यस्य च स्वारस्यभङ्गो युक्तः।

किञ्चैवमुत्तरानुसारेण प्रश्नस्य स्वरूपमात्रपरत्वं साधयता कथं प्रश्नानुसारेण उत्तरस्य स्वरूपमात्रपरत्वं साध्यते। यच्च तन्मात्रप्रश्नोत्तरत्वादिति हेतुः त्वंपदार्थगोचरवाक्यविषयः। तत्र हि '**कतम आत्मा**' इति प्रश्नस्योत्तरतया '**योऽयं विज्ञानमय**' इत्यादिवाक्यं श्रूयते। स च प्रश्नो न जात्यभिप्रायः,आत्मन एकत्वादिति, तन्न। 'तम' प्रत्ययेन प्रश्नस्य जातिविषयत्वप्रतीतेः। न च जात्यसिद्धिः, आत्मनां बहुत्वस्थापनात्। इत एव प्रश्नाद्भेदसिद्धेश्च स्वरूपस्य निर्धारितत्वाच्च। अहमिति प्रतीयमाने स्वरूपे [१]संदेहविपर्ययाभावात् देहादितादात्म्यकोटिक एव हि तत्संदेहः।

ननु तन्मात्रजिज्ञासानिवर्तकवाक्यत्वं विवक्षितं जिज्ञासानिवर्तकत्वञ्च तद्योग्यत्वम्, सत्यादिवाक्ये प्रश्नाभावेऽप्येतदस्त्येवेति न स्वरूपासिद्धिरिति चेन्न। अस्मिन् ज्योतिर्मण्डलेऽवश्यं चन्द्रो वर्तते। तञ्च प्रत्यक्षेणैव जानामि, अयं चन्द्र इति तु न जानामि। अस्मिन् ज्योतिर्मण्डले कश्चन्द्रः त्वमेव ब्रूहि, अयं चन्द्र इतीति प्रश्ननिरूपणेन प्रकृष्टप्रकाशत्वादि तत्तज्ज्योतिर्व्यक्त्यसाधारणतत्तद्धर्मावच्छेदेन चन्द्रशब्दवाच्यत्वनिर्दिधारयिषा [२]रूपस्य एव जिज्ञासायाः प्रतीतेः, जिज्ञासायाः वाच्यताविषयत्वञ्च जिज्ञास्यान्तराभावात् [३]व्युत्पन्नचन्द्रपदस्य प्रश्नादर्शनात् प्रकृष्टप्रकाशश्चन्द्रशब्दवाच्य[४] इत्युत्तरेणापि जिज्ञासानिवृत्तिदर्शनात् वाच्यत्वगोचरनिघण्ट्वादौ सर्वत्र [५]समानाधिकरणप्रयोगस्य एव दर्शनेन तत्पदवाच्यतायां तत्पदप्रवृत्तेः निरूढलक्षणामूलत्वाच्चावगम्यते।

ननु किंपदविशेष्यस्यैव जिज्ञास्यत्वं वक्तव्यम्। जिज्ञास्यत्वञ्च जिज्ञासाप्राधान्यम्, तच्चाज्ञातत्वम्, अतः स्वरूपस्यैवाज्ञातत्वं वक्तव्यमिति चेन्न, किंशब्दविशेष्याज्ञानस्य क्वापि प्रश्ने अदर्शनात्। कश्चन्द्र इत्यादौ [६]विशेषणानिर्धारणम् एव हि प्रतीयते। प्रकृष्ट-

---

[१] ग - संदेहविपर्ययोरभावात्

[२] ग, घ, ङ - रूपायाः; च - रूपत्वस्य

[३] ग, घ, ङ - अव्युत्पन्नचन्द्रपदस्य प्रश्नदर्शनात्

[४] ग, घ, ङ - पदवाच्यः

[५] घ, ङ - सामानाधिकरण्य

[६] ग, घ, ङ - विशेषणनिर्धारणम्

प्रकाशो वा तस्योत्तरस्थो वा दक्षिणस्थो वा शाखाग्रस्थो वा प्रासादसमीपस्थो वेत्यादिरूपेण प्रश्नवाक्यस्य विवरणदर्शनात्। एवञ्च किं शब्दो युगपत् बोधनासंभवादनिर्धारितानेक विशेषणान्यावृत्त्या बोधयति। अतः सर्वत्र किं शब्दार्थविशेषणावच्छेदेन[१] विशेषणान्तर-संसर्गस्यैव [२]अज्ञातता। कश्चन्द्र इत्यत्र प्रकृष्टप्रकाशत्वावच्छेदेन चन्द्रपदवाच्यत्वविशेषण संसर्गाज्ञानमस्त्येव। गेहे को देवदत्तो वा यज्ञदत्तो वेत्यादिष्वपि देवदत्तत्वाद्यवच्छेदेन भूतलरूपविशेषणसंसर्गस्याज्ञानमस्त्येव, अप्रयोजकत्वञ्च।

यदुक्तम् - न चाप्रयोजकत्वम्, अनिर्णीते हि ब्रह्मपदार्थे वाक्येन तत्संसर्गस्य प्रमापयितुमशक्यत्वात् तन्निर्णयश्च न मानान्तरेणालौकिकत्वात्। तत्परसत्यादिवाक्यादेव पदार्थभूततत्प्रतिपत्तौ तेनैव पुनस्संसर्गप्रतिपादनस्य विरम्यव्यापारप्रसङ्गेनायोगात्।

ननु वृद्धिशाली ब्रह्मपदार्थ इति व्याकरणादिना निर्णीतत्वात् तत्संसर्गनिष्ठं वाक्यमिति चेन्न, तावता [३]ब्रह्मत्वमात्रं पदार्थ इति सिद्ध्यति। नैतावता तत्प्रतीतिः पर्यवसन्ना, ब्रह्मत्त्वस्य लोके बहुविधस्योपलम्भात् तद्विशेषाकाङ्क्षणादन्वयप्रतियोगिता-वच्छेदकविशिष्टतयोपलम्भे सत्येव पदानामन्वयबोधकत्वेन ब्रह्मणो जीवादिव्यावृत्त-रूपेणाप्रतीतौ [४]तत्संसर्गबोधनायोगात् इति तन्न। विशिष्टे व्युत्पत्त्यसिद्धौ विशेष्यस्वरूप-लक्षणाया असंभवात्।

किञ्च व्याकरणेन प्रवृत्तिनिमित्तस्य [५]बृहत्वविशेषस्याप्रतीतावपि त्वदुक्तासंकोच-न्यायेन बृहत्वमात्रमतिप्रसक्तमिति बुद्धिसहकृतेन प्रवृत्तिनिमित्तनिश्चयः कुतो न स्यात्। किञ्च बृहत्वविशेषानिर्धारणेऽपि ब्रह्मविदाप्नोतीत्युक्तब्रह्मशब्दार्थः क इत्यपेक्षायां सत्यज्ञानानन्तत्वविशिष्टं ब्रह्मशब्दार्थ इत्यवगमे को विरोधः। युक्तञ्चैतत्। ब्रह्मज्ञानस्य प्राप्तिहेतुत्वं [६]'**ब्रह्मविदाप्नोति परम्**' इति प्रतिज्ञाय, ब्रह्मपदार्थस्य विदित्युक्तवेदन-प्रकारस्याप्नोतीत्युक्ताप्तिप्रकारस्य परशब्दार्थस्य चानिर्णयात्, वाक्यार्थप्रतीत्यनिष्पत्तौ

---

[१] ग - विशेषणत्वावच्छेदेन

[२] क, ख, छ - ज्ञातता

[३] क, घ, ङ, छ - बृहत्वमात्रम्

[४] ग, घ, ङ - तत्संसर्गाबोधनात्

[५] क, ख, ग, छ - ब्रह्मत्व

[६] **ब्रह्मविदाप्नोति परम्**। तदेषाभ्युक्ता। सत्यं ज्ञानमनन्तं ब्रह्म। यो वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वान् कामान् सह। ब्रह्मणा विपश्चितेति। (तै.उ.२.१)

तत्सिद्धये तदेषाभ्युक्तेति पूर्ववाक्यविवरणरूपत्वमुत्तरवाक्यस्य प्रतिज्ञाय सत्यज्ञानादि मन्त्रेण सत्यज्ञानानन्तात्मकं ब्रह्म हृदयगुहावकाशे[१] य उपास्ते स समस्तकल्याणगुणात्मकं ब्रह्मानुभवतीति व्याख्यायते। अतोऽनेन मन्त्रेण पूर्ववाक्यविवरणरूपेण सत्यत्वादिविशिष्ट-ब्रह्मपदव्युत्पत्तिग्रहो युज्यत एव। कर्मत्वाद्यनेकार्थप्रतिपादकस्यास्य [२]मन्त्रवाक्यस्य निर्विशेषस्वरूपपरत्वमत्यन्तासङ्गतम्।

यदुक्तं व्याकरणादिभिरवगतबृहत्त्वस्यैवासति संकोचकप्रमाणे [३]निरवधिकत्वस्य एव युक्तत्वेन [४]सर्वात्मतायोग्यत्वम् एव तदिति प्रागवगतसामान्यापेक्षितविशेषस्वरूपपरैः सत्यज्ञानादिवाक्यैस्सत्यज्ञानानन्तात्मा प्रतिपाद्यते। तेषां भेदे ब्रह्मणः सर्वात्मत्वायोगात् तेषाञ्च श्रुतिन्यायसिद्धत्वात् न घटादेरिव तेषां मिथ्यात्वेनापि सर्वात्मकत्वसंभव इति तन्न, तत्र सर्वात्मतायोग्यत्वं [५]बृहत्वमित्यपि अयुक्तम्। न हि लोके एकात्मत्वयोग्यमणु, द्व्यात्मकत्वयोग्यं बृहत्, त्र्यात्मकत्वयोग्यं ततोऽपि बृहदिति। एवं न्यूनसंख्याक-वस्त्वात्मकत्वयोग्यादधिकसंख्याकवस्त्वात्मकत्वयोग्यं बृहदिति व्युत्पत्तिरस्ति येनैवमुच्येत। सार्वात्म्यविरोधेन सत्यत्वादौ न तात्पर्यमित्यप्यसंगतम्, मिथ्यात्वेन तदविरोधात्। न च मिथ्यात्वेन श्रुतेस्तत्र तात्पर्यासंभवः ज्योतिष्टोमादिवाक्यवदुपपत्तेः। न च श्रुते-रतत्वावेदकत्वप्रसङ्गो दोषः। ज्योतिष्टोमादिवाक्यवदेवोपपत्तेः। विशेष्यस्वरूपमादाय तत्वावेदकत्वसिद्धेश्च। [६]"**यतो वा**' इत्यादिवाक्यात् ब्रह्मपदार्थनिर्णयेऽपि न कश्चिद्विरोधः।

अत्र यदुक्तम् - कल्पितजगत्कारणत्वविशिष्टश्रुतेस्तात्पर्यं न संभवतीति, तन्न। उक्तरीत्या मिथ्याभूतजगत्कारणत्वपरत्वे बाधकाभावात्। किञ्च विशिष्टपरत्वेन त्वदभिमतात् [७]"**यस्सर्वज्ञ**' इत्यादिवाक्यात् 'बृहत्त्वात् बृंहणत्वाच्च' इत्यादिनिर्वचनादेव वा

---

[१] घ, ङ - गुहायाम्

[२] ङ - मन्त्रपदवाक्यस्य; ग - मन्त्रस्य

[३] ख, ग, घ, ङ - निरवधिकस्य

[४] ख, ग - सर्वात्मतायोग्यम्

[५] ख, च - ब्रह्मत्वमिति; ङ - बृहत्वमपि

[६] भगुर्वै वारुणिः। वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तस्मा एतत् प्रोवाच। अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमिति। तँ होवाच। **यतो वा** इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व तद्ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा। (तै.उ.३.१)

[७] **यस्सर्वज्ञः** सर्ववित् यस्य ज्ञानमयं तपः। तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते।। (मु.उ.१.१.१०)

ब्रह्मपदार्थनिर्णयसंभवात् न कोऽपि दोषः इति। यच्च चैतन्यातिरिक्तेऽपुरुषार्थे श्रुतितात्पर्यायोगात् स्वरूपमात्रपरत्वमिति, तन्न। पुरुषार्थसाधनत्वस्यैव श्रुतेर्वाच्यत्वात्। तस्य च ब्रह्मज्ञानोत्पादनमुखेन सत्त्वात् स्वयमपुरुषार्थस्यापि ज्ञाततया पुरुषार्थसाधनस्य वस्तुनः प्रतिपादनेन पुरुषार्थपरत्वसंभवाच्च। न च '**ब्रह्मविदाप्नोति परम्**' इति ब्रह्म-स्वरूपज्ञानस्यैव मोक्षसाधनत्वावगमात् न तदतिरिक्तज्ञानस्य मोक्षसाधनत्वमिति वाच्यम्, [१]बृहत्वविशिष्टज्ञानस्यैव तथात्वावगमात्। अन्यथा [२]'**तमेवं विद्वान्**' इति विशिष्टज्ञानस्य मोक्षहेतुत्वोक्तिविरोधात्। प्रतिकूलतर्कपराहतिश्च पदार्थसंसर्गबोधकं हि वाक्यं स्वरूपमात्र-परत्वे तद्भज्येत।

न च वाक्यस्य संसर्गबोधकत्वनियमासिद्धिः, तथा सति ज्योतिष्टोमादिवाक्याना-मपि संसर्गबोधकत्वाभावापत्तेः। समानाधिकरणवाक्यमप्यभेदबोधकमिति सार्वजनीनम्। किञ्च वाक्यार्थमात्रस्य लक्ष्यत्वपक्षेऽवच्छेदकतया पदार्थभानस्य त्वयैवोक्तत्वात्। इहापि सत्यज्ञानाद्यभेदरूपवाक्यार्थे पदार्थानामवच्छेदकतया भानं स्यात्। अभेदो न संसर्गो नापि वाक्यार्थ इत्युक्तावपि समानाधिकरणपदानामेकस्मिन् विशेष्ये प्रकारद्वयवैशिष्ट्यबोधनमेव समानाधिकरणवाक्यकृत्यमिति, स्वरूपमात्रपरत्वमसंगतमेव। किञ्चैकपदार्थैकदेशस्यैकेनैव पदेन सिद्धेः पदान्तरवैयर्थ्यमाकाङ्क्षाभावात् वाक्यत्वानुपपत्तिश्च।

न चान्वयाननुभावकत्वघटिताकाङ्क्षालक्षणेऽन्वयपदेन तात्पर्यगोचरत्वमेव विवक्षितमिति वाच्यम्। स्वरूपस्यैव वाक्यतात्पर्यविषयत्वे तद्बोधनस्यैकस्मादपि पदात् संभवेन पदान्तरानपेक्षत्वादननुभवस्य पदस्य पदान्तरव्यतिरेकप्रयुक्तत्वासिद्धेः। न च पदत्वेन स्मृतिहेतुत्वादेकं पदं स्मारकमेव नानुभावकमिति वाच्यम्। अनेकपदस्यापि स्वस्वार्थे स्मारकमात्रत्वात्, यथा गौरश्व इत्यादिषु। न चाकाङ्क्षादिसामग्रीसत्वे तदनु-भावकमिति वाच्यम्, एकपदस्यापि सामग्रीसत्वे तथात्वापत्तेः।

न च तत्राकाङ्क्षाभावात् सामग्र्येव नेति वाच्यम्, संसर्गपरत्वाभावे आकाङ्क्षाया एवानपेक्ष्यत्वात्। अत एव पदमभ्यधिकाभावादित्येतदप्युपपन्नम्। संसर्गस्यैव वाक्यार्थत्वेन

यस्सर्वज्ञः सर्ववित् यस्यैष महिमा भुवि। दिव्ये ब्रह्मपुरे ह्येष व्योम्न्यात्मा प्रतिष्ठितः।। (मु.उ.२.२.७)

[१] क, ख - ब्रह्मत्व

[२] पु.सू.१८

तस्य च प्रतियोगिद्वयसापेक्षस्यैकमात्रप्रतियोग्युपस्थापकेनैकेन पदेनानुभावयितुमशक्यत्वात्। लक्षणार्थञ्च न पदान्तरापेक्षा, तात्पर्यानुपपत्तेः लक्षणाबीजतयैकैकस्मादेव पदात् लक्षणासंभवात्। किञ्चानुभवार्थं पदान्तरापेक्षायाव्युत्पन्नपदसमभिव्याहृतादपि पदात् स्वरूपानुभवप्रसङ्गः।

न च व्युत्पन्नपदापेक्षेति वाच्यम्, पर्यायपदादव्युत्पन्नादनुभवप्रसङ्गात्। न च व्युत्पन्नभिन्नप्रवृत्तिनिमित्तकपदापेक्षेति वाच्यम्। तादृशपदान्तरार्थप्रतीतिर्हि स्वरूपप्रतीतौ न कथञ्चिदप्युपयुज्यते। किञ्च 'सत्यं ब्रह्म' इत्येतावतैवोपपत्तौ पदान्तरवैयर्थ्यम्। न च [१]ज्ञानादिभेदसंशयनिवृत्त्यर्थं ज्ञानादिपदमिति वाच्यम्, ज्ञानाद्यात्मकस्वरूपावधारणस्य जातत्वेन [२]तत्संशयासंभवात्। किञ्चानन्तपदस्य भेदमात्रनिषेधकत्वेन ज्ञानभेदस्यापि निषेधात् [३]ज्ञानाद्यात्मत्वस्य तत एव सिद्धिः, योग्यताप्यखण्डार्थत्वेऽनुपपन्ना।

न च [४]तात्पर्यविषयार्थाबाधोऽयोग्यता चन्द्रस्वरूपस्य पृथिव्यां बाधितत्वेन प्रकृष्टादि वाक्यस्यायोग्यत्वप्रसङ्गात्। क्वचिदबाधस्त्वयोग्यस्याप्यस्ति, सेचनसंसर्गस्य जले बाधा-भावात्। किञ्च वाक्यार्थस्यैकत्वे उद्देश्यविधेयभावोऽनुपपन्नः, ज्ञानाज्ञानयोरेकत्रायोगात्।

यत्तु यच्छिद्रं तत् खमितिवत् यत्सत्यज्ञानमानन्दश्च तद्ब्रह्मेति भेदभ्रमादेवोद्देश्य विधेयभावोपपादकप्रसिद्ध्यप्रसिद्ध्युपपत्तिरिति तन्न। तत्र खं खेन न [५]भिद्यत इति स्वरूप-भेदाभावनिश्चयेऽपि खं छिद्रं न भवतीति जायमानो भ्रमः छिद्रशब्दवाच्यत्वावच्छिन्न-भेदविषय एव खे वाच्यः। स च वाच्यत्वविशिष्टाभेदोपदेशादेव निवर्तते। प्रकृतेऽपि ज्ञानं न स्वस्वरूपाद्भिन्नमिति निश्चयेऽप्यानन्दभिन्नं न वेत्यादिभ्रमः। आनन्दत्वाद्यवच्छिन्नभेद-विषय इत्यानन्दत्वादिविशिष्टाभेदोपदेशादेव निवर्तते।

किञ्च सत्यादिवाक्यस्थसर्वपदानां लक्षकत्वे ब्रह्मणो भेदे कथमनन्तशब्दविरोधः [६]उद्भाव्यते। न च लाक्षणिकमप्यनन्तपदं भेदेन विरुध्यते। कथं वा ब्रह्मणः

---

[१] क, छ - ज्ञानाभेद ; ङ - ज्ञानाद्यभेद

[२] क - तत्संशयाभावात्; ग - तत्संशयायोगात्

[३] ग - ज्ञानाद्यात्मकत्वस्य

[४] ख - तात्पर्यविषयार्थाबाधायोग्यता

[५] ङ - छिद्यते

[६] ङ - समुद्भाव्यते

सत्यज्ञानाद्यात्मकत्वे इयं श्रुतिरुपन्यस्यते। न हि सत्यादिपदलक्ष्यस्य[१] सत्याद्यात्मकत्वम्, गङ्गादिपदलक्ष्यस्य गङ्गात्वाभावात्।

यदत्रोक्तम् - विशिष्टवाचिना सत्यादिपदेन वाच्यैकदेशस्यैव चैतन्यस्वरूपस्य घटो नित्य इत्यत्र [२]घटस्येव लक्ष्यत्वादिति, तन्न। विशिष्टैकदेशलक्षणायामपि ज्ञानत्वानन्दत्वादीनामिवानन्तत्वरूपविशेषणस्यापि कल्पितत्वोपपत्त्या ब्रह्मणि सत्यभेदाविरोधित्वात्। अज्ञानाद्यात्मकेऽपि कल्पितज्ञानत्वादिविशिष्टवाचिनो ज्ञानादिपदस्य विशेष्यलक्षकत्वसंभवात् न ज्ञानाद्यात्मकस्वरूपसिद्धिरपि युक्ता।

यदुक्तम् - [३]'**तत्त्वमसि**' आदिवाक्यमखण्डार्थं परस्परनिरूपितकार्यकारणभावानधिकरणद्रव्यगोचरसमानाधिकरणवाक्यत्वात्, सोऽयं देवदत्त इति वाक्यवत्, द्रव्यत्वं रूपाद्यन्यत्वं विवक्षितं मतद्वयसाधारणम्। तच्च रूपादिगोचरे नीलमुत्पलमिति समानाधिकरणवाक्ये व्यभिचारवारणाय। 'मृत् घट' इत्यत्र व्यभिचारवारणाय कार्यकारणभावानधिकरणेति। 'दण्डी पुरुष' इति प्रयोगे च न द्रव्यवाचकयोः दण्डपुरुषयोः सामानाधिकरण्यमिति न व्यभिचारः। अन्यथा 'दण्डः पुरुष' इति स्यात्। 'इनि' प्रत्ययस्तु संबन्धविशिष्टमाह, न द्रव्यम्, दण्डिज्ञानमित्यपि प्रयोगस्य मुख्यार्थत्वात्। द्रव्यमात्रसंबन्धप्रवृत्तिनिमित्तं हि द्रव्यगोचरम्। इनि प्रत्ययार्थसंबन्धस्तु रूपादिसाधारणः। सोऽयमित्यत्र तत्पदार्थस्तु नानेति न दृष्टान्ते असिद्धिः।

नन्वेवमपि द्रव्यं घट इति प्रयोगे जातिद्वयसामानाधिकरण्यनिष्ठे व्यभिचारः। तदुभयार्थस्य द्रव्यस्यैकत्वेनाकार्यकारणद्रव्यगोचरसमानाधिकरणवाक्यत्वस्य सत्त्वात्। न च यथा 'मृत् घट' इति बुद्धिर्घटस्य [४]मृत्त्वाश्रयतादात्म्यविषयतयान्यथासिद्धेति न घटस्य मृदभेदः। एवं 'द्रव्यं घट' इति धीरपीति घटो द्रव्यत्वाश्रय इति पदार्थयोः परस्परनिरूपितकार्यकारणभावराहित्याभावान्न व्यभिचार इति वाच्यम्। तत्कारणस्येव तस्यापि द्रव्यत्व-

---

[१] ङ - लक्षणस्य

[२] ख, ग, ङ - घटस्यैव

[३] स यथा तत्र नादात्म्यमितैतदात्म्यमिदं सर्वं स आत्मा **तत्त्वमसि** श्वेतकेतो इति तद्धास्य विजज्ञाविति विजज्ञाविति। (छा.उ.६.१६.३)

[४] ख, घ - मृदाश्रय

व्यवस्थापकगुणवत्त्वादेः सत्त्वेन तदाश्रयत्वादिति चेत् सत्यम्, घटो द्रव्यं तदुपादानमपि द्रव्यमेवेति न पदार्थयोः कार्यकारणभावराहित्यम्।

न च वाक्यार्थप्रतीतिविषयपदार्थयोर्न [१]कार्यकारणत्वादिकम् इति वाच्यम्, तस्य हेतुत्वेनाविवक्षितत्वात्। नित्यपरमाणोरप्रामाणिकत्वेन तद्गोचरवाक्ये न व्यभिचारः। औपाधिकभेदवत् पदार्थकसमानाधिकरणवाक्यत्वात्, महत्खं कुम्भखमिति वाक्यवदिति वा प्रयोगः। परस्परनिरूपिताधाराधेयत्वरहितपदार्थसमानाधिकरणवाक्यत्वात् सोऽयं देवदत्त इति वाक्यवदिति वा। न च दृष्टान्तस्य साध्यवैकल्यम्, सोऽयमिति पदद्वयलक्षित-देवदत्तैक्यस्य तेन प्रतिपादनादिति।

तत्र प्रथमहेतौ, अयं घट इति वाक्ये व्यभिचारः, [२]तत्ववदिदन्त्वस्य अपि [३]नानात्वात्। सिकतिलो देशश्शर्करिलो देशः सिकता अयं देश इत्यत्र व्यभिचारश्च। तत्र देशे लुबिलजाविति देशे प्रत्ययस्य नियतत्वात्। एवं तारकितादयो द्रष्टव्याः।

द्वितीयहेतुरप्ययुक्तः, कुम्भखं परिच्छिन्नमित्यत्र व्यभिचारात् कुम्भखस्य कुतश्चित् औपाधिकभेदवत्त्वात्। न च पदार्थतावच्छेदकावच्छेदेन परस्परार्थनिरूपितौपाधिकभेदवत्त्वं विवक्षितम्। अतः कुम्भखं परिच्छिन्नमित्यत्र न व्यभिचारः। नापि मठाकाशः शब्दाश्रय इत्यत्र शब्दाश्रयपदार्थतावच्छेदकस्य मठाकाशेऽपि सत्त्वादिति वाच्यम्, सूर्यसूर्यकभेदभ्रम-दशायामेव जलसूर्यः करसहस्रशालीति वाक्ये व्यभिचारात्। किञ्च यावत् धर्मोपाधिक-व्यक्तिभेदाङ्गीकारात् तव समानाधिकरणवाक्यमात्रे [४]हेतुसत्वात् व्यभिचारः। प्रवृत्तिनिमित्तधर्मभेदादौपाधिकभेदवत्[५] विशेषणवैयर्थ्यञ्चासिद्धिश्च, जीवब्रह्मभेदस्य स्वाभाविकत्वात्।

तृतीयहेतुरप्ययुक्तः, 'दण्डी देवदत्त' इत्यत्र व्यभिचारात्। ननु दण्डदेवदत्तयोराधारा-धेयभावोऽस्तीति चेत् तर्हि भ्रान्तोदीरिते तस्मिन्नेव वाक्ये व्यभिचारः। किञ्च यद्येवमेकपद-

---

[१] क, ख, च, छ - कार्यत्वादिकम्

[२] क, घ, छ - तत्ववदिवत्वस्य

[३] ख - नानार्थत्वात्

[४] घ, ङ - हेतोः सत्त्वात्

[५] ङ - भेदवत्वात्

वाच्यविशेषणस्य पदान्तरार्थाधेयत्वाभावो विवक्ष्यते, तर्हि तत्त्वस्यपदान्तरार्थविशेषणत्वात् साधनवैकल्यम्, साध्यवैकल्यञ्च।

यदत्रोक्तम् - किं सोऽयमिति पदद्वयं तत्तेदन्ते एकवृत्तीति बोधयत्युत सोऽयमित्येव प्रतीत्याकारः वाक्यतात्पर्यन्त्वेकवृत्तित्व इति। नाद्यः, तदिदंशब्दयोः तत्तेदन्ताविशिष्ट-शक्तत्वेनोक्तरूपतद्विशेष्यकबोधस्यासंभवात्, आश्रयाभेदवाचिपदाभावेनैकत्वरूपाभेदस्य वाक्यादन्येनानुपस्थितेः।

ननु वाक्यमेवाश्रयाभेदं प्रतिपाद्य तत्तेदन्तयोस्तन्निष्ठतामपि बोधयतीति चेन्न, विरम्यव्यापारप्रसङ्गात्, तत्तेदन्ताश्रयत्वस्याभिन्नयोरेव सिद्धत्वाच्च।

न च देवदत्तवृत्तित्वमेव बोधयतीति वाच्यम्, देवदत्तद्वयाश्रितत्वेऽपि तदुपपत्तेः वाक्यात् भेदभ्रमानिवृत्तिप्रसङ्गात् वृत्तिपदाभावाच्च।

द्वितीये - यदि तात्पर्यकल्पनं लाघवेन विशेषणीभूताभेद एव, तदस्तु। अपि च समानाधिकरणवाक्यतया अभेद एव तात्पर्यम्। तत्र च विशिष्टाभेदे विशेषणयोरप्यन्वयो वाच्यः। पदार्थैकदेशे अन्वयाव्युत्पत्तेः। विशेषणयोश्चाभेदाभावे तदवच्छेदकतया नीलगुणोत्पलत्वयोरिवान्वयो वाच्यः। अवच्छेदकत्वं चावच्छेद्यान्यूनकालीनत्वमेव, शौक्ल्यादेरपि यावद्द्रव्यभावित्वेन गोपिण्डावच्छेदकत्वान्न तत्राव्याप्तिः। न तु यद्वत्तया ज्ञात एव [१]<u>यदन्वयधीः</u> तत्त्वम्, उपलक्षणस्याप्यवच्छेदकत्वेन विशेषणत्वप्रसङ्गात्। न हि काकवत्तया ज्ञानं विना काकवत् देवदत्तगृहमिति धीर्भवति, न वा तत्संशयादिनिवृत्तिः। तच्चावच्छेदकत्वं न तत्तेदन्तयोरस्ति, तयोरभेदान्यूनकालीनत्वाभावात्। ततो लक्षणया अभेदमात्रं वाक्यार्थ इत्यखण्डार्थता। अभेदश्च न संसर्ग इत्युक्तम्। पदार्थानधिक-विषयत्वेऽपि वाक्यस्य वर्णितरीत्या ततः [२]<u>सत्तानिश्चयरूपा</u> धीर्भेदभ्रमनिवृत्तिश्चोपपद्यते। भेदोपाधिपरामर्श<u>पूर्वकम्</u>[३] अभेदानधिगतेः ततः संशयानिवृत्तेः।

न चैवं दण्ड्ययमासीदित्यादावपि विशिष्टाभेदो न स्यादिति वाच्यम्, इष्टापत्तेरिति तन्न, अभेदमात्रस्य बुभुत्सिततत्वेन तत्तेदन्ताश्रयाभेदे तात्पर्यात्। न च तत्तेदन्ताश्रयोः

---

[१] ङ - तदन्वयधीः

[२] ङ - सत्तानिश्चयरूपतया; ग - सत्तारूपनिश्चयरूपतया

[३] ङ - पूर्वम्

[1]उपलक्षणत्वम् इति वाच्यम्। वस्तुतो यस्तत्तेदन्ताश्रयस्तदभेदमात्रस्य प्रागेव निश्चितस्याजिज्ञासितस्य तात्पर्याविषयत्वात् पदार्थैकदेशेऽन्वयाव्युत्पत्तिः इत्यप्यनुपपन्नम्। तत्रैवान्वय व्युत्पत्तेः सर्वस्यापि वाक्यस्यैकपदप्रतिपन्नविशेष्येऽपरपदप्रतिपन्नविशेष्यसंसर्गबोधकत्वनियमात्। अन्यथा समानाधिकरणं व्यधिकरणञ्च कृत्स्नमेव वाक्यं लक्षकं स्यात्।

यदुक्तम् - विशेषणयोश्चाभेदाभावे तदवच्छेदकतयान्वयो वाच्य इति। तत्र यद्यवच्छेदकतयान्वयो विशिष्टप्रतीतौ प्रकारतया भानं तदस्त्येव, तदन्यस्य च नापादकं किञ्चित्।

यदुक्तम् - अवच्छेद्यान्यूनकालीनस्यैवावच्छेदकत्वमिति. तदपि न, दण्डी पुरुष इत्यत्र दण्डस्यानन्वयप्रसङ्गात्।

किञ्च किं प्रमाणमात्रव्यावर्तकानां त्वदुक्तावच्छेदकतयान्वयस्वभावादेवं कल्प्यते, उत व्यधिकरणवाक्यस्वाभाव्यात्, समानाधिकरणवाक्यस्वाभाव्याद्वा। नाद्यः, प्रत्यक्षादिषु न्यूनकालीनस्यैव विशेष्ये प्रतीतेः। न द्वितीयः, दण्ड्यभाव इत्यादावभावसंबन्धन्यूनकालत्वात् दण्डस्य। न तृतीयः, दण्डी भोक्ष्यत इत्यादौ दण्डादेर्वाक्यार्थभोजनसंसर्गन्यूनकालीनत्वात्।

किञ्च किमभेदावच्छेदकत्वरूपान्वयः प्रतिपाद्यत इति विवक्षितमुत वस्तुतः अस्तीति। नाद्यः, पदार्थस्य वाक्यार्थेनान्वयाव्युत्पत्तेः। किञ्चैकपदार्थस्य सर्वस्येतरपदार्थेनैकरूपान्वयस्तवापि नास्ति, विशेषणयोरभेदेनानन्वयात्। यथाकथञ्चिदन्वयमात्रं तु अस्मन्मत एव सुवचम्। विशेषणयोस्सामानाधिकरण्येन विशेष्ययोश्चाभेदेनान्वयात्, तव तु विशेषणयोः न कथञ्चिदप्यन्वयसिद्धिः। अभेदावच्छेदकत्वेनाभेदमात्रान्वयसिद्धेरभेदपदार्थतावच्छेदकयोरवच्छेद्यावच्छेदकभावप्रतीतावभेदस्य प्रकारत्वविशेष्यत्वान्यतरप्रसङ्गः च। अवच्छेद्यावच्छेदकभावसंसर्गप्रतियोगिभूताभेदस्य वाक्यबोध्यतया विरम्यव्यापारप्रसङ्गाच्च।

न द्वितीयः, नीला बलाकेति भ्रान्तोक्तौ नीलत्वस्यावच्छेदकत्वासिद्धेः। किञ्च विशेष्ययोरभेदे भासमानेऽपि विशेषणयोरभेदभानाभावेऽपि तदवच्छेदकतयान्वयो वाच्य इत्यस्य विशेष्ययोरभेदे भासमाने तदभेदान्यूनकालीनधर्मस्यैव भानं न न्यूनकालीनस्य इति फलितार्थः। अयञ्च नियमो निर्निबन्धनः।

---

[1] ख - उपलक्षितत्वम् ; ग - उपलक्षणम्

४. अखण्डार्थत्वभङ्गः

यदपीदमुक्तम् - विशिष्टं विशेष्यादन्यदेव, अन्यथा देवदत्तोऽयमिदानीं दण्डी न भवतीति प्रतीतिविरोधात्। न च सा दण्डाभावविषयैव, तदन्योऽन्याभावस्य तद्विषयत्वे तद्विशिष्टकालेऽपि तद्धीप्रसङ्गात्। अत्यन्ताभावस्य च भेदबुद्ध्यविषयत्वात् कदाचित् दण्डसंबन्धाश्रये तदत्यन्ताभावायोगाच्च। कालभेदेनैकस्मिन्नप्यविरोध इति चेत् तथाप्याश्रयभेदाभावे तदयोगात्। अन्यथा आश्रयस्वरूपस्यैवाभावसंबन्धत्वात् प्रतियोगि-कालेऽप्यभावप्रसङ्गात्। तद्भेदाभ्युपगमे [१]वागतम् विशिष्टस्यान्यत्वम्। एवं दण्डी नास्तीति प्रतीयमानो भावो यदि देवदत्तप्रतियोगिकः तर्हि कथं तद्वति तदभावः स्यात्। अत्यन्ताभावप्रतियोगिनोरेकदैकत्र विरोधात्।

न च तदा तत्प्रतियोगितावच्छेदकावच्छिन्नो नास्तीति वाच्यम्, अभावस्य प्रतियोगिना सहैव विरोधात्, विशेष्यस्य विशिष्टानन्यत्वपक्षे त्वदुक्तव्यवस्थायोगाच्च। तस्मात् विशिष्टयोर्भेदात् न तयोरैक्यप्रतिपादनं संभवति। अतो दण्ड्ययं धूमवान् वह्निमानित्यभेदप्रतिपादनं संभवति। तत्त्वमसि सोऽयमित्यत्र तु न संभवति, विशेषणयोरभेदावच्छेदकतया धूमाग्न्योरिवान्वयासंभवात्। तस्मात् तल्लक्षणया वाक्यमखण्डार्थमिति तन्न, विशिष्टस्य विशेष्यादन्यत्वासिद्धेः, [२]तथा सति दण्डसंसर्ग-दशायामपि नायं दण्डीति प्रत्ययप्रसङ्गात्। विशिष्टयोरपि भेदाङ्गीकारात्। दण्डकुण्डल-संसर्गदशायां दण्डी कुण्डली नेत्यपि प्रयोगप्रसङ्गात् मानाभावाच्च न विशिष्टभेदः। त्वदुक्तानुभवश्च कालविशेषावच्छिन्नविषयत्वात् विशेषणात्यन्ताभावस्य कादाचित्कं संबन्धं साधयेत्, न तु विशिष्टभेदम्, कालविशेषावच्छिन्नविषयत्वादेव। न हि विशिष्टस्य विशेष्यभेदः कादाचित्कः। अत्यन्ताभावस्य च भेदबुद्धिविषयत्वे न किञ्चित् बाधकम्, घटात्यन्ताभावाभावप्रतीतेर्लाघवानतिप्रसङ्गाभ्यां घटविषयत्वकल्पनवदिहापि तत एवात्यन्ताभावविषयत्वकल्पनात्। अत्यन्ताभावस्य प्रतियोगिसमानदेशत्वं कालभेदेन उपपद्यत एव, अन्यथा प्रतियोगिकालेऽप्यभावस्य विरोधात् देशान्तरेऽप्यभावो न स्यात्। देशभेदस्याविरोधहेतुत्वे यथाप्रमाणं कालभेदः कथं न विरोधपरिहारकः। भावाभावयोः विरोधाङ्गीकारो हि न राजाज्ञानिबन्धनः, अपि तु प्रमाणनिबन्धनः। तच्च प्रमाणं भावाभावयोर्विरोध इव तयोः देशकालभेदेनाविरोधेऽपि तुल्यम्। प्रमाणातिलङ्घने च देशकालभेदेऽपि तयोस्सिद्धिर्न स्यात्। प्रतियोग्याश्रये अभावासंभवे च काललक्षणोपाधि-

---

[१] क, ख, ग, छ - चागतमेव

[२] ग, ङ - तदन्य

भेदादौपाधिकभेदाङ्गीकारेऽपि कदाचित् प्रतियोग्याश्रये तस्मिन् कथमभावः स्यात्। न ह्यौपाधिकभेदाङ्गीकारमात्रेण कादाचित्कं प्रतियोग्याश्रयत्वमपि गच्छति। किञ्च स्वाभाविकभेदस्यैवान्यत्र भावाभावाधिकरणयोर्दर्शनादौपाधिकभेदाङ्गीकारेऽप्यभावो न स्यात्। लाघवेन भेदमात्रस्यैवाविरोधप्रयोजकत्वे च दण्डसंसर्गदशायामेव कुण्डलविशिष्ट-भेदस्य सत्त्वात् दण्डाभावः स्यादेव। यथा प्रमाणं कालोपाधिकभेदस्यैवाविरोध-हेतुत्वाङ्गीकारे च लाघवेन कालभेदस्यैव तत्प्रयोजकत्वकल्पनं युक्तम्।

यदुक्तम् - आश्रयस्वरूपस्य संबन्धत्वात् प्रतियोगिकालेऽभावप्रसङ्ग इति, तन्न। यथाप्रमाणं कालविशेषस्यैव तत्संबन्धत्वात्, अन्यथा तवाप्यगतेः। न ह्यौपाधिकभेदाङ्गी-कारमात्रेणाश्रयस्वरूपमभावश्च गच्छति, येन प्रतियोगिदशायां संबन्धो न स्यात्। न च देवदत्तवति दण्डी नास्तीति प्रत्ययो विशिष्टभेदसाधकः, देशकालभेदवत् प्रतियोगिनि प्रतियोगितावच्छेदकाभावस्य भावाभावविरोधहेतुत्वात्। तथा च प्रतियोगिनि प्रतियोगिता-वच्छेदकसंबन्धकाले प्रतियोग्यभावयोरैकाधिकरण्याभावनियमोऽविरोधः।

किञ्च [१]'**तत्त्वमसि**' वाक्यस्यैक्यप्रातिपादिकार्थमात्रपर्यवसाने पदार्थशोधकवाक्याभ्यां एव तदर्थस्य सिद्धत्वान्महावाक्यवैयर्थ्यम्। ननु महावाक्यं विना न जीवब्रह्मणोरभेदबोधः, तं विना च न बन्धनिवृत्तिरिति चेन्न, स्वरूपातिरिक्ताभेदासिद्धेः। [२]अभेदबोधाभावे अपि सत्यादि वाक्यजन्यब्रह्मस्वरूपाधिष्ठानतत्वसाक्षात्कारेणाविद्यानिवृत्त्या बन्धनिवृत्तेश्च महावाक्यं विना भ्रमसंशयनिवृत्तिः न जायत इति चेन्न, अभेदावधारणे सति तदयोगात्। स्वरूपस्यावधारितत्वे तदभिन्नस्याभेदस्यानवधारणासंभवात् स्वरूपस्य पदार्थशोधक-वाक्येनैवावधारणात्।

ननु [३]'**तत्त्वमस्यादि वाक्यार्थज्ञानं मोक्षस्य साधनम्**' इति सामग्रीविशेषाधीन-ज्ञानस्य मोक्षसाधनत्वावगमात् न महावाक्यार्थवैयर्थ्यमिति चेत्, हन्त, तर्हि साधु समर्थितं प्रपञ्चमिथ्यात्वम्, प्रपञ्चस्य सामग्रीविशेषजन्यज्ञाननिवर्त्यत्वे सत्यत्वाविरोधात्, ज्ञानस्य निवर्तकताया विरोधिविषयत्वनिबन्धनत्वे हि मिथ्यात्वसिद्धिरप्रयोजकत्वञ्च।

---

[१] स यथा तत्र नादाह्येतैतदात्म्यमिदं सर्वं स आत्मा **तत्त्वमसि** श्वेतक्तो (छा.उ.६.१६.३)

[२] ङ - अभेदबोधकाभावे

[३] **तत्त्वमस्यादिवाक्योक्थं ज्ञानं मोक्षस्य साधनम्।**
ज्ञाने त्वनाहते सिद्धे सर्वं ब्रह्ममयं भवेत्।। (ना.पु.१.१.३५.६८)

४. अखण्डार्थत्वभङ्गः

न च [१]“**एकधैवानुद्रष्टव्यम्**” इति श्रुतिविरोधः, किमनया श्रुत्याऽभेदेन ज्ञानं विधीयत उत स्वरूपमात्रज्ञानम्। नाद्यः, नीलोत्पलादाविव सखण्डार्थत्वाविरोधात्। न द्वितीयः, [२]“**संख्याया विधार्थे धा**” इति धाप्रत्ययस्य विधार्थे विधानात्, विधाशब्दस्य धर्मपरत्वात्। न च ब्रह्मणि द्रष्टव्यप्रकारस्यापि बहुत्वात् द्वैतिमते विरोध इति वाच्यम्। [३]“**नेह नानास्ति किञ्चन**” इति प्रकृतस्य प्रपञ्चस्य परमात्मशरीरत्वेन द्रष्टव्यत्वम्, न तु स्वतन्त्रतयेत्येवं परत्वात्। अन्यथा ब्रह्मैव द्रष्टव्यमित्येतावता सिद्धौ ‘**एकधा**’ इत्यस्य वैयर्थ्यात्। जीवत्वब्रह्मत्वविशिष्टाभेदज्ञानस्यैव भ्रमसंशयादिनिवर्तकतया तस्यैव तन्मूलाज्ञाननिवर्तकत्वाच्च। जीवब्रह्मत्वरूपेण काल्पनिकभेदेऽपि स्वाभाविकभेदस्यासंभवात् न तथा अभेदज्ञानासंभवः। युक्तञ्चैतत् स्वरूपज्ञानमात्रस्य पदार्थस्वरूपशोधकेनैव ज्ञातत्वात्।

नन्वेवं तत्त्वावेदकत्वं न स्यादिति चेत्, तर्हि क आत्मेति स्वरूपमात्रबुभुत्सायां प्रवृत्तानां बाह्यागमानामपि त्वद्रीत्यात्मस्वरूपमात्रपरत्वात् तत्त्वावेदकत्वप्रसङ्गः। ततश्च वेदान्तानां तत्त्वावेदकत्वम्, इतरेषां नेति व्यवस्था न स्यात्। वेदान्तेभ्यो जडत्वपरिच्छिन्नत्वभेदादिसंशयनिवृत्तेरन्यैः तदनिवृत्तेर्व्यवस्थेति चेत् तर्हि सखण्डार्थत्वेऽपि न तत्त्वावेदकत्वविरोधः। वस्तुतस्तु सखण्डार्थत्व एव उक्ततत्त्वावेदकत्वसंभवः स्वरूपमात्रावधारणस्य बाह्यागमैर्जातत्वेऽप्यसत्यत्वानित्यत्वभेदसंशयाद्यनिवृत्तेः।

यच्चोक्तम् - अखण्डार्थत्वाभावे वाक्यं निर्विषयं स्यादिति तन्न, समानाधिकरणवाक्यस्य विशेष्याभेदविषयत्वात्। दण्डो घटकारणं धूमवान् वह्निमान्नित्यादौ त्वदुक्ततादात्म्यादेरभावात् त्वयापि तस्य विशेष्याभेदविषयत्वकथनाच्च। स चाभेदस्संसर्गः तदन्यो वेत्यन्यदेतदिति।

अयमत्र निष्कर्षः - व्यधिकरणवाक्यानां समानाधिकरणेष्वपि ‘मृद्घटो’ ‘नीलम् उत्पलम्’ ‘दण्डी पुरुष’ इत्यादीनाञ्च यथाप्रमाणं सखण्डविषयत्वमङ्गीकृत्यापि सत्यादि वाक्ये तत्त्वमस्यादिवाक्ये चाखण्डार्थत्वमङ्गीकृत्य, तत्साधनाय प्रकृष्टप्रकाशवाक्ये ‘सोऽयं देवदत्त’ इति वाक्ये चाखण्डार्थत्वं साधयतः को भावः। किमौपनिषदस्य

---

[१] **एकधैवानुद्रष्टव्य**मेतदप्रमेयं ध्रुवम्। विरजः पर आकाशादज आत्मा महान् ध्रुवः।। (बृ.उ.६.४.२०)

[२] पा.सू.५.३.४२.

[३] मनसैवानु द्रष्टव्यं **नेह नानास्ति किञ्चन**। मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति।। (बृ.उ.६.४.१९)

प्रधानार्थस्य सत्यादिवाक्ये चाखण्डार्थतां विना दुरुपपादत्वादखण्डार्थत्वसाधकाभावेऽपि काशं कुशं वावलम्ब्यापि प्रयोजनगौरवात् प्रमाणविरुद्धमप्यखण्डार्थत्वं साधनीयमित्यभिप्रायः। अथवा वस्तुनस्तादृशत्वात् तथाङ्गीकार्यमिति। नाद्यः, साधकाभावेन स्वात्मानमलभमानमर्थमुपजीवतः प्रयोजनस्यैव परित्याज्यत्वात्। किञ्च तत्प्रयोजनं न तावदद्वैतसिद्धिः। अनेन वाक्येन विशिष्टार्थोपस्थापनेऽपि मिथ्यात्वश्रुत्यनुरोधेन[१] अद्वैतसिद्धेरवैकल्यात्।

ननु वाक्यजन्याधिष्ठानतत्त्वसाक्षात्कारस्याविद्यानिवर्तकत्वात् तस्य चातत्वविषये निवर्तकत्वासंभवात् स्वरूपमात्रगोचरत्वस्य वाच्यतया तज्जनकवाक्यस्यापि तथात्वं युक्तमिति चेन्न। अधिष्ठानतत्त्वसाक्षात्कारस्यैवाविद्यानिवर्तकतया तन्मात्रगोचरत्वस्य गौरवेणाप्रयोजकत्वात् देवदत्तीयत्वभ्रमरूपेण शुक्तिज्ञानेन रजतभ्रमनिवृत्तिदर्शनात् चरमसाक्षात्कारस्य तदवच्छेदकवृत्तिविषयत्वावश्यंभावेनातत्त्वविषयत्वस्यावर्जनीयत्वाच्च। एतेनाज्ञानकार्यगोचरावभासेन कथमज्ञाननिवृत्तिः। तथा सति रजतज्ञानात् शुक्त्यज्ञाननिवृत्तिप्रसङ्गादिति निरस्तम्। वृत्तेरज्ञानकार्यत्वात् तदवभासेनाज्ञाननिरासाच्च। किञ्च तदज्ञानकार्यगोचरज्ञानस्य हि तदज्ञाननिवर्तकत्वासंभवः[२]।

न च सत्यत्वादिगोचरज्ञानं निवर्त्याज्ञानकार्यगोचरम्, सत्यत्वादेर्मूलाज्ञानकार्यत्वात्। एवं तत्पदार्थप्रकारकारणत्वं त्वंपदार्थभूताहमर्थश्च न देवदत्तीयाज्ञानकार्यम्। अभेदगोचरत्वेन हि भेदभ्रमहेत्वज्ञाननिवर्तकतोक्ता। एवञ्च तदधिकविषयत्वेऽपि न काचित् क्षतिः।

वस्तुतस्तु यादृशरूपेणोपस्थिते भेदग्रहस्तद्रूपविशिष्टरूपेणोपस्थिताभेदग्रह एव [३]भेदभ्रमनिवृत्तिसंभवः। न द्वितीयः, दृष्टान्तेऽखण्डार्थत्वासिद्धेः। तन्मात्रप्रश्नोत्तरत्वं न तत्साधकमिति चेत्, तादृशोत्तरत्वेऽप्यधिकविषयत्वे बाधकाभावात्। उत्तरवाक्यस्य जिज्ञासितावधारणजनकत्वमेव हि अज्ञानसंशयजिज्ञासानिवर्तकत्वे प्रयोजकम्, न तु अजिज्ञासितार्थागोचरत्वमपि, गौरवात्। अन्यथा हि चन्द्र इत्येवोत्तरं स्यात्, प्रकृष्टप्रकाशपदं न प्रयुज्येत।

---

[१] ङ - श्रुत्यनुरोधात्

[२] ग, घ - निवर्तकत्वम्

[३] ग, घ - भेदग्रह

४. अखण्डार्थत्वभङ्गः

यदि चन्द्रपदमात्रान्न स्वरूपावधारणोत्पत्तिः, किन्तु प्रकृष्टप्रकाशसमभियाहारादेवेत्युच्येत, तर्ह्यव्युत्पन्नप्रकृष्टादिपदस्यापि प्रकृष्टप्रकाशादिवाक्यात् स्वरूपावधारणप्रसङ्गः। यदि व्युत्पत्तिरपि कारणमवधारणे तर्हि प्रकृष्टस्य प्रकाश इत्यर्थभ्रमेऽप्यवधारणप्रसङ्गः। यद्यवधारणे बहुव्रीह्यर्थप्रतीतिरपेक्षितेत्युच्येत तदा प्रत्यक्षप्रकृष्टप्रकाशचन्द्रपदयोः भिन्नविषयत्वभ्रमेऽप्यवधारणप्रसङ्गः। यदि पदद्वयस्याप्येकार्थगोचरत्वज्ञानमपेक्षितमित्युच्येत, तर्हि प्रकृष्टप्रकाशपदसमभिव्याहारव्युत्पत्ति बहुव्रीहिपदद्वयैकार्थनिष्ठत्वज्ञानानामपेक्षितत्वेप्रकृष्टप्रकाशत्वचन्द्रत्वोभयप्रकारकैकविशेष्यकज्ञानमेवावधारणमिति पर्यवसानात् नाखण्डार्थतासिद्धिः। प्रकृष्टप्रकाशचन्द्रपदाभ्यां तत्तत् [१]विशिष्टार्थोपस्थितौ सत्यामनन्तरं तद्पदाभ्यां लक्षणया स्वरूपोपस्थितौ सत्यामेवावधारणमिति मनोरथमात्रत्वात्। तन्मात्रप्रश्नोत्तरत्वञ्च पक्षसपक्षयोरसिद्धमित्युक्तमेव।

अत एवेमानि ज्योतिषां स्वरूपाणि सम्यगवधृतानि, एषु चन्द्रः क इति चन्द्रपदवाच्यत्वाभिप्रायेण पृच्छति। प्रकृष्टप्रकाशश्चन्द्र इत्युक्ते पुनस्सोमः क इति पृच्छति। न च शब्दभेदादर्थभेदः कस्यापि रोचेत। तद्भेदेऽप्युभयमनवधृतमवधृतं वा स्यात्। न त्ववधारणानवधारणव्यवस्थौपाधिकभेदमात्रेण तदनुपपादनात्।

किञ्चेदमत्र विवेचनीयम् - कश्चन्द्र इति प्रष्टुश्चन्द्रपदप्रयोगनिमित्तभूतं चन्द्रपदतदर्थयोः संबन्धज्ञानं कीदृशमिति। तदुत्तरवाक्यगतचन्द्रपदाज्जायमानं चन्द्रपदार्थज्ञानं कीदृशमिति च। तत्र न तावद्वृद्धव्यवहाराधीनचन्द्रचन्द्रपदप्रवृत्तिनिमित्तोभयप्रत्यक्षमूलसंकेतग्रहनिमित्तं स्मरणं तथा व्युत्पत्तिग्रहे प्रश्नासिद्धेः। ततश्च [२]कुतश्चित् हेतोः चन्द्रपदमर्थाभिधानक्षममिति संकेतग्रहमूलं स्मरणम्। तथा च चन्द्रपदमर्थाभिधानक्षममिति पूर्वानुभवमूलतादृशस्मृतिरेव प्रश्ने चन्द्रपदप्रयोगनिमित्तं, न तु गामानयेत्यादाविवार्थव्यवहारहेतुव्युत्पत्तिग्रहः। अतः कथमिव स्वरूपविवक्षया प्रश्ने चन्द्रपदप्रयोगः, कथञ्च तेन स्वरूपप्रश्नः, कथञ्चोत्तरवाक्यगतचन्द्रशब्देन चन्द्रपदव्युत्पत्तिविधुरस्य[३] चन्द्रत्वप्रकारको वा स्वरूपमात्रगोचरो वा प्रत्ययः। तस्मात् चन्द्रपदवाच्यत्वगोचरत्वमेव

---

[१] ङ - विशिष्टार्थोपपत्तौ

[२] क, ग, घ, ङ, छ - कस्यचित्; ख - प्रश्नस्य कुतश्चित्

[३] ख - रहितस्य

प्रश्नोत्तरयोरुपपन्नम्। [१]तच्छब्दवाच्यत्वविवक्षया च तत्पदप्रयोगश्चाभिधानकोशादिषु बहुलमुपलब्धः।

यत्तु 'तत्त्वमस्यादि' वाक्ये किञ्चिदुच्यते [२]औपाधिकभेदनिरासेन स्वरूपाभेदबोधन एवावधारणसिद्धिरिति, तन्न, औपाधिकभेदाभावप्रतीतेः निरासपदेन विवक्षायां नात्र तत्संभवः। तद्बोधकपदाभावात् स्वरूपाभेदप्रतीतावनपेक्षितं चौपाधिकभेदाभावज्ञानम्। घटकलशौपाधिकभेदज्ञाने सत्येवाकाशस्वरूपाभेदप्रत्ययदर्शनात्।

किञ्च यदुपाधिवशात् भेदप्रत्ययः तदुपाधिविशिष्टानुवादेनाभेदोपदेश एव हि भेदस्यौपाधिकत्वमभेदस्य स्वाभाविकत्वञ्च ज्ञायते। औपाधिकभेदप्रतीत्यभावो निरास-शब्दार्थः। अत उपाधिप्रतीतावौपाधिकभेदप्रतीतिप्रसङ्गात्, उपाध्यगोचरत्वमभेदप्रतीतेः वाच्यमित्यपि न, औपाधिकभेदप्रतीतेः स्वरूपाभेदप्रतीत्यविरोधस्योपाधिप्रतीतेः तदुपयोगस्य चोपपादितत्वात्।

किञ्च पदानां पदार्थैकदेशान्वयबोधकत्वमेव व्युत्पत्तिसिद्धम्। घटं पश्येत्यादौ घटत्वस्यापि क्रियान्वयविवक्षायामपि न दर्शनत्वस्य पदान्तरार्थेनान्वयः। अतस्तत्राप्येक-देशान्वयोऽस्त्येव। एवञ्च पदद्वयेनापि स्वरूपलक्षणया यद्यभेदो बोध्यते तदैक-देशान्वयासिद्धेर्व्युत्पत्तिभङ्गः। किञ्च मिलितेन स्वरूपलक्षणायामपि लक्ष्यार्थस्य मुख्यार्थ-संबन्धितया प्रतीतिरस्ति वा न वा। न चेत् स्वरूपविशेषप्रतीतिनियमस्य [३]आकस्मिकता। अस्ति चेत् तस्याश्शाब्दत्वपरित्यागो निर्निबन्धनः। तस्मात् निरन्तरसञ्चितदुरितसञ्चय एवाखण्डलक्षणाङ्गीकारे निमित्तमित्युपचितपुण्या मन्यन्ते।

कथं तर्हि 'तत्त्वमसि' इति सामानाधिकरण्यम्। अहो नु खलु विस्मयनीयमिदं चोद्यं यदखण्डार्थत्वाभावस्यैव सामानाधिकरण्योपयोगित्वेऽपि तस्यैव तदुपयोगित्वाभि-प्रायेण तर्हीत्याक्षेपः। **भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः हि सामानाधिकरण्यम्** अखण्डलक्षणायां कथं तत्संभवः। मुख्यार्थबोधनदशायां भिन्नप्रवृत्ति-निमित्तकत्वं लक्षणादशायामेकार्थकत्वञ्च वर्तत इति चेन्न, एकार्थस्य बुद्धौ प्रवृत्तिनिमित्त-

---

[१] ख - तच्छब्दवाच्यविवक्षया

[२] अस्मिन् कोशे '**औपाधिकभेदभेदनिरासेन**' इत्यस्य '**औपाधिकभेदप्रतीतावनपेक्षितार्थनिरासेन**' इत्यर्थः दृश्यते।

[३] ङ - आस्तिकता

द्वयविषयत्वस्यैव सामानाधिकरण्यप्रयोजकत्वात्। अन्यथा विषं भुङ्क्ष्वेति वाक्यस्यार्थ वादानाञ्च समानाधिकरणत्वप्रसङ्गात्।

नन्वेवमपि सिद्धान्ते कथं सामानाधिकरण्यं जीवब्रह्माभेदानङ्गीकारादिति चेदुच्यते [१]'**अनुप्रविश्य व्याकरवाणि**' इति अनुप्रवेशस्य व्याकरणहेतुत्वं श्रुतम्[२]। तच्च नामरूपयोः स्वपर्यन्तत्व एव सिध्यति। तत्र नाम्नः स्वपर्यन्तत्वं [३]स्वाभिधायकत्वम्। तथा [४]'**तदेवाग्निः तद्वायुः तत्सूर्यस्तदु चन्द्रमा**' इत्यादि च श्रूयते। [५]'**ब्रह्म वै वाचः परमं व्योम**' इति च। [६]'**नताः स्म सर्ववचसां प्रतिष्ठा यत्र शाश्वती**' '**वचसां वाच्यमुत्तमम्**'

सर्वशब्दाभिधेयत्वं सर्वान्तर्यामिकत्वतः।
न तु सर्वस्वरूपत्वात् सर्वभिन्नो यतो हरिः।।

इत्यादि च स्मर्यते। अत एवोत्तरतापनीये [७]'**न हीदं सर्वं निरात्मकम्**' इति [८]सात्मकत्वं उक्त्वा [९]'**आत्मैवेदँ सर्वम्**' इति सामानाधिकरण्येन निर्देशः कृतः। शरीरवाचिशब्दानां शरीरिपर्यन्तत्वञ्च दृश्यते। तथापृथक्सिद्धधर्मवाचिनां धर्मिपर्यन्तत्वमपि प्रपञ्चस्य ब्रह्मशरीरत्वं तदपृथक्सिद्धत्वञ्च श्रुत्यनुग्राहकम्। अतस्तत्पदं जगत्कारणत्वयोगि ब्रह्मपरम् त्वंपदञ्च जीवयोगिब्रह्मपरम्। अतः सामानाधिकरण्यसामञ्जस्यमिति ।

इत्यद्वैतविद्याविजये अखण्डार्थत्वभङ्गः

---

[१] सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मना **अनुप्रविश्य नामरूपे व्याकरवाणीति**। (छा.उ.६.३.२)

[२] ग, घ - हेतुत्वान्नियतम्

[३] ग, घ - स्वाभिधेयकत्वम्

[४] **तदेवाग्निस्तदादित्यस्तद्वायुः तदु चन्द्रमाः**।
तदेव शुक्रममृतं तद्ब्रह्म तदापस्स प्रजापतिः।। (म.ना.उ.१.७)

[५] **ब्रह्म वै वाचः परमं व्योम**। ब्रह्मवर्चसमेवावरुन्धे। (तै.ब्रा.३.९.५.५)

[६] **नताः स्म सर्ववचसां प्रतिष्ठा यत्र शाश्वति**।
तमाद्यन्तमशेषस्य जगतः परमं प्रभुम्।। (विष्णु.पु.१.१४.२६)

[७] न हीदं सर्वं निरात्मकम् आत्मैवेदँ सर्वम्'(नृ.उ.ता.उ.७)

[८] ग, घ - सर्वात्मकत्वम्

[९] नृ.उ.ता.उ.७

५. श्रीमतो नारायणस्यैव परत्वम्

एवमद्वितीये '**स्वाभाविकानवधिकातिशयासंख्येयकल्याणगुणगणौघमहार्णवे निखिलजगदुदयविभवलयलीले भगवति पुरुषोत्तम**' एवाद्वितीयश्रुतीनां तात्पर्यमिति सिद्धम्।

अयमत्र निष्कर्षः - मायिमते भेदश्रुतीनां [१]"**यस्यात्मा शरीरम्**' इत्यादिजीवशरीरत्वजगदुपादानत्वप्रतिपादकश्रुतीनां तादृशस्मृतीतिहासपुराणागमसूत्राणां प्रत्यक्षादीनां च अप्रामाण्यम्। अद्वैतवाक्येऽपि पदार्थसंसर्गरूपवाक्यार्थानङ्गीकारादप्रामाण्यम्। बहुषु पदेषु [२]लक्षणा निर्गुणश्रुतीनां श्रुतिस्मृतिभिरेव हेयगुणसत्वादिविषयत्वेऽवगतेऽपि कल्याणगुणानामपि निषेधकल्पनया [३]अखिलहेयप्रत्यनीके परस्मिन् ब्रह्मणि [४]दुर्निर्वहाज्ञानाश्रयत्वतत्तिरोधानजन्ममरणविविधविचित्रयातनादिसकलहेयास्पदत्वकल्पनया च निरन्तरसञ्चितानन्तदुरितसञ्चितानन्तस्वकीयपरब्रह्मप्रद्वेषाविष्करणमित्याद्यनन्तदोषाः प्रादुष्युः।

माध्वमते - श्रुतिस्मृतिप्रतिपन्नजगदुपादानत्वभङ्गः। गुण्यतिरेकेण गुणान्निराकृत्यापि निर्गुणवादनिराकरणमित्यादयो दोषाः प्रादुष्युः।

भेदाभेदमते तयोर्विरोधादेव गर्भस्रावः पूर्वोक्तदोषाश्च।

विशिष्टाद्वैतवादे तु - भेदाभेदघटकश्रुतिस्मृतीतिहासपुराणप्रत्यक्षादिसर्वप्रमाणसामरस्यम्[५] इति। देवतापारमार्थ्यविषये वेदान्ताचार्यैरनुगृहीतम् -

[६]"**आत्मैक्यं देवतैक्यं त्रिकसमधिकता तुल्यतैक्यं त्रयाणाम्**
अन्यत्रैश्वर्यमित्याद्यनिपुणभणितीरादियन्ते न सन्तः।
त्रय्यन्तैरेककण्ठैस्तदनुगुणमनुव्यासमुख्योक्तिभिश्च
श्रीमान्नारायणो नः पतिरखिलतनुर्मुक्तिदो मुक्तभोग्यः' इति।

---

[१] बृ.उ.मा.पा.५.७.२२-२७

[२] क, घ - लक्षणादि; ग, ङ - लक्षणानि

[३] ङ - निखिल

[४] ख, ग - दुर्निर्वाहाज्ञानाश्रयत्व; ङ - दुर्निर्वहणाज्ञानाश्रयत्व

[५] ङ, च - स्वारस्यम्

[६] अधिकरणसारावली - ३.३.४३/३७४

५. श्रीमतो नारायणस्यैव परत्वम्

अत्र '**अनिपुणभणितीः**' इत्यनुगृह्णतामयं भावः। आत्मैक्यं तावदनुपपन्नम्। [१]'**यस्यात्मा शरीरम्**', [२]'**नित्यो नित्यानां चेतनश्चेतनानाम्**', [३]'**स उत्तमः पुरुषः**', [४]'**उत्तमः पुरुषस्त्वन्यः**', [५]'**दासभूताः स्वतस्सर्वे ह्यात्मनः परमात्मनः**' इत्यादि प्रमाणव्याकोपात् बद्धमुक्तव्यवस्थानुपपत्तेः च ब्रह्मणो [६]नित्यमुक्तत्वश्रुतिविरोधात् पूर्वोक्तदोषप्रसङ्गाच्च। [७]देवतैक्यं चानुपपन्नम् - [८]'**तं देवतानां परमञ्च दैवतम्**', [९]'**स आत्मा अङ्गान्यन्या देवताः**', '**नारायणस्य चाङ्गानि सर्वदैवानि चाभवन्**',

[१०]'**यो यो यां यां तनुं भक्तः श्रद्धयाऽर्चितुमिच्छति ।**
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ।।
स तया श्रद्धया युक्तस्तस्याराधनमीहते ।
लभते च ततः कामान् मयैव विहितान् हि तान्।।'
[११]'**न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते।**'

इत्यादिबहुप्रमाणविरोधात्। परब्रह्मणस्त्रिमूर्त्यतिरेकः त्रयाणां तुल्यता। [१]तेषाम् ऐक्यं चतुर्मुखे शिवे वा पारम्यमिति पक्षाश्चानुपपन्नाः।

---

[१] बृ.उ.मा.पा.५.७.२२-२७

[२] **नित्यो नित्यानां चेतनश्चेतनानाम्** एको बहूनां यो विदधाति कामान्।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम्।।(कठ.उ.२.२.१३)

[३] **स उत्तमः पुरुषः**। स तत्र पर्येति जक्षत् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा नोपजनँ स्मरन्निदं शरीरम्। स यथा प्रयोग्य आचरणे युक्तः, एवमेवायमस्मिन् शरीरे प्राणो युक्तः। (छा.उ.८.१२.३)

[४] **उत्तमः पुरुषस्त्वन्यः** परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः।। (महा.भीष्म.३९.१७; भ.गी.१५.१७)

[५] मन्त्रराजपदस्तोत्रे.११, अहिर्बुन्ध्यसंहिता

[६] ग, ङ - नित्यमुक्ति

[७] ङ - दैवतैक्यम्

[८] तमीश्वराणां परमं महेश्वरं **तं देवतानां परमं च दैवतम्**।
पतिं पतीनां परमं परस्तात् विदाम देवं भुवनेशमीड्यम्।। (श्वे.उ.६.७)

[९] तै.उ.१.५.१

[१०] महा.भीष्म.३१.२१-२२; भ.गी.७.२१-२२

[११] अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च।
न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते।। (महा.भीष्म.३३.२४; भ.गी.९.२४)

[2]'**नारायणः परं ब्रह्म तत्त्वं नारायणः परः।**
नारायणः परो ज्योतिरात्मा नारायणः परः'

[3]'**पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः**', [4]'**यस्मात् परं नापरमस्ति किञ्चित्**', [5]'**अतः परं नान्यदणीयसं हि**', [6]'**न तस्येशे कश्चन**', [7]'**पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम्**', [8]'**न तत्समश्चाभ्यधिकश्च दृश्यते**', [9]'**न तत्समोऽस्त्यभ्यधिकः कुतोऽन्यः**', [10]'**मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय**', [11]'**न वासुदेवात् परमस्ति दैवतम्**' [12]'**न दैवं केशवात् परम्**', '**विष्णुरेव परं ब्रह्म**

---

[1] ङ - तेषाञ्च

[2] म.ना.उ.११.४

[3] महतः परमव्यक्तमव्यक्तात् पुरुषः परः।
पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः।। (कठ.उ.१.३.११)

[4] **यस्मात् परं नापरमस्ति किञ्चित्** यस्मान्नाणीयो न ज्यायोस्ति कश्चित्।
वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्।। (श्वे.उ.३.९; म.ना.उ.१०.४)

[5] **अतः परं नान्यदणीयसं हि** परात्परं यन्महतो महान्तम्।
यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात्।। (म.ना.उ.१.५)

[6] नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत्।
न तस्येशे कश्चन तस्य नाम महद्यशः।। (म.ना.उ.१.१०)

[7] **पतिं विश्वस्यात्मेश्वरं शाश्वतँ शिवमच्युतम्।**
नारायणं महाज्ञेयं विश्वात्मानं परायणम्।। (म.ना.उ.११.३)

[8] न तस्य कार्यं करणञ्च विद्यते **न तत्समश्चाभ्यधिकश्च दृश्यते**।
परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च।। (श्वे.उ.६.८)

[9] पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान्।
न तत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिम प्रभाव।।
(महा.भीष्म.३५.४३; भ.गी.११.४३)

[10] **मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय।**
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव।। (महा.भीष्म.३१.७) (भ.गी.७.७)

[11] न वासुदेवात् परमस्ति मङ्गलं न वासुदेवात् परमस्ति पावनम्।
न वासुदेवात् परमस्ति दैवतम् न वासुदेवं प्रणिपत्य सीदति।। (वि.स्मृ.१११)

[12] अवश्यं विष्णुरूपत्वं प्राप्येते मोक्षसंपदम्।
न कार्तिकसमो मासो **न दैवं केशवात् परम्**।। (पा.पु.उ.११८.२३)
सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते।

त्रिभेदमिह पठ्यते', [१]'नारायणः परं ब्रह्म', 'पन्नगासनवाहनः', [२]'वासुदेवः परं ब्रह्म परमात्मा परात्परः', [३]'नारायणाभिधानस्य ब्रह्मणः परमात्मनः',

[४]'वदन्ति तत्तत्वविदस्तत्वं यज्ज्ञानमद्वयम्।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते।।'

[५]'**वासुदेवे परे तत्त्वे**', [६]'**स ब्रह्मा स शिवः**', '**स ब्रह्मा स ईशानः**' [७]'**ब्रह्मा च नारायणः शिवश्च नारायणः**', '**विरूपाक्षाय ब्रह्मणः पुत्राय**' [८]'**यतो जज्ञ उग्रस्त्वेष नृम्णः**', '**ब्रह्म वै ब्रह्माणं [९]पुष्करेऽसृजत**', '**यन्नाभिपद्मादभवन्महात्मा प्रजापतिः विश्वसृक् विश्वरूपः**' [१०]'**नारायणाद्ब्रह्मा जायते नारायणाद्रुद्रो जायते, सर्वाणि**

वेदाच्छास्त्रं परं नास्ति **न दैवं केशवात्परम्**।। (वि.स.स्तो)

[१] म.ना.उ.११.४

[२] **वासुदेवः परं ब्रह्म परमात्मा परात्परः।**
परंधाम परञ्ज्योतिः परं तत्वं परं पदम्।। (पाद्म.पु.६.७१.१२१)

[३] **नारायणाभिधानस्य ब्रह्मणः परमात्मनः।**
निष्ठामर्हथ नो वक्तुं यूयं हि ब्रह्मवित्तमाः।। (भा.पु.११.३.३४)

[४] भा.पु.१.२.११

[५] अहो अत्यद्भुतं ह्येतत् दुर्लभैकान्तिनामपि।
वासुदेवे परे तत्त्वे प्राप्तिश्चैद्यस्य विद्विषः।। (भा.पु.७.१..१५)

[६] तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः।
स ब्रह्मा स शिवः सेन्द्रः सोक्षरः परमः स्वराट्।। (म.ना.उ.११.१३; नृ.पू.ता.उ.१.४)

[७] अथ नित्यो नारायणः **ब्रह्मा नारायणः शिवश्च नरायणः** शक्रश्च नारायणः कालश्च नारायणो दिशश्च नारायण ऊर्ध्वंश्च नारायणोऽधश्च नारायणोऽन्तर्बहिश्च नारायणो नारायण एवेदँ सर्वं यद्भूतं यच्च भव्यम्। निष्कलङ्को निरञ्जनो निर्विकल्पो निराख्यातश्शुद्धो देव एको नारायणो न द्वितीयोऽस्ति कश्चित्। (ना.अ.शि.उ.२)

[८] तदिदास भुवनेषु ज्येष्ठं **यतो जज्ञ उग्रस्त्वेष नृम्णः।**
सद्यो जज्ञानो नि रिणाति शत्रू ननु यं विश्वे मदन्त्यूमाः।। (ऋग्वेद-१०.१२०.१)

[९] ङ - पुष्करपर्णे सृजति

[१०] **नारायणाद्ब्रह्मा जायते, नारायणाद्रुद्रो जायते, नारायणादिन्द्रो जायते, नारायणात् प्रजापतयः प्रजायन्ते, नारायणाद्द्वादशादित्या रुद्रा वसवः सर्वाणि छन्दांसि (भूतानि) नारायणादेव समुत्पद्यन्ते। नारायणात् प्रवर्तन्ते, नारायणे प्रलीयन्ते**। एतदृग्वेदशिरोऽधीते। (ना.अ.शि.उ.१)

भूतानि नारायणादेव समुत्पद्यन्ते। नारायणात् प्रवर्तन्ते, नारायणे प्रलीयन्ते', [१]'**तस्मात् तमस्सञ्जायते। तमसो भूतादिर्भूतादेराकाशः आकाशाद्वायुः वायोरग्निः अग्नेरापोऽद्भ्यः पृथिवी तदण्डं समभवत्**', [२]'**पृथिव्यप्सु प्रलीयत आपस्तेजसि लीयन्ते तेजो वायौ विलीयते वायुराकाशे विलीयत आकाशमिन्द्रियेष्विन्द्रियाणि तन्मात्रेषु तन्मात्राणि भूतादौ विलीयन्ते भूतादिर्महति विलीयते, महानव्यक्ते विलीयते, अव्यक्तमक्षरे विलीयते, अक्षरं तमसि विलीयते तमः परे देव एकी भवति**' [३]'**नैवेह किञ्चनाग्र आसीदमूलमनाधारा इमाः प्रजाः प्रजायन्ते दिव्यो देव एको नारायणः**' [४]'**एको ह वै नारायण आसीत् न ब्रह्मा नेशानः**' [५]'**ब्रह्मविष्णुरुद्रेन्द्रास्ते सर्वे संप्रसूयन्ते**', [६]'**ललाटात् क्रोधजो रुद्रः**', [७]'**अजायमानो बहुधा विजायते**', [८]'**स उ**

---

[१] न सन्नसन्न सदसदिति **तस्मात् तमस्सञ्जायते। तमसो भूतादिः भूतादेराकाशः आकाशाद्वायुः वायोरग्निः.रग्नेरापोऽद्भ्यः पृथिवी तदण्डं समभवत्**। तत्संवत्सरमात्रमुषित्वा द्विधाकरोदधस्तात् भूमिमुपरिष्टादाकाशं मध्ये पुरुषो दिव्यः सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। (सु.उ.१)

[२] सु.उ.२

[३] सु.उ.६

[४] अथातो महोपनिषदं व्याख्यास्यामस्तदाहुः **एको ह वै नारायण आसीन्न ब्रह्मा नेशानो** नापो नाग्नीषोमौ नेमे द्यावापृथिवी न नक्षत्राणि न सूर्यो न चन्द्रमाः। स एकाकी न रमते। तस्य ध्यानान्तःस्थस्य यज्ञस्तोममुच्यते। तस्मिन् पुरुषाश्चतुर्दश जायन्ते। (महो.उ.१)

[५] प्रणवः सर्वान्प्राणान्प्रणामयति नामयति चैतस्मात् प्रणवः चतुर्धाऽवस्थित इति वेददेवयोनिर्धेयाश्चेति संधर्ता सर्वेभ्यो दुःखभयेभ्यः संतारयति तारणात्तानि सर्वाणीति विष्णुः सर्वाञ्जयति ब्रह्माऽबृहत्सर्वकारणानि संप्रतिष्ठाप्य ध्यानाद्विष्णुर्मनसि नादान्ते परमात्मनि स्थाप्य ध्येयं ईशानं प्रध्यायन्तीशा वा सर्वमिदं प्रयुक्तम्। **ब्रह्मविष्णुरुद्रेन्द्राः संप्रसूयन्ते** सर्वाणि चेन्द्रियाणि सहभूतानि करणं सर्वमैश्वर्यसंपन्नं शिवमाकाशं मध्ये ध्रुवस्थम्। ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरः शिव एव च। पञ्चधा पञ्चदेवत्यः प्रणवः परिपठ्यते। (अ.शिखा.२)

[६] अपानान्निषादा यक्षराक्षसगन्धर्वाश्चास्थिभ्यः पर्वता लोमभ्य ओषधिवनस्पतयो **ललाटात् क्रोधजो रुद्रः जायते**, तस्यैतस्य भूतस्य निःश्वितमेवैतद्यदृग्वदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषामयनं न्यायो मीमांसा धर्मशास्त्राणि व्याख्यानान्युपव्याख्यानानि च सर्वाणि च भूतानि हिरण्यज्योतिर्यस्मिन्नयमात्माधिक्षियन्ति भुवनानि विश्वा।। (सु.उ.१)

[७] प्रजापतिश्चरति गर्भेऽन्तः। **अजायमानो बहुधा विजायते**।
तस्य धीराः परिजानन्ति योनिम्। मरीचीनां पदमिच्छन्ति वेधसः। (पु.सू.२.३)

[८] **स उ श्रेयान् भवति जायमानः**। तं धीरासः कवय उन्नयन्ति। स्वाधियो मनसा देवयन्तः। (तै.ब्रा.३.६.१.३)

श्रेयान् भवति जायमानः', [१]**'इच्छागृहीतोऽभिमतोरुदेहः'**, [२]**'नैव गर्भत्वमापेदे न योन्यामवसत्प्रभुः'**, [३]**'समस्तहेयरहितं विष्णवाख्यं परमं पदम्'** [४]**'अशुद्धास्ते समस्तास्तु देवाद्याः कर्मयोनयः'**,

[५]**'प्रजापतिञ्च रुद्रञ्च अहमेव सृजामि वै।**
तौ च मां न विजानीते मम मायाविमोहितौ।।'
[६]**'ब्रह्माद्यास्सकला देवा मनुष्याः पशवस्तथा।**
विष्णुमायामहावर्तमोहान्धतमसावृताः।।'

इत्यादिबहुप्रमाणविरोधात्। त्रय्यन्तैरेककण्ठैरित्यनेन [७]**'तं त्वौपनिषदं पुरुषं पृच्छामि'**, **'तं त्वौपनिषदं पुरुषं विद्धि'**, [८]**'यश्छन्दसामृषभो विश्वरूपः'** [९]**'सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति'**, [१]**'विष्णुनामा स वेदेषु वेदान्तेषु च गीयते।'**

---

[१] समस्तकल्याणगुणं गुणात्मको हित्वातिदुःखावृतभूतसर्गः।
इच्छागृहीतोऽभिमतोरुदेहः संसाधिताशेषजगद्धितोऽसौ।। (ना.पु.१.२.४६.२८),

[२] **नैष गर्भत्वमापेदे न योन्यामवसत्प्रभुः।**
आत्मनः तेजसा कृष्णः सर्वेषां कुरुते गतिम्।। (महा.सभा.३८/पृ.सं-९४४)

[३] एवं प्रकारकममलं नित्यं व्यापकमक्षयम्।
समस्तहेयहरितं विष्णवाख्यं परमं पदम्।। (वि.पु.१.२२.५३)

[४] अन्ये तु पुरुषव्याघ्र चेतसो ये व्यपाश्रयाः।
अशुद्धास्ते समस्तास्तु देवाद्याः कर्मयोनयः।। (वि.पु.६.७.७७)

[५] प्रजापतिञ्च रुद्रञ्च सृजामि च वहामि च।
तेऽपि मायां न जानन्ति मम मायाविमोहिताः।। (व.पु.१२५.४९)

[६] वि.पु.५.३०.१७

[७] **तं त्वौपनिषदं पुरुषं पृच्छामि** तं चेन्मे न विवक्ष्यसि मूर्धा ते विपतिष्यतीति। तँ ह न मेने शाकल्यः। तस्य ह मूर्धा विपपात। अपि हास्य परिमोषिणोऽस्थीन्यपजहुरन्यन्मन्यमानाः। (बृ.उ.५.९.२६)

[८] **यश्छन्दसामृषभो विश्वरूपः** छन्दोभ्यश्छन्दांस्याविवेश। सतां शक्यः प्रोवापनिषदिन्द्रो ज्येष्ठ इन्द्राय ऋषिभ्यो नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवः सुवश्छन्द ॐ। (म.ना.उ.७.५)
यश्छन्दसामृषभो विश्वरूपः छन्दोभ्योध्यमृतास्संबभूव। स मेन्द्रो मेधया स्पृणोतु। (तै.उ.१.४.१)

[९] **सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति।**
यदिच्छन्दो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत्।। (कठ.उ.२.१५)

[2]**'ये च वेदविदो विप्रा ये चाध्यात्मविदो जनाः।
ते वदन्ति महात्मानं कृष्णं धर्मं सनातनम्।।'**

[3]'**नारायणपरा वेदाः**', [4]'**वासुदेवपरा वेदाः**', [5]'**वेदैश्च सर्वैरहमेव वेद्यः**' इत्याद्यर्थः संगृहीतः। [6]'**नः पतिरखिलतनुः**' इत्यनेन [7]'**ईशानो भूतभव्यस्य**', [8]'**इन्द्रो राजा जगतो य ईशे**', [9]'**धाता ददातु नो रयिमीशानो जगतस्पतिः**', [10]'**धातुः प्रसादान्महिमान-मीशम्**' [11]'**यः परस्स महेश्वरः**', [1]'**न तस्येशे कश्चन**', [2]'**ईशस्सर्वस्य जगतः प्रभुः**

---

[1] परमात्मा च सर्वेषामाधारः परमेश्वरः।
विष्णुनामा स वेदेषु वेदान्तेषु च गीयते।। (वि.पु.६.४.४०)

[2] महा.वन.८८.२५

[3] **नारायणपरा वेदा** यज्ञा नारायणात्मकाः।
तपो नारायणपरं नारायणपरा गतिः।। (महा.शान्ति.३४७.८१)

[4] **वासुदेवपरा वेदाः** वासुदेवपरा मखाः।
वासुदेवपरा योग वासुदेवपराः क्रियाः।। (भा.पु.१.२.२८)

[5] सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनञ्च।
वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम्।। (महा.भीष्म.३९.१५; भ.गी.१५.१५)

[6] आत्मैक्यं देवतैक्यं त्रिकसमधिगता तुल्यतैक्यं त्रयाणाम्
अन्यत्रैश्वर्यमित्याद्यनिपुणफणितीरादियन्ते न सन्तः।
त्रय्यन्तैरेककण्ठैस्तदनुगुणमनुव्यासमुख्योक्तिभिश्च
श्रीमान्नारायणो **नः पतिरखिलतनुः मुक्तिदो मुक्तभोग्यः**।।
(अधिकरणसारावली- ३.३.४३/३७४)

[7] अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति।
ईशानो भूतभव्यस्य न ततो विजुगुप्सते एतद्वै तत्।। (कठ.उ.२.१.१२)
अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः।
ईशानो भूतभव्यस्य स एवाद्य स उ श्वः एतद्वै तत्।। (कठ.उ.२.१.१३)

[8] **इन्द्रो राजा जगतो य ईशे**। सप्तहोता सप्तधा विक्लृप्तः। परेण तन्तुं परिषिच्यमानम्।अन्तरादित्ये मनसा चरन्तम्। देवानां हृदयं ब्रह्मान्वविन्दत्। ब्रह्मैतद्ब्रह्मण उज्जहार। (तै.आरण्य.३.११.६)

[9] यजुर्वेदे.२.४.५; ३.३.११

[10] अणोरणीयान्महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोः ।
तमक्रतुः पश्यति वीतशोको **धातुः प्रसादान्महिमानमीशम्**।। (म.ना.उ.८.३; श्वे.उ.३.२०)

[11] यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः।
तस्य प्रकृतिलीनस्य **यः परस्स महेश्वरः**।। (म.ना.उ.१०.८)

प्रीणाति', [3]'**सर्वस्य प्रभुमीशानम्**', [4]'**सर्वस्येशानः सर्वस्याधिपतिः**', [5]'**पतिं विश्वस्यात्मेश्वरम्**', [6]'**ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिः**', [7]'**पतिं पतीनां परमं परस्तात्**' इत्याद्यर्थः संगृह्यते। [8]'**मुक्तिदो मुक्तभोग्य**' इत्यनेन [9]'**तमक्रतुं पश्यति वीतशोकः**' [10]'**अमृतस्य परं सेतुम्**' [11]'**उतामृतत्वस्येशानः**' [12]'**अध्यात्मयोगाधिगमेन** [13]**गम्यं मत्वा**

---

[1] नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत्।
न तस्येशे कश्चन तस्य नाम महद्यशः।। (म.ना.उ.१.१०)

[2] अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठञ्च समाश्रितः।
ईशस्सर्वस्य जगतः प्रभुः प्रीणाति।। (म.ना.उ.१६.३)

[3] सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्। **सर्वस्य प्रभुमीशानं** सर्वस्य शरणं सुहृत्।। (श्वे.उ.३.१७)

[4] स वा एष महानज आत्मा, योऽयं विज्ञानमयः प्राणेषु य एषोऽन्तर्हृदय आकाशस्तस्मिंश्छेते सर्वस्य वशी **सर्वस्येशानः सर्वस्याधिपतिः**, स न साधुना कर्मणा भूयान्, नो एवासाधुना कनीयान्। एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसम्भेदाय।। (बृ.उ.६.४.२२)
मनोमयोऽयं पुरुषो भास्सत्यः तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा।
स एष सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किञ्च।। (बृ.उ.७.६.१)

[5] **पतिं विश्वस्यात्मेश्वरं** शाश्वतं शिवमच्युतम्।
नारायणं महाज्ञेयं विश्वात्मानं परायणम्।। (म.ना.उ.११.३)

[6] ईशानः सर्वभूतानामीश्वरः सर्वभूतानां **ब्रह्माधिपतिः**
ब्रह्मणोऽधिपतिः ब्रह्मा शिवो मे अस्तु सदाशिवोम्। (म.ना.उ.१७.५)

[7] तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतम्।
पतिं पतीनां परमं परस्तात् विदाम देवं भुवनेशमीड्यम्।। (श्वे.उ.६.७)

[8] अधिकरणसारावली- ३.३.४३/३७४

[9] अणोरणीयान्महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोः ।
तमक्रतुः पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम् ।। (श्वे.उ.३.२०; म.ना.उ.८.३)
अणोरणीयान्महतो महीयानात्मास्य जन्तोर्निहितो गुहायाम्।
तमक्रतुः पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मनः।। (कठ.उ.१.२.२०)

[10] निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्।
अमृतस्य परँ सेतुं दग्धेन्धनमिवानलम्।। (श्वे.उ.६.१९)

[11] पुरुष एवेदँ सर्वं यद्भूतं यच्च भव्यम्। **उतामृतत्वस्येशानः** यदन्नेनातिरोहति।। (पु.सू.२)

[12] तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम् ।
अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति।। (क.उ.१.२.१२)

[13] ङ - देवम्

धीरो हर्षशोकौ जहाति', [१]'**तमेवं विद्वानमृत इह भवति, नान्यः पन्था अयनाय विद्यते**', [२]'**ज्ञात्वा तमेवं मनसा हृदा च भूयो न मृत्युमुपयाहि विद्वान्**', [३]'**तमेव विदित्वाऽतिमृत्युमेति**' [४]'**नारायणं महाज्ञेयम्**' [५]'**ब्रह्मविदाप्नोति परम्**', [६]'**यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता**' इत्याद्यर्थः संगृह्यते। एवं विजयचतुष्टयसामरस्येन [७]'**येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्**' इत्येतदुक्तमिति सर्वं समञ्जसम् ।

इति

श्रीवाधूलकुलतिलकश्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन तदेकदैवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्धमहाचार्यापरनामधेयेन रामानुजदासेन विरचिते वेदान्तविजये

अद्वैतविद्याविजयस्तुरीयः

वाधूलश्रीनिवासार्य तनयं विनयाधिकम् ।
प्रज्ञानिधिं प्रपद्येऽहं श्रीनिवासमहागुरुम् ।।

---

[१] धाता पुरस्ताद्यमुदाजहार। शक्रः प्रविद्वान् प्रदिशश्चतस्रः।
तमेवं विद्वानमृत इह भवति, नान्यः पन्था अयनाय विद्यते।। (पु.सू.१७; नृ.पू.ता.उ.१.६)

[२] स भूतं स च भव्यं जिज्ञासासक्तिमूरितं जारयिष्ठाः।
श्रद्धासत्यो महस्वांस्तपसोपरिष्टात् **ज्ञात्वा तमेवं मनसा हृदा च भूयो न मृत्युमुपयाहि विद्वान्**।
तस्मान्यासमेषां तपसामतिरिक्तमाहुः। (म.ना.उ.२४.१)


[३] एको हंसो भुवनस्यास्य मध्ये स एवाग्निः सलिले संनिविष्टः।
तमेवं विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय।। (श्वे.उ.६.१५)

[४] पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम्।
नारायणं महाज्ञेयं विश्वात्मानं परायणम्।। (म.ना.उ.११.३)

[५] **ब्रह्मविदाप्नोति परम्**। तदेषाभ्युक्ता। सत्यं ज्ञानमनन्तं ब्रह्म। **यो वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वान् कमान् सह। ब्रह्मणा विपश्चितेति**। (तै.उ.२.१)

[६] तै.उ.२.१.१

[७] तस्मै स विद्वानुपसन्नाय सम्यक्प्रशान्तचित्ताय शमान्विताय।
येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्।। (मु.उ.१.२.१३)





Dr. K.K.C. Lakshmi Narasimhan hails from a learned brāhmana family of Teṇkalai Vaiṣṇavite from Cholasimhapuram who were traditionally invested with responsibility of sampradāya care and promotion [for being the family member in lineage of the renowned Dasarathi (Mudaliyāṇḍān): the nephew of Sri Ramanuja right from the time of Śrī Rāmānuja. He was privileged to have his training in Sanskrit and thus acquired Vyākaraṇa Śiromaṇi and Śikṣā Śāstri (B.Ed) as well as M.A., and Ph.D. both in Ancient Indian culture. He has already authored a book 'Vaikhānasa Iconography.'



Dr. K.K.C.S. Badhri Narayanan, younger brother of the above, was previlegedto have his training in Sanskrit and thus acquired Vyākaraṇa Śiromani and Śikṣā-śāstri (B.Ed) as well as M.A. M.Phil and Ph.D. His Ph.D thesis 'Brahmaviyāvijaya' had already been published in 2017.

Both had worked together to bring out the valuable work 'Ghaṭikācala Māhātmyam' (2017) and 'Gurūpasadanavijaya' (2019) of Mahācārya. Currently they are working on 'Vijayollāsa' and 'Parikaravijaya' of Mahācārya. Sadvidyāvijaya and Pārāśaryavijaya, both of Mahācārya are in the future plan,withthe grace of Mahācārya and the Lord Ghaṭikādrīśa



Srirangam



Alvar Tirunagari



Tirunarayanapuram

Kanchipuram



Sriperumpadur

